M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 913

Title: Nyaya Sangraha

913

Z

		Nyayasamgraha	Title.
		Rāmalinga	Author.
			Editor.
			Year, Vols.
sk			Publisher.
Nyaya			Remark.

913

१

॥ श्रीगणेशायनमः ॥ श्रीवरदमूर्तयेनमः ॥ सुधा——मेःशिरसिनयनेवह्निकणिकांजटाजूटेगंगा
तुहिनगिरिकन्यांचहृदये समंताद्भस्माद्यैस्तमहिगणभूषिततनुंस्मरामस्तंदेवंपरमकरुणांभो
धिमनिशं १ जटापुंजंबिभ्रत्क्वचिदपरभागेभृतकचःस्तथैकस्मिन्भागेभसितमपरत्राप्तघुसृणः
फणींद्रंकस्मिंश्चिन्मणिगणधरोन्यत्रभगवान्गिरीन्द्रःश्रेयोनःप्रदिशतुउमामिश्रितवपुः २ ललितैः
पदविन्यासैर्यान्नृत्यतिविबुधवदनरंगेषु सच्छास्त्रवेदवाद्यैःसरस्वतींतांनमस्यामः ३ विधात्रीकामा
नांनिजपदनिरतानांभगवतीत्वमित्याहुःसंतोधरणिधरराजेंद्रतनये अतःकिंचिद्याचेतवचरणपंके
रुहयुगेकदापिश्रीगौरित्वयिचममभक्तेर्नविरमः ४ नित्यमत्यूहसंदोहपुराणात्त्राणदायकं वंदेप १

रमयाभक्त्यागणेशाद्यपार्कैवे ५ नत्वाशिवपदांभोजंब्रह्मानंदरसव्रतं गुरुंरुक्मांगदंचैववंदीक्षि
तंशंकरप्रियं ६ आकांप्रतिव्रतांचैववनाजीपंडिताग्रहैजं कुर्वेन्यायमयंग्रंथंसर्वेश्वरमुदावहं ७
नदुर्ज्ञेनप्रियायाःखमिदानींतनबुद्धितःकिंचिदंप्राज्ञसुज्ञस्यरसालयमितिप्रियं ८ रुक्मांगदतनू
जन्माआकायाश्वसुतःसुधीः रामलिंगाख्यसंज्ञोसौवनाजीपंडितानुजः ९ लक्ष्मीपतिर्दयासिंधु
र्ब्राह्मणप्रतिपालकः सामराजाग्रजश्चैवपिंगलान्वयदीपकः १० आस्तेरसातलेरम्येराजमान्यो
द्विजाग्रणीः रामलिंगेनतेनासौक्रियतेन्यायसंग्रहः ११ नव्याकरणशुद्धिर्मेनछंदोलक्षणस्थि
तिः अपूर्वपूर्वशब्दैश्चग्रथितंप्रितयेहरेः १२ ग्रंथादौग्रंथमध्येग्रंथांतेमंगलमाचरणीयमिति

२

शिष्टाचारः तच्च मंगलं त्रिविधं· वस्तुनिर्देशात्मकं नमस्कारात्मकं आशीर्वादात्मकं चायमपि शिष्टो
भवति· अतः स्वशिष्टत्वसंरक्षणार्थं वस्तुनिर्देशात्मकं मंगलमाचरति वालोपीतीति केश्चिदुक्तं· त
न्न· वस्तुनिर्देशस्य मंगलत्वाभावात्· अर्थोकार नमस्कार स्तुति परमेश्वरस्मरणादीनां शास्त्रे मंग
लशब्दवाच्यत्वात्· वस्तुनिर्देशस्य मंगलशब्दवाच्यत्वाभावात्· तस्मात्केशवमिश्रेण ग्रंथादिरे
व मंगलाचरणं विधाय अथवा मानसं नमस्काररूपं मंगलाचरणं कृत्वा ग्रंथं कृतवानित्युक्तं तन्न·
नमस्कारादि मंगलाचरणं फलप्रमाणयोरभावादयुक्तं तथा चाननुष्ठेयं· तथा चेत्थमनुमानं· मं
गलं नानुष्ठेयं विफलत्वात्· यद्विफलं तन्नानुष्ठेयं यथा वृथा क्रियमाणं जलताडनं· नच विफल २

त्वमसिद्धमिति वाच्यं· मंगलं विफलं समाप्तीतराफलकत्वे सति समाप्त्यफलकत्वात्· यत्समाप्तीत
राफलकत्वे सति समाप्त्यफलकं तद्विफलं यथा वृथा क्रियमाणजलताडनं· नच विशेषणासिद्धो हे
तुः ग्रामपश्वादेरेव तत्फलत्वमिति वाच्यं· तेषां गौण प्रयोजनतया मंगलफलत्वाभावात्· नच स्वर्गा
पवर्गयोरेव मुख्यफलत्वेन प्रयोजनत्वेन मंगलफलत्वमिति वाच्यं· तयोर्मध्ये अपवर्गस्याभाव
रूपत्वेन मंगलफलत्वाभावात्· नच स्वर्ग एव मंगलफलं स्यादिति वाच्यं अधिकारिद्वयकल्पना
गौरवप्रसंगात्· तथाहि· समाप्तिकामनावान् ग्रंथे अधिकारी स्वर्गकामनावान् मंगले अधिकारी·
नचाधिकारिद्वयकल्पनागौरवमिष्टमेवेति वाच्यं· मंगलस्यारब्धकर्मांगत्वेन प्रधानाधिकारिण

३

एवं गे अधिकारात्· अधिकारिद्वयकल्पनागौरवमनिष्टमेवेतिनचामंगलस्यारब्धकर्मांगत्वमेव
नेतिवाच्यं· मंगलस्यारब्धकर्मांगत्वमग्रेसाधयिष्यामः तच्चस्वर्गादीनांफलत्वाभावेसिद्धेसतीत
राफलकत्वेसतीतिविशेषणंसिद्धं· किंच· अनुमानेनापिसमाप्तीतराफलकत्वंसाध्यते· तथाहिमं
गलंनसमाप्त्यन्यफलकंबहुभिश्श्रद्धायौवद्भिःसमाप्त्यन्यकामनांविनाक्रियमाणत्वात्· यद्बहुभिः
श्रद्धावद्भिर्यत्कामनांविनाक्रियतेतत्फलकंनभवति· यथाभोजनंस्वर्गकामनांविनाक्रियतेतत्स्व
र्गफलकंनभवति· तथाचसमाप्तीतराफलकत्वेसतीतिविशेषणंसिद्धं· ननुविशेष्यासिद्धोहेतुः
नचसमाप्तेरेवमंगलफलत्वं· अन्वयव्यतिरेकसध्रीचीनप्रत्यक्षेणैवमंगलस्यकारणतावाच्या॥ ३

सानसंभवति अन्वयव्यतिरेकयोरेवाभावात्· तथाहि मंगलमंगलव्याप्येतरसकलसंपत्तौसत्यां
मंगलसत्वेसमाप्तिसत्वंमंगलाभावेसमाप्त्यभावोवक्तव्यः सचनास्तिकादंबर्यादौमंगलेविद्यमाने
पिसमाप्त्यभावात्अन्वयाभावः बौद्धादिग्रंथेअमरकोशादौमंगलाभावेसमाप्त्यभावोनास्तिसमाप्ते
र्जातत्वात्व्यतिरेकाभावः तथाचान्वयव्यतिरेकाभ्यांव्यभिचारात् अन्वयव्यतिरेकसध्रीचीनप्रत्य
क्षेणमंगलस्यकारणताग्रहोनसंभवतितथाचसमाप्त्यफलकत्वंसिद्धंमंगलस्य· तथाचमंगलस्यवि
फलत्वादननुष्ठेयत्वमितिपूर्वपक्षः· अत्रोच्यते· मंगलस्यसमाप्तिरेवफलंनचसमाप्तेर्मंगलफल
त्वेप्रमाणाभावइतिवाच्यं· श्रुतेरेवप्रमाणत्वात्· ननुमंगलस्यसमाप्तिफलकताबोधिकाश्रुतिःप्र

त्यक्षाऽनुमिता वा · नाद्यः तथाविधश्रुतेरनाकलनात् · शिष्टाचारात्तदनुमानमिति चेन्न · शिष्टाचार
स्यानिर्वचनादिति चेन्न · न · शिष्टत्वं नाम वेदप्रामाण्याभ्युपगंतृत्वं भवति च वेदस्य यत्प्रामाण्यं तस्यायः
अभ्युपगंता स शिष्टः अत्र विचार्यते · यत्किंचिद्वेदप्रामाण्याभ्युपगंतृत्वं शिष्टत्वं · सकलवेदप्रामाण्या
भ्युपगंतृत्वं शिष्टत्वं वा · नाद्यः बौद्धेऽतिव्याप्तिः बौद्धस्यापि द्विमस्य भेषजं न हिंस्यात्सर्वा भूतानीत्या
दिवेदप्रामाण्याभ्युपगमात् · अथवा द्वितीयं सकलवेदप्रामाण्याभ्युपगंतृत्वं शिष्टत्वं एवं च बौद्धे नाति
व्याप्तिः बौद्धस्य ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिवेदप्रामाण्यानभ्युपगमात् · एवं चेत्तर्हि शिष्टे
ऽव्याप्तिः तस्य सकलवेदज्ञानाभावात् · तस्मादिदं लक्षणं न संभवति अत्र सिद्धांतः ननूभ्युपगमः ४

किंचिद्विशेषणं नुपलक्षणं वा · नाद्यः इदानींतनानां सुषुप्तिदशायामशिष्टत्वापत्तेः न चेष्टापत्तिः तदापि सुप्तः
शिष्ट इति व्यवहारात् · न द्वितीयः बौद्धेऽतिव्याप्तेः अनादौ संसारे कदाचित्तेन तदभ्युपगमात् · न च तज्ज
न्माभ्युपगमो विवक्षितः एकस्मिन्नेव जन्मनि शिष्टत्वानंतरं बौद्धतादशायामतिव्याप्तेरिति चेन्न · वेदप्रा
माण्याभ्युपगमसमानकालीनयावत्तद्विरोध्यभ्युपगमसंसर्गाभाववत्त्वस्य विवक्षितत्वात् · एवं च शि
ष्टेनाऽव्याप्तिः सुषुप्तावस्थायां वेदप्रामाण्याभ्युपगमसमानकालीनयावत्तद्विरोध्यत्यंताभावध्वंस
प्रागभाववत्त्वात् · बौद्धे च नातिव्याप्तिः तत्र वेदप्रामाण्याभ्युपगमसमानकालीनयावत्तद्विरोध्य
भ्युपगमसंसर्गाभावमध्ये प्रागभावाभावात् · तद्विरोधिनः संसर्गाभ्युपगमस्य सत्त्वान्नातिव्याप्तिरि

त्तितत्वं·प्रामाण्यंतस्वारसिकस्वतात्पर्येसर्वेवेदाः प्रमाणंइतिअभ्युपगमवान्शिष्टः यद्वा क्षीणदोष
पुरुषत्वंशिष्टत्वं क्षीणदोषत्वंनामदोषाभाववत्पुरुषत्वंतथाचदोषशब्देनरागद्वेषमोहाःतद
भाववान्पुरुषःशिष्टःतथाचप्रत्येकंलक्षणंरागाभाववान्पुरुषःशिष्टः द्वेषाभाववान्पुरुषःशि
ष्टःमोहाभाववैववान्पुरुषःशिष्टःइतिलक्षणत्रयं·ननुयत्किंचिद्रागाभाववत्त्वंवा·सकलरागाभाव
वत्त्वंवा·तत्रनाद्यःबौद्धेऽतिव्याप्तेःतस्यापियत्किंचिद्रागाभाववत्त्वात्नद्वितीयःइदानींनशिष्टेऽव्या
प्तिःतस्यसकलरागाभावाभावात्·रागोनामइच्छातस्याविद्यमानत्वात्·अथवाअन्यं·रागासमानका
लीनरागाभाववत्त्वं एवंचबौद्धेनातिव्याप्तिःतस्यरागसमानकालीनरागाभाववत्त्वात्·इतिचेत्तर्हि ५

शिष्टेऽव्याप्तिःतस्यापिव्यधिकरणास्मदीयरागसमानकालीनरागाभावात्तस्यात्समानाधिकरणादितिचे
दत्रोच्यतेरागासमानकालीनरागसंसर्गाभाववदात्मत्वंशिष्टत्वं·एवंशिष्टेनाऽव्याप्तिःतस्यसमानाधि
धिकरणरागासमानकालीनरागध्वंसवत्त्वात्·एवमग्रिमलक्षणद्वयेपिसमानाधिकरणद्वेषासमानका
लीनद्वेषध्वंसवदात्मत्वंवासमानाधिकरणमोहासमानकालीनमोहध्वंसवदात्मत्वंवाशिष्टत्वंतथाच
एतादृशोयःशिष्टःतदाचारेणानुमितायाश्रुतिस्तयामंगलस्यसमाप्तिंप्रतिसाधनताबोध्यते·श्रुत्यनु
मानंचैवंमंगलंवेदमूलकंअलौकिकशिष्टाचारविषयत्वात्·यत्रालौकिकशिष्टाचारविषयत्वंतत्र
वेदमूलकत्वं यथादर्शपूर्णमासादौ अलौकिकशिष्टाचारविषयत्वंवर्त्तते·दर्शपूर्णमासाभ्यांस्वर्ग

७

कामोयजेतइत्यादिवेदमूलकत्वंचवर्त्तते· प्रकृतमंगलेअलौकिकशिष्टाचारविषयत्वंवर्त्तते· निर्विघ्न
पारसमाप्तिकामोमंगलमाचरेदित्यादिवेदमूलकत्वमपिवर्त्तते· ननुशिष्टाचारेणानुमितोवेदज्ञानपूर्व्यादि
विशेषविशिष्टत्वेनाप्रतिसंहितःकथंमंगलस्यसमाप्तिंप्रतिसाधनतांबोधयेदितिचेन्न· नहीदानीमनुमि
तोवेदःमंगलस्यसमाप्तिंप्रतिसाधनतांबोधयतीतिब्रूमः किंतुप्रत्यक्षतादशायांयस्तद्बोधकआसीत्स
इदानीमनुमीयते· इदानीमनुमितायास्तस्याः अर्थाप्रतिपादकत्वात्· ननुसमाप्तिंप्रतिमंगलस्यान्वय
व्यतिरेकाभ्यांव्यभिचारेणाकारणत्वाभावात्· बाधितमर्थंकथंवेदोबोधयेदितिचेत्न· नह्यिव्यक्त्यपे
क्षयाकारणतांश्रुतिर्बोधयतिकिंतुतज्जातीयापेक्षया· तथाचसमाप्तित्वावच्छिन्नेमंगलस्यहेतु ६

त्वं· यत्रापिमंगलाभावेसमाप्तिर्दृश्यतेतत्रापिजन्मांतरीयमंगलस्यहेतुत्वं· कारणाभावेकार्यानुत्पत्तेः त
थाचनव्यतिरेकव्यभिचारः यत्रापिकादंबर्यादौमंगलेविद्यमानेपिसमाप्त्यभावः तत्रविघ्नभूयस्त्वात्· अं
ल तराविघ्नोत्पत्तेर्वा· तथाचमंगलस्यसमाप्तिःफलमितिसिद्धं· तत्रेदंविचार्यते नसमाप्तेःफलत्वंविघ्नध्वंसविशि
ष्टसमाप्तिफलत्वेविशेषणीभूतविघ्नाभावस्यफलत्वं॥ अन्यथाविशिष्टस्यफलत्वमेवनस्यात्· इदंचिंता
मणिकारस्यापिसंमतंतेनविघ्नध्वंसस्यैवफलत्वस्योक्तत्वात्· विघ्नोमावर्त्ततामितिकामनयामंगलाच
रणात्· तस्माद्विघ्नध्वंसएवफलंनसमाप्तिः उभयतोव्यभिचारात्· ननुविघ्नध्वंसस्यापिनमंगलफलत्वं।
मंगलंविनापिगंगास्नानादितोपिविघ्नध्वंससंभवादितिचेत् न विघ्नध्वंसविशेषेतस्यहेतुत्वंनतुवि

घ्नध्वंससामान्ये· यथातवमते मंगलस्य समाप्तिमात्रेन हेतुत्वं मंगलं विनापि स्वतः सिद्धविघ्नात्यंताभावात्·
यत्र समाप्तिस्तत्र मंगलस्य व्यभिचारात् किंतु समाप्तिविशेषे तथा विघ्नध्वंसविशेषे मंगलस्य हेतुत्वं· न च स
माप्तेर्भावरूपत्वेन विशेषः संभवति· विघ्नध्वंसस्याभावरूपत्वेन विशेषासंभवादिति वाच्यं· अभावेपि विशे
षस्य विद्यमानत्वात्· यथा समवायिकारणनाशात् द्रव्यनाशः क्वचिदसमवायिकारणनाशाद् द्रव्यना
शाद् इत्यत्राभावविशेषे समवायिकारणनाशस्य हेतुत्वं तद्वद्विघ्नध्वंसविशेषे मंगलस्य हेतुत्वं· तस्माद्विघ्नध्वं
स एव फलमिति न किंचन दूषणमिति तत्वं· अन्ये तु मंगलस्य समाप्तिरेव फलं· समाप्तिकामो मंगलमा
चरेदिति श्रुत्या समाप्तेरेव मंगलफलत्वबोधनात्· न च निर्विघ्नसमाप्तिकामो मंगलमाचरेदिति श्रु ७

त्या विघ्नाभावविशिष्टसमाप्तेः फलत्वबोधनात् [illegible] णीभूतविघ्नाभावस्यापि फलत्वबोधनमिति वाच्यं·
न ह्यनया श्रुत्या विघ्नाभावस्य फलत्वं बोध्यते· किंतु मंगलेन समाप्तिलक्षणे फले जनयितव्ये विघ्नाभावस्य
द्वारत्वं बोध्यते· द्वारत्वं नाम व्यापारत्वं· व्यापारत्वं नाम तज्जन्यत्वे सति तज्जन्यजनकं· विघ्नध्वंसस्य मंग
लेन समाप्तौ जननीयायां व्यापारत्वं विघ्नध्वंसः मंगलजन्यो भवति· मंगलजन्यायाः समाप्तेर्जनको भवती
ति कृत्वा अवांतरव्यापारस्य फलत्वाभावात्· न हि व्यापारेण व्यापारी अन्यथासिद्धः अन्यथा स्वर्गं प्रति या
गस्य हेतुत्वं न स्यात्· यागस्यापूर्वमेव फलमस्तु· न चापूर्वस्य व्यापारत्वेन फलत्वमिति वाच्यं· प्रकृतेपि वि
घ्नध्वंसस्य व्यापारत्व न फलत्वमिति· किंच· मंगलस्य समाप्तिफलत्वे आरब्धकर्मांगत्वं संभवति प्रधाना

८ धिकारिणएवांगेऽधिकारात्· प्रधानेऽधिकारिसमाप्तिकामनावान्सएवमंगलेऽधिकारी· अन्यथाविघ्न
ध्वंसकामनावान्मंगलेऽधिकारीसमाप्तिकामनावान्ग्रंथेऽधिकारीनचाधिकारिभेदेऽंगप्रधानभावः
प्रधानाधिकारिणएवांगेऽधिकारात्· नचमंगलारब्धकर्मणोरंगांगीभावएवनेतिवाच्यं· अंगांगीभाव
स्यानुमानप्रमाणसिद्धत्वात्· तथाहि· मंगलंआरब्धकर्मांगं· कर्मार्थितयाविशिष्टेस्तत्पूर्वंक्रियमाणत्वा
त्· यद्यदर्थितयाविशिष्टेस्तत्पूर्वंक्रियतेतत्तदंगंयथाप्रयाजादिकं· दर्शप्रयाजादिकमंगंदर्शनिष्पत्त्यर्थित
याविशिष्टेस्तत्पूर्वंक्रियमाणंभवतितत्दर्शपूर्णमासांगं· अथवामंगलमारब्धकर्मांगं· फलांतराभावेस
तिफलवत्कर्मारिप्समानेननियमतस्तत्पूर्वंक्रियमाणत्वात्दर्शप्रयाजवत्· इदंचारब्धकर्मांगत्वंमं ८

गलस्यसमाप्तिफलकत्वेसंभवतिनविघ्नध्वंसफलकत्वेइतिकेचिदाहुः ननुमंगलस्यारब्धकर्मांगत्वंनसंभव
तीति कुतः प्रधानविधिविधेयत्वाभावात्· अंगानांप्रधानविधिविधेयत्वनियमात्· कोऽर्थः प्रधानकर्त्तव्य
ताबोधकविध्येकवाक्यतापन्नविधिबोध्यकर्त्तव्यताकत्वं· नचग्रंथादिसमाप्तौप्रधानेविधिरस्ति· ग्रंथ
कर्त्तव्यताबोधकस्यलौकिकप्रमाणस्याप्तशब्दः एकदेशोऽपेक्षणीयोनचयुज्यते· तस्यतन्निरपेक्ष
त्वादितिचेन्न· अपूर्वजनकांगानांप्रधानकर्त्तव्यताबोधकविध्येकवाक्यतापन्नविधिबोध्यकर्त्तव्यताक
त्वात् अयंमंगलजन्यः प्रतिबंधकाभावरूपोपकारः तस्यचलोकावगतकारणसहकारित्वेनप्रतिबंध
केसतितस्याकार्यानुत्पत्तेः तथाचप्रधानकर्त्तव्यताबोधकमानानापेक्षणीयशब्दबोध्यकर्त्तव्यताकत्वंमं

६

गलेप्यस्ति· अतोंगीभूतेमंगलेप्रधानफलफलकत्वेनसफलत्वं· अतःप्रधानफलयोःसत्वान्मंगलानुष्ठा
नंग्रंथारंभेयुक्तमेवेतिकेशवमिश्रेणग्रंथादादिरेवमंगलाचरणंविधायमानसंवामंगलाचरणंकृत्वाग्रं
थंकृतवानितितत्वं· एतद्विस्तरस्तुचिंतामणौद्रष्टव्यः बालव्युत्पादनार्थत्वान्न्यायसंग्रहस्यनेहविस्तरः·के
शवमिश्रेणास्वग्रंथेशिष्यप्रवृत्यर्थंविषयप्रयोजनसंबंधाधिकारिणोदर्शिताः तद्दर्शनमयुक्तं· शास्त्रका
रैः शास्त्रादौविषयप्रयोजनसंबंधाधिकारिणोदर्शनीयाइत्यनुक्तत्वात्· तत्रसमाधानं· उदयनाचार्यै
रुक्तं· कथं· ज्ञातार्थंज्ञातसंबंधंश्रोतुंश्रोताप्रवर्त्तते· शास्त्रादौतेनवक्तव्यःसंबंधःसप्रयोजनइति
कोऽर्थः ज्ञातःअर्थोयस्यप्रतिपाद्यंयस्यएतादृशंग्रंथं· अथचज्ञातःसंबंधोयस्यएतादृशंग्रंथंश्रोतुं ६

श्रोताशिष्यःयतःप्रवर्त्ततेतस्मात्कारणात्तेनग्रंथकर्त्राशास्त्रादौस्वग्रंथेशिष्यप्रवृत्यर्थंसप्रयोजनःसंबंधो
वक्तव्यइत्युदयनाचार्यैरुक्तत्वात्· इतिकृत्वाअस्माभिरपीविषयप्रयोजनसंबंधाधिकारिणोदर्शिताःतत्र
विषयोनामकः प्रतिपाद्योर्थोविषयः एतस्मिन्ग्रंथेषोडशपदार्थाःप्रतिपाद्याःतेऽत्रविषयाःमोक्षश्चप्रयो
जनं· एतस्मिन्ग्रंथे· कथं· यदुद्दिश्यपुरुषाःप्रवर्त्ततेतत्प्रयोजनं· इतिप्रयोजनलक्षणं· प्रकृतेचमोक्षमुद्दि
श्यएतस्मिन्ग्रंथेपुरुषाःप्रवर्त्ततेइतिकृत्वामोक्षंप्रयोजनं· पदार्थानांग्रंथस्यचप्रतिपाद्यप्रतिपादकभा
वःसंबंधः पदार्थाःप्रतिपाद्याः प्रतिपादकश्चायंग्रंथः एतस्मिन्ग्रंथेअधिकारीकः वित्पत्तित्सुर्बालका
धिकारिः मोक्षकामोवाअधिकारी· इतिअनुबंधचतुष्टयंप्रदर्शितंकेशवमिश्रेण· श्लोकार्थस्त्वेवं· म

१०

याएषासंक्षिप्तयुक्त्यन्विततर्कभाषाप्रकाश्यते· कोर्थः मयाकेशवमिश्रेणएषाबुद्धिस्था· संक्षिप्तयुक्त्यन्वि
ततर्कभाषा· संक्षिप्ताचासौयुक्त्यन्विताचासौतर्कभाषाचसंक्षिप्तयुक्त्यन्विततर्कभाषा· संक्षिप्तानामश
ब्दतः संक्षिप्ता· कोऽर्थः शब्दबाहुल्यरहिता· युक्त्यन्वितायुक्तिबाहुल्यसहिता· एतादृशीयातर्कभाषा
साप्रकाश्यते· तर्कभाषाशब्दार्थः कः तर्क्यंतेव्युत्पाद्यंतेतेतर्काः प्रमाणादिषोडशपदार्थाः तेभाष्यंते
अनयासागोतमप्रणीतन्यायसूत्ररूपाविद्यासातर्कभाषा· प्रकाश्यतेकोर्थः विशदीक्रियन्ते· एषाबुद्धिस्थे
त्युक्तंतन्नसंभवति· कुतः बुद्धेर्गुणत्वात्· तर्कभाषायाः शब्दरूपत्वेनबुद्धिनिष्ठत्वाभावात्· कुतः गुणेगु
णानंगीकारात्· शब्दरूपायास्तर्कभाषायाआकाशसमवेतत्वात्· तत्रोत्तरं· यद्यपितर्कभाषारूपः शब्दः १०

आकाशसमवेतस्तथाप्याधाराधेयभावलक्षणसंबंधाबुद्धावपिवर्त्तते· अत्रदृष्टांतः यथाघटशब्दः सम
वायसंबंधेनआकाशेवर्त्तते· योवाच्यवाचकभावलक्षणसंबंधेनघटेपिवर्त्तते· तद्वदाधाराधेयभाव
लक्षणसंबंधेनतर्कभाषाबुद्धौवर्त्तते· नन्वाधाराधेयभावसंबंधः संयोगेनसमवायेनवाप्रसिद्धः सचप्र
कृतेनास्तीतिचेन्न· प्रकृतेआधाराधेयभावोनामस्वरूपसंबंधविशेषः सचविषयविषयीभावलक्षणः
प्रकृतेऽस्त्येवबुध्याशब्दरूपायास्तस्याविषयीकरणात्· इतिनकोपिविरोधः प्रकाश्यतइदंकिमर्थमु
क्तं· क्रियतइत्येवकिमर्थंनोक्तं· (कोर्थः स्वकपोलकल्पितत्वशंकयास्वकृत) तत्रोत्तरं· स्वकपोलकल्पित
त्वशंकयाऽप्रामाण्यशंकाकलंकप्रसक्तितः प्रेक्षावत्प्रवृत्त्यनुपपत्तिभियाप्रकाश्यतइत्युक्तं· कोर्थः स्वक

११

योलकल्पितत्वशंकयास्वकृतत्वशंकयाकृत्वायोयमप्रामाण्यशंकाकलंकः तस्ययाप्रसक्तिः तयाकृत्वा
प्रेक्षावतायाप्रवृत्तिः तस्याअनुपपत्तिः तद्द्वयेनप्रकाश्यतेइत्युक्तं· प्रेक्षावंतः के· सदसद्विवेचिकाबुद्धिः
प्रेक्षा· साविद्यतेयेषांतेप्रेक्षावंतः तेषांप्रवृत्त्यनुपपत्त्याप्रकाश्यतेइत्युक्तं· किमर्थंप्रकाश्यते· तस्यकृ
ते· तस्यपुरुषस्यकृते· प्रयोजनाय· नन्विदंनसंभवतिकुतः तस्येतिव्यर्थं· कथं· कृतेइत्यनेनैवतस्य
लाभात्· कृतेइत्यव्ययंतादर्थ्येनिपात्यतइतिवचनात्· तत्रसमाधानं· विशिष्टवाचकानांपदानांवि
शेषणवाचकपदसंनिधानेसतिविशेष्यमात्रपरत्वं· कोऽर्थः विशिष्टवाचकंपदंकृतेइत्यव्ययं·
कथंकृतेइत्यव्ययंतादर्थ्येनिपात्यतेइतिवचनात् विशिष्टवाचकंपदं· तस्यविशेषणवाचकं ११

55

पदंकिंभवतितस्येति· तत्समवधानेसतिविशेष्यमात्रपरत्वं· नामप्रयोजनमात्रपरत्वं· तथाचायमर्थः।
तस्यप्रयोजनायेति· अत्रदृष्टांतमाह· सकीचकैर्मारुतपूर्णरंध्रैरित्यत्रविशिष्टवाचकंपदंकिंभवतिकी
चकशब्दः कथं· सच्छिद्रोवेणुः कीचकइत्यभिधानाबलात्· तथाचविशिष्टवाचकस्यकीचकशब्दस्य
विशेषणवाचकंपदंकिंभवति· मारुतपूर्णरंध्रैरिति· एतत्समवधानेसतिविशेष्यमात्रपरत्वंनामवे
णुमात्रपरत्वंतद्वत्· कृतेइत्यव्ययस्यप्रयोजनमात्रवाचित्वं· सकः यः बालोपिसन्न्यायनयेप्रवेशंवा
छति· अपिशब्दोविरोधाभाससूचनाय· विरोधस्त्वेवं· स्तनपानकर्तृर्बालस्यन्यायशास्त्रेप्रवेशाभावः
अयंविरोधः परिहारस्त्वेवं· बालोनामकः अधितव्याकरणः अनधीतन्यायशास्त्रोबालः कोऽर्थः अधीतं

१२

व्याकरणंयेनतथाभूतः अनधीतंन्यायशास्त्रंयेनसतथाभूतः बालशब्देनोच्यते· अथवा· अज्ञातन्या
यसिद्धांतोबालः अज्ञातः न्यायसिद्धांतोयेनसबालः न्यायनये· एतस्यायमैमर्थः नियतेप्राप्यतेविवक्षि
तोऽर्थोऽनेनेतिन्यायः युक्तिः युक्तिप्रधानोनयः न्यायनयः तस्मिन्न्यायनयेयुक्तिशास्त्रेप्रवेशंवांछ
ति· अथवा· न्यायोनामपक्षधर्मत्वादिपंचरूपोपपन्नंवाक्यंन्यायः अनुमानप्रयोगः अनुमानप्रधानोन
योन्यायनयः तस्मिन्न्यायनयेअनुमानप्रधानकशास्त्रेप्रवेशंवांछति· तानिचपंचरूपाणि· पक्षधर्मत्वं·
सपक्षेसत्वं· विपक्षाद्व्यावृत्तिः अबाधितविषयत्वं· असत्प्रतिपक्षत्वंचेति· तस्यप्रयोजनायक्रियते·
ननुपटुतराभ्यासेनमहाशास्त्रेप्रवर्त्ततांबालः किमनेनग्रंथेनेत्याशंक्याह· अलसोबालः पटुतराभ्या १२

सेऽसमर्थः तदर्थंमदीयः प्रयत्नप्रवृत्त्यर्थः ननुबहुतरश्रुतमासाद्यः महाशास्त्रेप्रवर्त्ततांकिमनेनग्रंथेनेत्य
तआह· अल्पेनश्रुतेन· अल्पश्रवणेनमहाशास्त्रेप्रवेशंवांछतितदर्थंमदीयः प्रयत्नः सार्थकः तर्कभा
षाप्रकाश्यतेइत्युक्तंकेवैशेषिमिश्रेणतदनंतरंन्यायस्यादिमंसूत्रमितिप्रतिज्ञाकृतासाचासंगता· कथंसू
त्रमध्येतर्कभाषाप्रकाशनाभावात्· तस्मान्न्यायस्यादिमंसूत्रमितिवचनंव्यर्थं· अत्रोच्यते· न्यायस्या
दिमंसूत्रमितिवचनस्यव्यर्थतानास्ति· आशंकांतरनिरासफलकत्वात्· किंतदाशंकांतरं· तदेवोच्य
ते· ननुप्रमाणादिपदार्थाः तदेवास्यग्रंथस्यविषयाः यद्विन्यायविद्यायांविषयास्युः मोक्षश्चतदेवा
स्यप्रयोजनंयद्विन्यायविद्यायाः प्रयोजनंभवेत्· संबंधाधिकारिणावपिअस्यतदेवस्यातांयद्विन्या

यविद्यायाहेतोस्तः न्यायविद्यायामेव विषयप्रयोजनसंबंधाधिकारिणामभावात्· तत्प्रकरणे एतस्मि
न्ग्रंथे सुतरां तेषामभावः इत्याशंकापरिहारार्थं प्रमाणप्रमेयेत्यादिसूत्रं प्रतिज्ञाकरणं व्यर्थं न चानेन
सूत्रेण न्यायशास्त्रे विषयप्रयोजनसंबंधाधिकारिणां दर्शितत्वात्· तत्प्रकरणत्वेन एतस्यापि त एव
विषयप्रयोजनसंबंधाधिकारिणः न च एतस्य तत्प्रकरणत्वमसिद्धमिति वाच्यं· प्रकरणलक्षणलक्षि
तत्वात्· एतस्य तत्प्रकरणत्वं· प्रकरणलक्षणं चेदं· शास्त्रैकदेशसंबद्धं शास्त्रकार्यांतरे स्थितं· आहुः प्र
करणं नाम ग्रंथभेदं विपश्चितः· कोऽर्थः शास्त्रस्य एकदेशो नाम शास्त्रेयः कश्चन पदार्थः प्रतिपाद्यः तेन
संबद्धं नाम तत्प्रतिपादकं शास्त्रकार्यांतरं नाम शास्त्रस्य यत्प्रयोजनं तत्र स्थितिर्नाम तत्प्रयोजनं यस्ये १३

तादृशं प्रकरणं नाम ग्रंथभेदं विपश्चित इति विद्वांसः आहुः प्रकृते च· न्यायविद्यायां प्रतिपाद्याः पदार्थास्तेत्र
प्रतिपाद्याः न्यायविद्यायां प्रयोजनं मोक्षः स एवात्र प्रयोजनमिति कृत्वा तत्प्रकरणत्वमेतस्य· तथा च न्याय
स्यादिमं सूत्रमिति न्यायसूत्रप्रदर्शनस्य व्यर्थता नास्ति· अस्मिन्सूत्रे समासः प्रमाणानि च प्रमेयानि च संशया
श्च प्रयोजनं च दृष्टांताश्च सिद्धांताश्चावयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितंडा च हेत्वाभासाश्च
छलानि च जातयश्च निग्रहस्थानानि च तानि निग्रहस्थानानि तेषां तत्वज्ञानात् कोऽर्थः यथार्थज्ञानात्· नि
श्रेयसशब्देन मोक्षः तस्याधिगमो नाम प्राप्तिर्भवति· ननु अधिगमपदं व्यर्थं एतेषां तत्वज्ञानात् मोक्षः
अनेनैव चरितार्थत्वादिति चेत् न यथैव कृत्या मोक्ष उत्पाद्यते तथैव प्राप्यत इति ज्ञापनार्थं अधिगम

पदोपादानंनतुसिद्धस्यघटादेरिवप्राप्तौविलंबइति·यथार्थत्वंकिंनाम·तद्वतितत्प्रकारकज्ञानत्वंय
थार्थत्वं·यथायंघटइतिज्ञानंयथार्थं·कथंतद्वद्देनघटत्वंतद्वान्घटस्तस्मिन्घटेघटत्वप्रकारकंज्ञानमि
तिकृत्वायथार्थं·अयथार्थत्वंनामतदभाववतितत्प्रकारकत्वंअयथार्थत्वं·यथाशुक्तिकाशकलेइदंरज
तमितिज्ञानमयथार्थं·कथं·रजतत्वाभाववतिशुक्तिकाशकलेरजतत्वप्रकारकंज्ञानंअयथार्थं·तथा
चतेषांषोडशपदार्थानांतत्वज्ञानान्निश्रेयसाधिगमइति·अर्थस्तुउक्तः·अस्यार्थेतिवचनंव्यर्थं·तत्रो
च्यते·आशंकांतरनिरासफलकत्वात्·अस्यार्थेतिवचनस्य·किंतदाशंकांतरंतदेवोच्यते·तत्वज्ञानं
विद्यतेयस्यासौतत्वज्ञानःतस्मात्तत्वज्ञानात्पुरुषात्·निश्रेयसंशिवंभद्रंकल्याणंमंगलंशुभमित्यभि १५

धानात्निश्रेयसशब्देनशुभंतस्याधिगमोनामप्राप्तिःतथाचपुरुषात्शुभप्राप्तिर्भवतीत्यर्थः·नत्वेतेषां
पदार्थानांज्ञानान्मोक्षहेत्वाशंका·तन्निवृत्त्यर्थंअस्यार्थेति·कोऽर्थः·प्रमाणादिषोडशपदार्थतत्वज्ञानेना
त्कोऽर्थःयथार्थज्ञानात्निश्रेयसशब्देनमोक्षस्तस्याधिगमोनामप्राप्तिर्भवतिइत्युक्तं·प्रमाणादीनां
तत्वज्ञानकोऽर्थःसम्यक्ज्ञानंतावन्नचभवति·यावत्षोडशपदार्थानांउद्देशलक्षणपरिज्ञानक्रियंते·
स्वोक्तेऽर्थेभाष्यकारसंमतिरुक्ता·यदाहभाष्यकारः·त्रिविधाचास्यशास्त्रस्यप्रवृत्तिः·नन्विदंभाष्यमशु
द्धं·शास्त्रस्याचेतनत्वात्प्रवृत्तेश्चेतनधर्मत्वात्शास्त्रस्यप्रवृत्तिर्नसंभवति·तत्रभाष्येसमाधानं·शास्त्रस्ये
त्यत्रषष्ठीविषयेतथाचशास्त्रविषयिणीपुरुषस्यप्रवृत्तिस्त्रेधा·उद्देशात्मिका·लक्षणात्मिका·परीक्षात्मि

काचेति· भाष्यकारेणोक्तं तथैवास्माभिरुक्तं· न किंचिद्दूषणमिति तत्त्वं· उद्देशस्य किं लक्षणं इत्याशंकायां
उद्देशलक्षणमुक्तं· कथमित्यपेक्षायां तत्रोक्तं· उद्देशस्तु नाममात्रेण वस्तुसंकीर्त्तनं· कोऽर्थः नाममात्रेण
यद्वस्तुनः संकीर्त्तनमुद्देशः यथा॰ अयं घट इति घटस्योद्देशः घट इति यन्नाम तेन वस्तुना घटस्य संकी
र्त्तनं वर्त्तते इति कृत्वायं घटस्य उद्देशः अत्र लक्ष्यं किं लक्षणं किं· उद्देशस्तु लक्ष्यः नाममात्रेण वस्तुसंकी
र्त्तनं लक्षणं· लक्षणे तान्येव पदानि ग्राह्याणि· यैः पदैरतिव्याप्तिरव्याप्तिरसंभवाख्या दोषाः निराकर्त्तुं श
क्यंते· अतिव्याप्तिः का· अव्याप्तिः का· असंभवः कः· अलक्ष्ये लक्षणगमनमतिव्याप्तिः यथा ब्राह्मणलक्ष
णे नरत्वे क्रियमाणे शूद्रादावतिव्याप्तिः कथं ब्राह्मणस्तु लक्ष्यः अलक्ष्यस्तु शूद्रः तत्र ब्राह्मणलक्षणं १५

नरत्ववत्त्वं गतं· अतो नोतिव्याप्तिः लक्ष्यैकदेशे लक्षणस्यावर्त्तनं अव्याप्तिः यथा ब्राह्मणत्वावच्छिन्नब्राह्म
णलक्षणे शिखायज्ञोपवीतवत्त्वे क्रियमाणे संन्यासिषु अव्याप्तिः कथं ब्राह्मणत्वावच्छिन्नाः ब्रह्मचारिगृ
हस्थवानप्रस्थसंन्यासिनस्ते लक्ष्याः तेषामेकदेशः संन्यासी तत्र शिखायज्ञोपवीतवत्त्वं यल्लक्षणं तस्या
वृत्तिरिति कृत्वाऽव्याप्तिः लक्ष्ये क्वाप्यवर्त्तनमसंभवः यथा ब्राह्मणलक्षणे शृंगादंडवत्त्वे क्रियमाणेऽसंभ
वः कथं· ब्राह्मणस्तु लक्ष्यः शृंगादंडवत्त्वं लक्षणं· तच्च ब्राह्मणमात्रे नास्ति· कुतः ब्राह्मणे शृंगादंडाभावा
त् इदमप्युद्देशस्य लक्षणं भवति· अत्रैतावंति पदानि किमर्थं ग्राह्याणि· कीर्त्तनमुद्देश इत्येवास्तु· ए
वं चेत्तर्हि गंगा घोषेऽतिव्याप्तिः गंगाघोषः कीर्त्तनं भवति· स किमुद्देशः स तु नोद्देशः अतस्तत्रातिव्या

१६

प्तिः प्राप्तातत्परिहारार्थं किंपदमुपात्तं· संपदमुपात्तं· गंगाघोषो यद्यपि कीर्त्तनं भवति तथापि संकीर्त्त
नं न भवति· संकीर्त्तनं नाम ताल्वोष्ठपुटाभ्यामुच्चारणं· गंगाघोषे ताल्वोष्ठपुटाभ्यामुच्चारणाभावात्तत्रना
तिव्याप्तिः संकीर्त्तनमुद्देश्य इत्येवास्तु· एवं चेत्तर्हि काकरवे ऽतिव्याप्तिः काकरवः किमुद्देश्यः स उद्देश्यो
न भवति· अतस्तत्रातिव्याप्तिः प्राप्तातत्परिहारार्थं किंपदमुपात्तं· नाम्नेतिपदं· काकरवे यद्यपि संकीर्त्तनत्वं व
र्त्तते व तथापि नाम्नासंकीर्त्तनत्वं नास्ति अतस्तत्र नातिव्याप्तिः ननु तथापि नाम्नासंकीर्त्तनत्वं वर्त्तते व· कुतः
स्वजातीयं प्रति नाम्नासंकीर्त्तनत्वात्· अतस्तत्रातिव्याप्तिः तत्रोत्तरं· मोक्षसाधनीभूततत्वज्ञानप्रयोजक
नाम्नासंकीर्त्तनत्वस्य विवक्षितत्वात्· तच्च तत्र नास्ति· अतस्तत्र नातिव्याप्तिः नाम्नासंकीर्त्तनमुद्देश्य इत्ये १६

वास्तु· एवं चेत्तर्हि गंधवती पृथिवीति लक्षणवाक्ये ऽतिव्याप्तिः कथं· गंधवती पृथिवीति लक्षणवाक्यं नाम्नासं
कीर्त्तनं भवति· तत्किमुद्देश्यः तदुद्देश्यो न भवति· अतस्तत्रातिव्याप्तिः प्राप्तातत्परिहारार्थं किंपदमुपात्तं मात्रे
तिपदमुपात्तं· गंधवती पृथिवीति लक्षणवाक्यं यद्यपि नाम्नासंकीर्त्तनं भवति तथापि नाममात्रेण संकीर्त्तनं
न भवति अतस्तत्र नातिव्याप्तिः ननु गृहीतेपि मात्रे भक्षितेपि लशुने न शांतो व्याधिरिति न्यायेनातिव्याप्तिः त
दवस्थैव· कथं नामैव नाममात्रं· मौ नाममात्रेण वस्तुसंकीर्त्तनत्वं वर्त्तत एव· अत्रस्तत्र लक्षणवाक्येति
ऽव्याप्तिः स्यादेवेत्याशंक्य· तत्रोत्तरं· नाममात्रेणेति कोऽर्थः असाधारणधर्मानुपरागेण वस्तुसंकीर्त्तनमि
त्यर्थः एवं च गंधवती पृथिवीति लक्षणवाक्ये नातिव्याप्तिः तत्रासाधारणधर्मो गंधः तदुपरागेण कोऽर्थः

तद्युक्तत्वेनोच्चारणान्नातिव्याप्तिः गंधेऽसाधारणत्वं नाम पृथिवीवृत्तित्वे सति पृथिवीतरावृत्तित्वेनासा
धारणत्वात्· तद्वृत्तित्वे सति तदितरावृत्तिरसाधारणो धर्म इति असाधारणसामान्यलक्षणलक्षितत्वा
त्· न त्वसाधारणधर्मानुपरागेण वस्तुसंकीर्तनमुद्देश इति लक्षणं न संभवति· कुतः पृथिवीत्युद्देशोऽ
व्याप्तिः कथं पृथिवीत्युद्देशोऽसाधारणो धर्मः पृथिवीत्वं तदुपरागेण वस्तुभूतायाः पृथिव्याः संकीर्तन
त्वात्· कुतः पृथिवीपदस्य पृथिवीपृथिवीत्वं पृथिवीपृथिवीत्वयोः संबंधस्तद्वाचकत्वात्· इति कृत्वा पृथि
वीत्वोपरागेणैव वस्तुभूतायाः पृथिव्याः संकीर्तनत्वात्· पृथिवीत्युद्देशोऽव्याप्तिः तस्मादिदं लक्षणं न
संभवति· तत्र समाधानं· लक्षतावच्छेदकातिरिक्तासाधारणधर्मानुपरागेण वस्तुसंकीर्तनमुद्देशः

इदानीं पृथिवीत्युद्देशे नाव्याप्तिः कथं· लक्षतावच्छेदकं पृथिवीत्वं तदतिरिक्तोऽसाधारणधर्मः गंधवत्वं
तदनुपरागेणैव वस्तुसंकीर्तनत्वात्· पृथिवीत्युद्देशो पृथिवीत्वोपरागेणैव वस्तुसंकीर्तनत्वात्· गंधवत्वो
परागेणैव वस्तुसंकीर्तनत्वाभावात् नाव्याप्तिः तत्र लक्षतावच्छेदकं पृथिवीत्वं तदतिरिक्तः असाधारणो ध
र्मो गंधः तदुपरागेणैव वस्तुप्रतिपादकत्वान्नातिव्याप्तिः वस्तुपदं स्पष्टार्थं· केचित्तु वंध्याः पुत्रखपुष्पयो
रतिव्याप्तिरिति वदंति· तत्रापि नाम्ना वंध्यापुत्रखपुष्पयोः संकीर्तनत्वात् अतस्तत्रातिव्याप्तिः तत्परिहारा
र्थं वस्तुपदं· एवं च नातिव्याप्तिः वंध्यापुत्रखपुष्पयोर्वस्तुत्वाभावात्· अलिकत्वाच्च नातिव्याप्तिः तन्न· वंध्या
पुत्रेऽस्तिव्याप्त्यभावः कथं· वंध्यापुत्रः सन्वा असन्वा· तत्र नाद्यः सत्वे वंध्यापुत्रत्वं न स्यात्· वंध्यायाः पु

त्राभावात्· असत्वं नाम वंध्यापुत्राभावः स च न संभवति प्रतियोग्यप्रसिद्धेः सद्भ्यामभावो निरूप्यते·
कोऽर्थः सद्भ्यां विद्यमानाधिकरणप्रतियोगिभ्यामभावो भावनिरूपणं· प्रतियोगिनः वंध्यापुत्रस्याप्रसिद्ध
त्वात्· अप्रसिद्धप्रतियोगिकाभावाभावात्· न वंध्यापुत्रेऽतिव्याप्तिः तर्हि वंध्यापुत्रो अस्ति नास्ति एत
स्य प्रश्नस्य का गतिः तत्र सतां मूकत्वेवोचितेति उदयनाचार्यैरुक्तत्वात्· अथवा· लक्षणवाक्याद्यसमभि
व्याहृतनाम्ना वस्तुसंकीर्त्तनमात्रमुद्देशः एवं च गंधवती पृथिवीति लक्षणवाक्ये नातिव्याप्तिः तत्र लक्षण
वाक्याद्यसमभिव्याहृतनाम्ना संकीर्त्तनत्वाभावात्· कथं· गंधवतीति लक्षणवाचको यः शब्दस्तेन स
हृतनाम्ना संकीर्त्तनत्वात्· लक्षणवाक्यांतरगतोद्देशे च नातिव्याप्तिः तत्र मात्रपदेनैव वारणात्· कथं·

तत्र नाम्ना वस्तुसंकीर्त्तनमात्रत्वं नास्ति· किंतु तत्र लक्षणलक्षितत्वमपि वर्त्तते· न च लक्षणांतर्गतोद्देशा
स्योद्देशत्वेन लक्ष्यत्वात् अतिव्याप्तिरेव न नेति वाच्यं· तत्रोच्यते· लक्षणानंतर्भूतस्योद्देशस्यात्र लक्ष्यत्वात्·
अस्य च लक्षणांतर्भूतत्वेनालक्ष्यत्वात्· अलक्ष्ये लक्षणगमनाच्चातिव्याप्तिः स्यादेव· अत एव मात्रपद
स्यात्रैनयनमिति तत्वं· उद्देशानंतरं धर्मस्य प्रतिपादको यः णस्योद्दिष्टत्वात् लक्षणलक्षणमुक्तं·
कथमित्यपेक्षायां तत्रोक्तं· असाधारणधर्मवचनं लक्षणं कोऽर्थः असाधारणधर्मस्य प्रतिपादको यः श
ब्दः स लक्षणात्मकशास्त्रस्य लक्षणं· गंधवती पृथिवी अयं शब्दः असाधारणधर्मो गंधवत्त्वं तत्प्रतिपादकः
शब्दो भवतीति कृत्वायं शब्दः पृथिव्याः लक्षणमित्युच्यते· अत्र लक्ष्यं· किं· लक्षणं किं लक्षणं लक्ष्यं· अ

१९

साधारणधर्मवचनंलक्षणं·लक्षणेतान्येवेत्यादिज्ञेयं·इदमपिलक्षणस्यलक्षणंभवति·अत्रैतावं
त्तिपदानिकिमर्थंग्राह्याणि·वचनंलक्षणमित्येवास्तु·एवंचेत्तर्हि-आकाशइतिवचनेऽतिव्याप्तिःआ
काशइतिवचनंवचनंभवतितत्किंलक्षणंलक्षणंनभवति·अतएवेऽतिव्याप्तिःप्राप्तातत्परिहा
रार्थंकिंपदमुपात्तंधर्मपदमुपात्तं·आकाशइतिवचनंयद्यपिवचनंभवतितथापिधर्मवचनं——
———नभवति·आकाशस्यावृत्तित्वेनधर्मत्वाभावात्·वृत्तिमान्पदार्थोधर्मइतिधर्मलक्षणलक्षि
तत्वाभावात्·आकाशइति——————धर्मवचनंलक्षणमित्येव——————दे प्रमेयत्वमितिव
चनेऽतिव्याप्तिःप्रमेयत्वमितिवचनंधर्मवचनंभवतिकथं·प्रमेयत्वधर्मःतद्वचनत्वात्·तत्ति— १९

————णंनभवतिअतस्तत्रातिव्याप्तिःप्राप्ता·तत्परिहारार्थंकिंपदमुपात्तं·——————————प्रमे
यत्वमितिवचनं——————वचनंभवतितथापिअसाधारणंधर्मवचनंनभवति·अतस्तत्रनाति——
———————नामतद्वृत्तित्वेसतितदितरावृत्तित्वं·यथाप्रमाणत्वंप्रमाणस्यअसाधारणोधर्मः·कथं·प्रमा
ण——————————तरप्रमेयादिष्ववृत्तित्वात्·नचप्रमेयत्वंतथा·तस्यप्रमाणावृत्तित्वेसतिप्रमेयादिष्ववृ
त्तेः·साधारणधर्म————————मितिवचनेनातिव्याप्तिःवचनपदत्यागेऽसंभवः·कथं·लक्षणात्मकं
शास्त्रंनामशब्दः·तस्यलक्षणत्वंतत्रासी————त्वंनास्ति·कथं·असाधारणधर्मोगंधः·सलक्षणात्म
कंशास्त्रंनामशब्दस्तद्रूपोनभवतितदर्थंवचनपदंगृहीतं·एवंसतिनासंभवः·कथं·गंधवतीपृथि

२०

वीतिशब्दः यद्यपि असाधारणधर्मो गंधः तद्रूपो यद्यपि न भवति· तथापि असाधारणधर्मवचनं भवति
कथं· असाधारणधर्मो गंधस्तत्प्रतिपादकत्वात्· ननु संपूर्णमपि लक्षणं अलक्ष्यैलक्ष्यैकदेशे— व्याप्तं·
कथं पृथिवी अयं पृथिव्या उद्देशः स चासाधारणो धर्मः पृथिवीत्वं तत्प्रतिपादकत्वात्· शब्दो लक्षणात्मको
पृथिवीत्युद्देशरूपस्य अतस्तत्रातिऽव्याप्तिरिति चेत्· तत्र समाधानं· लक्षतावच्छेदकातिरिक्तासाधा
रणधर्मप्रतिपादकः शब्दो लक्षणात्मकं शास्त्रस्य लक्षणं· एवं च पृथिवीत्युद्देशो नातिव्याप्तिः कथं लक्षता
वच्छेदकं पृथिवीत्वं तदतिरिक्तोऽसाधारणो धर्मो गंधस्तत्प्रतिपादकत्वाभावात् पृथिवीत्युद्देशस्य·
वदा पृथिवीत्ववती पृथिवीति लक्षणं तदा लक्ष्यतावच्छेदकं गंधवत्त्वं तदतिरिक्तोऽसाधारणो धर्मः पृथि २०

वीत्वं तत्प्रतिपादकत्वात्· पृथिवी पृथिवीत्ववतीति पृथिवीलक्षणस्येति नाव्याप्तिरिति तत्त्वं· यथा गोः
सास्नादिमत्त्वं लक्षणं· इति लक्ष्ये लक्षणं योजितं केशवमिश्रेण तन्न संभवति· कुतः असाधारणधर्म
स्य सास्नादेर्वचनत्वाभावात्· सास्नायाः द्रव्यत्वात्· तस्माद्यथा गोः सास्नादिमत्त्वं लक्षणं· इति वचनम
युक्तं· तत्र समाधानं· यथा गोः सास्नादिमत्त्वमिति वचनस्यान्यपरत्वात्· कथं· ननु कोऽसौ असाधा
रणो— तत्प्रतिपादकः शब्दो लक्षणमित्युच्यते इत्याशंकाः तत्रोत्तरं· यथा गोः सास्नादिमत्त्वमसाधा
रणो धर्मः तत्प्रतिपादकः शब्दः— सास्नादिमती गौः अयं शब्दः गोर्लक्षणमिति तद्ग्रंथस्यार्थः लक्षणा
न्तरं परिभाषायारुदिष्टत्वात्परिभाषा लक्षणमुक्तं· क— त्यपेक्षायां तत्रोक्तं· लक्षितस्य लक्षणमुपपद्य

२२

तेनवेतिविचारः परीक्षा कोऽर्थः यद्धर्मतावच्छेदकाक्रांतं तस्यतेनरूपेणलक्षणं वर्त्ततेनवेतिविचा
रः परीक्षा इतिकेशवमिश्रोक्तिरितिवदंति तन्न परिक्षायाः संशयत्वापत्तेः कथंलक्षितस्यलक्षण
मुपपद्यतेनवेतिकोटिद्वयविषयत्वात् परिक्षायाः यथास्थाणुर्वापुरुषोवेतिसंशयस्यकोटिद्वयवि
षयत्वं तद्वत् कोटिद्वयविषयत्वेनस---विशयत्वं नचपरीक्षायाः संशयरूपत्वमिष्टमेवेतिवाच्यं
परिक्षायाः निर्णयरूपत्वेनसंशयरूपत्वाभावात् वरंपरीक्षा------एवपरीक्षाशब्दप्रयोगा
त् तस्मात्संशयरूपत्वमशुद्धं तत्रसमाधानं परीक्षायाः संशयरूपत्वंनब्रूमः किंतुनिर्णयरू
पत्वमेव---कोटिद्वयविषयत्वेनिर्णयत्वानुपपत्तिः कोटिद्वयविषयत्वाभावात् परिक्षायाः २२

कोटिद्वयविषयत्वेनसंशयत्वंवक्तव्यं--तत्रनास्तिः कथंलक्षणार्थस्त्वेवं लक्षितस्य----पपद्य
तएवेतिविचारः परीक्षा इत्येकंलक्षणं लक्षितस्यलक्षणंनोपपद्यतेवे थैश्रा
चैतस्यनिर्णयरूपत्वेनपरीक्षात्वमितितत्वं लक्षणेनाप्येवेत्यादि
ह्याणि विचारः परीक्षा इत्येस्तुवो एवंचेत्तर्हिमूर्खविचारेऽतिव्याप्ति वं काकस्यकियंतो ।
स्यांडं कियत्फलं गर्दभस्यकियंत्लोमानि अयंमूर्खविचारः सविचारोनभवति सवि भवति
अतस्तत्रातिव्याप्तिः प्राप्ता तत्परिहारार्थंकिंपदमुपात्तं लक्षितस्यलक्षणमुपपद्यतएवेतिपद
मुपात्तं यद्या विचारोभवति तथापिलक्षितस्यलक्षणमुपपद्यतेवेतिविचारोनभवति

अतस्तत्रनातिव्याप्तिः येनकारणेनसूत्रकारेणसूत्रलिखनमात्रेणउद्देशः कृतः तेनकारणेनएतेलक्षण
परिक्षेप्रमाणादीनांतत्वज्ञानार्थंकर्त्तव्ये·तत्रषोडशपदार्थेषुमध्येतावदादौप्रमाणलक्षणमुच्यते·कु
तः·प्रमाणस्यप्रथमोद्दिष्टत्वात्·प्रथमोद्दिष्टत्वंकुतः·प्रथमतोलक्षणंकुतः·मानाधीनामेयसिद्धिर्मान
सिद्धिस्तुलक्षणात्·कोर्थः·मानाधीनानामाकोऽर्थः·प्रमाणाधीनाप्रमेयादिपदार्थानांसिद्धिरितिकृत्वा
प्रमाणलक्षणंप्रथमतः·कर्त्तव्यं·प्रमाणसिद्धिस्तुलक्षणेनेतिकृत्वाप्रमाणलक्षणमुक्तं·कथमित्यपे
क्षायांतत्रोक्तंप्रतिकरणंप्रमाणमिति·कोऽर्थः·प्रमायाः·यत्करणंतत्प्रमाणं·यथाचक्षुरिंद्रियंप्रमाणं·
कथं·घटोयमितियाप्रमाकोऽर्थः·यथार्थानुभवः·तस्यकरणंचक्षुरिंद्रियंइतिकृत्वाचक्षुरिंद्रियंप्रत्य २२

क्षप्रमाणं·अत्रलक्ष्यंकिंलक्षणंकिं·प्रमाणंलक्ष्यं·प्रमाकरणंलक्षणं·इतिकेशवमिश्रेणोक्तंतत्रसंभवति·
कुतः·लक्ष्यतावच्छेदकलक्षणयोरैक्यापत्तेः·लक्ष्यतावच्छेदकलक्षणयोर्भेदोवक्तव्यः·अन्यथाइतरभे
दसाधनसिद्धसाधनतास्यात्·कथं·प्रमाणमितरेभ्योभिद्यतेप्रमाकरणत्वात्·यत्रप्रमाकरणत्वंतत्रे
तरभेदः·इतिव्याप्तिग्रहसमयएवपक्षतावच्छेदकावच्छिन्नेसाध्यसिद्धिसंभवेसिद्धसाधनताप्रसंगः
पक्षतावच्छेदकावच्छिन्नेसाध्यसिद्धेर्ज्ञातत्वात्·अनुमितेरसाधारणोविषयः·पक्षतावच्छेदकसाध्यसा
मानाधिकरण्यंतच्चव्याप्तिग्रहसमयएवसिद्धं·प्रकृतेलक्षतावच्छेदकप्रमाकरणत्वस्यैवपक्षतावच्छे
दकत्वात्·तस्यैवहेतुत्वात्·पक्षतावच्छेदकसाध्यसामानाधिकरण्यंज्ञातमेवेतिसिद्धसाधनं·प्रकृते

२३

चप्रमाणत्वंलक्षतावच्छेदकं·प्रमाकरणत्वंलक्षणं·अनयोर्भेदोनास्ति·प्रमाणत्वप्रमाकरणत्वयो
रैक्यात्·तत्रसमाधानं·प्रमाणपदस्यवाच्यंलक्ष्यं·प्रमाकरणत्वंलक्षणं·तथाचलक्षतावच्छेदकंल
क्षणयोर्भेदसिद्धिः प्रमाणपदवाच्यत्वस्यलक्षतावच्छेदकत्वात्·प्रमाकरणत्वस्यलक्षणत्वात्·तथा
चलक्षतावच्छेदकलक्षयोर्भेदसिद्धिःलक्षणेतान्येवेत्यादिज्ञेयं·इदंप्रमाणस्यलक्षणंभवति·अत्र
एतावंतिपदानिकिमर्थंग्राह्याणि·करणंप्रमाणमित्येवास्तु·एवंचेत्तर्हिकुठारेऽतिव्याप्तिःकथं·कुठारः
छिदायाःकरणंभवतिसकिंप्रमाणंप्रमाणंनभवतिअतस्तत्रातिव्याप्तिःप्राप्ता॰तत्परिहारार्थंकिंपद
मुपात्तं·मापदमुपात्तं·यद्यपिकुठारःछिदायाःकरणंभवतितथापिमाकरणंनभवति·माशब्देनज्ञानं· २३

अतस्तत्रनातिव्याप्तिःमाकरणंप्रमाणमित्येवास्तु·एवंचेत्तर्हिकाचकामलादिदोषदुष्टचक्षुरिंद्रियेऽती
व्याप्तिःदोषदुष्टचक्षुःपीतःशंखःइतियामातस्याःकरणंतत्किंप्रमाणं·प्रमाणंनभवतिअतस्तत्रातिव्याप्तिः
प्राप्तातत्परिहारार्थंकिंपदमुपात्तं·प्रपदमुपात्तं·दोषदुष्टंचक्षुःयद्यपिपीतःशंखइतियामातस्याःक
रणं——तितथापिप्रमाकरणंनभवति·प्रमाशब्देनयथार्थज्ञानं·अतस्तत्रनातिव्याप्तिःनचदोषदुष्ट
चक्षुरिंद्रियंलक्ष्यमेवेति————त्वेनतस्यालक्ष्यत्वात्·निर्दुष्टचक्षुरिंद्रियस्यैवप्रमाकरणत्वेनलक्ष्य
त्वात्·करणपदत्यागेऽसंभवःकथंप्रमा   णत्वाभावात्·प्रमाणफलयोर्भेदात्·तदर्थंकरण
मित्युक्तं·एवंसतिनासंभवःप्रमायाःप्रमाणत्वाभावेति   रिंद्रियादेःप्रमाकरणत्वंवर्त्तते

२५
वेति· किमिदं नाम करणत्वं· व्यापारवत्त्वं उत्कृष्टत्वं वा असाधारणत्वं वा· फलायोगव्यवच्छिन्नत्वं वा नाद्य
ट तिव्याप्तेः कथं· घटेपि व्यापारवत्त्वं वर्त्तते· कथं· इंद्रियार्थसंनिकर्षो व्यापारः स यथा इंद्रिय
स्य· तथा घटस्यापि संयोगस्य द्विष्ठत्वात्· अतः संयोगरूपव्यापारवत्त्वात्· घटेऽतिव्याप्तेः न द्वितीयः
उत्कृष्टत्वं नाम प्रमाजननोत्कर्षवत्त्वं तच्च घटे वर्त्तत एव· घटोयमिति प्रत्यक्षप्रमायां घटस्यैव वि
षयत्वेन कारणत्वात्· कुतः लौकिकप्रत्यक्षे विषयस्य करणत्वाभ्युपगमात्· न तृतीयः उत्कृष्टत्वा
साधारणत्वयोः पर्यायत्वात्· तद्दूषणेनैव दूषितत्वात्तस्य· नापि चतुर्थः घटेऽतिव्याप्तिः कथं· ज्ञान
लक्षणायाः क्रियायास्तस्याः अयोगो नाम असंबंधः तद्रहितत्वं यथा चक्षुरिंद्रिये वर्त्तते· तथा घटे २५

पि घटस्यापि क्रियासंबंधित्वात्· तस्मादिदं प्रमाकरणं प्रमाणमिति लक्षणं न संभवति· अत्रोच्यते· ल 355
क्षणस्यायमर्थः यथार्थज्ञानकारणत्वे सति व्यापारवत्त्वे सति अनुभवत्वसाक्षाद्व्याप्यजात्यवच्छिन्नका
र्यतानिरूपितकारणताश्रयत्वं प्रमाणत्वं· कोऽर्थः यथार्थज्ञानस्य कारणं व्यापारवत्· अनुभवत्वसाक्षा
द्व्याप्याया जातिस्तदवच्छिन्नाया कार्यतातन्निरूपिताया कारणतातदाश्रयं प्रमाणमित्यर्थः यथा च
क्षुरिंद्रियं प्रत्यक्षप्रमाणं· कथं· घटोयमिति चाक्षुषं यथार्थज्ञानं तत्करणं भवति· घटस्य चक्षुरिंद्रि
यस्य च संनिकर्षस्तद्रूपव्यापारवच्च भवति· अनुभवत्वसाक्षाद्व्याप्याजातिः चाक्षुषत्वं तदवच्छिन्ना
या कार्यता सा घटोयमिति चाक्षुषज्ञाने वर्त्तते तन्निरूपिताया कारणतातदाश्रयत्वं च चक्षुरिंद्रिये वर्त्त

तेइतिकृत्वाचक्षुरिंद्रियंप्रमाणं· तथाअनुमानमपिप्रमाणं· एषांमतेलिंगमेवानुमानंतस्यलिंगपरामर्श
रूपव्यापारवत्वात्· ननुलिंगपरामर्शस्यानुमानत्वं· निर्व्यापारवत्वात्· व्यापारवत्करणमितिनियमाच्च·
तथाचलिंगमनुमानंतच्चानुमितिरूपयथार्थज्ञानकरणंभवति· अथचलिंगपरामर्शरूपव्यापारवद्भ
वति· अनुभवत्वसाक्षाद्व्याप्यायाजातिः अनुमितित्वंतदवच्छिन्नायाकार्यताअनुमितिनिष्ठातन्निरूपि
तायाकारणतातदाश्रयीभूतंलिंगंइतिकृत्वाअनुमानंप्रमाणं· तथाउपमानमपिप्रमाणं· कथंतद
पिउपमितिरूपंयथार्थज्ञानंतत्करणंभवति· अतिदेशवाक्यार्थस्मरणरूपव्यापारवद्भवति· अनु
भवत्वसाक्षाद्व्याप्यायाजातिरुपमितित्वंतदवच्छिन्नायाकार्यताउपमितिनिष्ठातन्निरूपितायाका २५

रणताउपमाननिष्ठातदाश्रयत्वमुपमानस्यवर्त्ततेइतिकृत्वाउपमानंप्रमाणं· तथाशब्दोपिप्रमाणंकथं·
यथार्थज्ञानंशाब्दज्ञानंतत्करणंभवतिशब्दः पदार्थस्मरणरूपव्यापारवान्भवतिअनुभवत्वसाक्षाद्व्या
प्यायाजातिः शाब्दत्वंतदवच्छिन्नायाकार्यताशाब्दज्ञाननिष्ठातन्निरूपितायाकारणताशब्दनिष्ठातदाश्र
यःशब्दोभवतिइतिकृत्वाशब्दः प्रमाणं· इदंचप्रमाणसामान्यलक्षणंप्रमाणचतुष्टयेवर्त्ततइतिकृत्वानकिं
चिदूषणं· ननुईश्वरेऽव्याप्तिः तस्यप्रमाश्रयत्वेनप्रमाणत्वात्· भवल्लक्षणस्यप्रमाकरणत्वस्यतत्राप्रवृत्तेः
ईश्वरप्रमायानित्यत्वेनतांप्रतिकरणत्वाभावात्ईश्वरस्य· नचईश्वरस्यप्रामाण्यमेवनेतिवाच्यं· नित्यप्र
माश्रयत्वेनतत्प्रामाण्यस्योदयनाचार्यैः कुसुमांजलौतन्मेप्रमाणंशिवइतिग्रंथेनतत्प्रामाण्यस्योक्तत्वा

दिति·अत्रोच्यते·नेदंप्रमाणसामान्यलक्षणंयेनईश्वरेऽव्याप्तिःस्यात्किंतुलौकिकप्रमाणस्यइदंलक्षणंत
च्चलौकिकप्रमाणमात्रेवर्त्ततेइतिपूर्वंप्रदर्शितं·ईश्वरस्यलौकिकप्रमाणत्वाभावेनालक्ष्यत्वान्नाव्याप्तिःप्र
माकरणंप्रमाणंचेल्लौकिकप्रमाणस्यलक्षणंतर्हिअलौकिकप्रमाणस्यकिंलक्षणमित्याशंकायांतत्रोच्य
ते·नित्यप्रमाश्रयःप्रमाणं·यथाईश्वरःप्रमाणं·नित्यायाप्रमाईश्वरप्रमातस्याआश्रयईश्वरोभवतिइति
ईश्वरअलौकिकप्रमाणं·लौकिकालौकिकसाधारणंलक्षणंत्विदं·साधनाश्रयान्योन्यत्वेसतिप्रमाव्या
प्तंप्रमाणमिलमतिप्रसंगेन·ननुपूर्वपक्षीआशंकते·प्रमायाःकरणंचेत्प्रमाणंतर्हितस्यफलंवक्तव्यं·
कुतःकरणस्यफलवत्त्वनियमात्·कथंनियमः·यद्यत्करणंतत्फलवदितिव्याप्तेः·यथाकुठारःकर २६

णंभवतितस्यछिदाफलमितिपूर्वपक्षः·अत्रसिद्धांतः·सत्यमित्यव्ययमर्द्धांगीकारे·करणंफलवदितिअंगी
कृतंफलंवक्तव्यमितिवांगीकृतं·कुतः·फलीभूतायाःप्रमायाःविद्यमानत्वात्·प्रमायाःफलत्वंनामकर
णसाध्यत्वं·यथास्वर्गस्यकरणीभूतज्योतिष्टोमसाध्यत्वेनफलत्वंतद्वत्प्रकृतेपि·प्रमायाःकरणीभूतप्र
माणसाध्यत्वेनफलत्वमितितत्वं·घटकपदार्थज्ञानव्यतिरेकेणघद्धपदार्थज्ञानाभावात्इतिन्यायेनप्र
माज्ञानंविनाप्रमाघटितप्रमाणलक्षणंनसंभवतितदर्थंप्रमालक्षणमुक्तं·कथमित्यपेक्षायांतत्रोक्तं·य
थार्थानुभवःप्रमा·कोऽर्थः·यथार्थेतिइतितत्प्रकारकएवंभूतोयोऽनुभवःसाप्रमा·यथाघटोयमित्य
नुभवःप्रमा·कथंघटत्ववतिघटेघटत्वप्रकारकोऽनुभवोभवतीतिकृत्वाप्रमा·अत्रप्रमालक्ष्या·यथा

र्थानुभवइतिलक्षणंलक्षणोत्थापितान्येवेत्यादिबोध्यं· इदमपिप्रमालक्षणंभवतिअत्रैतावंतिपदानिकिं
मर्थंग्राह्याणि· अनुभवःप्रमाइत्येवास्तु· एवंचेत्तर्हिस्थाणुर्वापुरुषोवेतिसंशयेपीतःशंखइतिविपर्यये
वह्न्यभावेधूमोनस्यादितितर्केचातिव्याप्तिःएतेह्यनुभवाःभवंतितेकिंप्रमाप्रमानभवंति· अतस्तत्राति
व्याप्तिःप्राप्ता· तत्परिहारार्थंकिंपदमुपात्तं· यथार्थेतिपदमुपात्तं· यद्यपिसंशयविपर्ययतर्काःअनुभवा
भवंति· तथापियथार्थानुभवानभवंति· अतस्तत्रनातिव्याप्तिःयथार्थोप्रमाइत्येवास्तु· एवंचेत्तर्हिसघ
टइतियास्मृतिःतस्यामतिव्याप्तिःसायथार्थाभवति· साकिंप्रमा· साप्रमानभवति· अतस्तत्रातिव्याप्तिः
प्राप्तातत्परिहारार्थंकिंपदमुपात्तं· अनुभवेतिपदमुपात्तं· स्मृतिर्यद्यपियथार्थाभवतितथाप्यनुभ २७

वोनभवतिकुतःअनुभवोनामस्मृतिव्यतिरिक्तंज्ञानं· स्मृतेःस्मृतिव्यतिरिक्तत्वाभावान्नातिव्याप्तिःननु
स्मृतेरपिस्मृतिव्यतिरिक्तत्वंवर्त्ततएव· कथं· घटस्मृतेरपिपटःस्मृत्यपेक्षयाव्यतिरिक्तत्वात्· स्मृतावति
व्याप्तिःस्यादेव· तत्रसमाधानं· स्मृतिव्यतिरिक्तत्वंनामस्मृतित्वानधिकरणंज्ञानंस्मृतेःस्मृतित्वानधिकर
णत्वाभावात्· नातिव्याप्तिःस्मृतित्वानधिकरणमनुभवइत्येवास्तु· एवंचेत्तर्हिघटेऽतिव्याप्तिःघटःस्मृ
तित्वानधिकरणंभवति· सकिमनुभवःसअनुभवोनभवति· अतस्तत्रातिव्याप्तिःप्राप्तातत्परिहारार्थं
किंपदमुपात्तं· ज्ञानपदमुपात्तं· घटोयद्यपिस्मृतित्वानधिकरणोभवतितथापिज्ञानंनभवतिकुतःघ
टस्यद्रव्यत्वात्· ज्ञानस्यगुणत्वात्· गुणगुणिनोर्भेदात्· नतत्रातिव्याप्तिःस्मृतिर्नामका· संस्कारमात्रजं

ज्ञानंस्मृतिः यथासामेमाता इयंस्मृतिः संस्कारमात्रजाभवति· कथंइयंमाता इतिअनुभवोजातः तेनजनितः
संस्कारः तन्मात्रजत्वंवर्त्तते· सामेमाताइतिस्मृतौ॰ इतिलक्षणेलक्षणंयोजितं· मात्रपदत्यागेसोयंदेवदत्त
इतिप्रत्यभिज्ञायामतिव्याप्तिः सासंस्कारजाभवति· साकिंस्मृतिः सास्मृतिर्नभवति· अतस्तत्रातिव्याप्तिः
प्राप्ता· तत्परिहारार्थंकिंपदमुपात्तंमात्रपदमुपात्तं· प्रत्यभिज्ञायद्यपिसंस्कारजाभवतितथापिसंस्कार
मात्रजानभवति· किंतुसंस्कारसंयोगाभ्यांजायमानत्वान्नातिव्याप्तिः यथार्थानुभवः प्रमाइदंलक्षणंन
संभवतिकुतः यथार्थस्तथानुभवोयथार्थानुभवः अनयाव्युत्पत्त्या अनुभवेअर्थसादृश्यमुक्तं· तत्रवि
चार्यते· यत्किंचिदर्थसादृश्यंवासर्वथाअर्थसादृश्यंवा· नाद्यः इदंरजतमितिभ्रमेतिव्याप्तेः कथंत २८

२६ त्राद्यर्थोनामशुक्तिकास्तस्याः सादृश्यंयत्किंचित्प्रमेयत्वरूपंवर्त्ततेइदंरजतमितिज्ञानस्यतस्यापिप्रमेयत्वं
स्यात्· नद्वितीयः यद्यपिभ्रमरूपज्ञानेसर्वथाअर्थसादृश्याभावः कथं· अर्थः शुक्तिका· तस्याः सादृश्यंशुक्ति
त्वंतच्चभ्रमरूपेज्ञानेनास्तीतिनातिव्याप्तिः तथापिप्रमायांघटोयमित्याकारिकायांअव्याप्तिः स्यादेव· कथं·
अर्थोघटस्तस्यसादृश्यंघटत्वंतच्चघटज्ञानेनास्ति· घटज्ञानेघटत्वाभावात्· तस्माद्यथार्थानुभवः प्रमेतिल
क्षणमसंगतं· अत्रोच्यते· तद्वतितत्प्रकारकोनुभवः प्रमेतिलक्षणंकेचिद्वदन्ति एवंचभ्रमेनातिव्याप्तिः त
२६ त्ररजतत्ववतिरजतत्वप्रकारकत्वाभावात्· किंतुरजतत्वाभाववतिशुक्तिकाशकलेरजतत्वप्रकारकत्वा
त्· एवंचघटोयमितिप्रमायांनाव्याप्तिः तत्रघटत्ववतिघटेघटत्वप्रकारकानुभवत्वस्यसत्त्वात्· इ

२९

तिप्रमालक्षणं केचित्तदुक्तं तन्न संभवति· आकाशे आकाशत्वमिति प्रमायामव्याप्तेः कथं· अत्राकाशत्ववि
शेष्यं आकाशं विशेषणं नाम प्रकारः तथा च तद्वतीति कोऽर्थः आकाशवति आकाशत्वे आकाशप्रकारकोऽ
नुभवो वक्तव्यः स च न संभवति· आकाशत्वे आकाशाभावात् अव्याप्तिः किंच लोहितस्फटिक इति ज्ञानं
साक्षात्संबंधेन प्रमा स्यात्· कथं· तद्वतीति कोऽर्थः परंपरासंबंधेन लौहित्यवति स्फटिके लौहित्यप्रकार
कानुभवत्वात्· लोहितः स्फटिक इति ज्ञानेऽतिव्याप्तिः किंच इदं रजतमिति भ्रमेऽतिव्याप्तिश्च· कथं· ए
तस्मिन्ज्ञाने शुक्तिका विशेष्या रजतं विशेषणं रजते रजतत्वं विशेषणं तथा चेदं रजतमिति ज्ञानस्य रजतां
शे रजतत्ववति रजतत्वप्रकारकत्वात्· इदं रजतमिति भ्रमेऽतिव्याप्तिः अत्र मुख्यः सिद्धांतः यत्र विशेष्ये २९

३०

यस्य प्रकारस्य संबंधो वर्त्तते तद्विशेष्यकस्तत्प्रकारकस्तत्संबंधावगाह्यनुभवः प्रमा· इति प्रमालक्षणं प
र्यवसन्नं· इदं च लक्षणं घटोयमिति प्रमायां वर्त्तते कथं· यत्र विशेष्ये घटे यस्य प्रकारस्य घटत्वस्य समवा
यसंबंधो वर्त्तते तद्विशेष्यको नाम घटविशेष्यकः घटत्वप्रकारकः घटत्वसंबंधावगाही अनुभवो भवति
इति कृत्वा इयं प्रमा· एवं चाकाशे आकाशत्वं इति प्रमायां नाव्याप्तिः कथं· यद्य विशेष्ये आकाशत्वे यद्यपि
आशौ को नास्ती तथापि आकाशसंबंधो वर्त्तते· कथं· आकाशत्वे आकाशसंबंधो वर्त्तते एवं· आका
शसंबंधस्योभयनिष्ठत्वात्॥ तथा च विशेष्ये आकाशत्वे यस्य प्रकारस्याकाशस्य संबंधो विद्यते तद्विशे
ष्यको नाम आकाशत्वविशेष्यकः आकाशप्रकारकः आकाशसंबंधावगाही अनुभवो भवति इति कृ

त्वात् आकाशे आकाशत्वमिति प्रमायां नाव्याप्तिः एवं च लोहितः स्फटिक इति भ्रमे नातिव्याप्तिः तस्य लो
हित्यसामान्यसंबंधावगाहित्वाभावात्· एवं चेदं रजतमिति भ्रमे नातिव्याप्तिः तत्र यत्र विशेष्ये शुक्त्या
दौ यस्य प्रकारस्य रजतत्वस्य संबंधो विद्यते इति वक्तव्यं तन्न संभवति शुक्त्यादौ रजतत्वसंबंधाभावात्·
रजते रजतत्वसंबंधे विद्यमानेपि इदं रजतमिति ज्ञाने रजतत्वस्य विशेष्यत्वाभावात्· विशेषणत्वे
नैव भावात्· शुक्तिकाया विशेष्यत्वात्· तथा चेदं रजतमिति ज्ञाने नातिव्याप्तिः प्रमाकरणं प्रमाण
मित्यत्र करणशब्दार्थः पुनः आह· तत्रोत्तरं· साधकतमं करणं तमेवार्थमाह अतिशयितं साधकं सा
धकतमं प्रकृष्टकारणं· तु तु साधककारणयोः पर्यायत्वात्· साधकज्ञानमेव नास्ति तस्याप्रसि

द्धत्वात्· कुंभोदरं नाम तिकुंभतुल्यौ मितिवत्· तत्रोच्यते· यस्य कार्यात्पूर्वभावो नियतः अनन्यथासिद्ध
श्च तत्कारणं· यथा दंडस्य घटं प्रति कारणता· कथं· यस्माद्दंडस्य कार्यात् घटलक्षणकार्यात्पूर्वभावो
नियतो वर्त्तते दंडे विद्यमाने पश्चाद्घटोत्पत्तेर्जायमानत्वात्· अनन्यथासिद्धो नाम त्रिविधान्यथासिद्धि
शून्यश्चेति कृत्वा दंडः घटं प्रति कारणं· यावत्पर्यंतमन्यथासिद्धिर्न ज्ञाता तावदन्यथासिद्धिशून्यत्वं
ज्ञातुं न शक्यते तेन तदर्थमन्यथासिद्धित्रयमुच्यते· यं पुरस्कृत्य यस्य पूर्वभावोवगम्यते तत्तेनान्यथासि
द्धं· यथा तंतुरूपं पटेऽन्यथासिद्धं· कथं· यं तंतुं पुरस्कृत्य यस्य तंतुरूपस्य पूर्वभावोवगम्यते पटं प्र
ति तत्तंतुरूपं तेन तंतुना अन्यथासिद्धमित्येका· एकं प्रति पूर्ववर्त्तित्वे गृहीत एवापरं प्रति पूर्ववर्त्तित्वं

३१

गृह्यते तत्तेनान्यथासिद्धं · यथा · आकाशः घटेऽन्यथासिद्धः कथं · शब्दं प्रति पूर्ववर्त्तित्वे गृहीते एव अपरं
घटं प्रति पूर्ववर्त्तित्वं गृह्यते · कुतः आकाशसिद्धिः शब्दादिना कथं · शब्दसमवायिकारणत्वेनैवाकाशस्य ता२
सिद्धिः तथा च शब्दसमवायिकारणमाकाशमित्युक्ते शब्दापेक्षया पूर्ववर्त्ति आकाशमिति ज्ञातं तथा च
शब्दं प्रति पूर्ववर्त्तित्वे गृहीत एव घटं प्रति पूर्ववर्त्तित्वं गृह्यते आकाशस्य तदाकाशं तेन शब्देनान्यथा
सिद्धमित्यपरा · अन्यत्र क्लृप्तनियतपूर्ववर्त्तिन एव कार्यसंभवे तत्सहभूतमन्यथासिद्धं · यथा · रसप्राग
भावः रूपेऽन्यथासिद्धः कथं · एकस्मिन्कस्मिंश्चिद्घटे पाको नाम तेजःसंयोगविशेषः तेन रूपरूपंरस
गंधस्पर्शा जायंते तत्र चतुर्णामपि प्रागभावाः संति ते च नियतपूर्ववर्त्तिनः तेषां मध्ये त्रयाणां रसादि ३२

प्रागभावानां रूपं प्रति कारणता स्यात् नियतपूर्ववर्त्तित्वात् · तत्रोत्तरं · तेषामन्यथासिद्धत्वात् कथं · यत्र घटे ए
कमेव रूपमुत्पन्नं तत्र रूपे रूपप्रागभावस्य कारणत्वं क्लृप्तं तद्रूपापेक्षया नियतपूर्ववर्त्तित्वात् · प्रकृते च ·
यत्र पाकेन रूपोत्पत्तिर्जायते तत्र रूपप्रागभावस्यैव रूपं प्रति कारणत्वं तत्सहचरिता रसादिप्रागभावा अ
न्यथासिद्धाः तत्र रूपप्रागभावेनैव रूपोत्पत्तिसिद्धेरिति तृतीया · एतत्त्रितयान्यथासिद्धिशून्यत्वमनन्यथा
सिद्धित्वमित्यर्थः तथा चेत्थं लक्षणं · यदनन्यथासिद्धनियतपूर्वभावि तत्कारणं · कारणलक्षणं · अनन्यथा
सिद्धनियतपूर्वभावीदं लक्षणं · लक्षणेतान्येवेत्यादि ज्ञेयं · इदमपि कारणस्य लक्षणं भवति · अत्रैता
वेति पदानि किमर्थं ग्राह्याणि · पूर्ववर्त्तिकारणमित्येवास्तु · एवं चेत्तर्हि दिवादागतरासभेतिव्याप्तिः तस्या

३२
पिघटापेक्षया पूर्ववर्त्तित्वात्· अतस्तत्रातिव्याप्तिः प्राप्ता तत्परिहारार्थं किंपदमुपात्तं नियतपदमुपात्तं
रासभः यद्यपि पूर्ववर्त्ती भवति तथापि नियतपूर्ववर्त्ती न भवत्यतस्तत्र नातिव्याप्तिः नियतपूर्ववर्त्ति कार
णमित्येवास्तु· एवं चेत्तर्हि तंतुरूपेऽतिव्याप्तिः तंतुरूपं पटापेक्षया नियतपूर्ववर्त्ति भवति तत्किं कारणं
तत्कारणं न भवति अतस्तत्रातिव्याप्तिः प्राप्ता तत्परिहारार्थं किंपदमुपात्तं· अनन्यथासिद्धमिति पदं तं
तुरूपं यद्यपि नियतपूर्ववर्त्ति भवति तथाप्यनन्यथासिद्धं न भवति तस्यान्यथासिद्धत्वात्· तत्र कान्य
थासिद्धिः यं पुरस्कृत्येत्यादि यं तंतुरूपं पुरस्कृत्य यस्य तंतुरूपस्य पूर्वभावोऽवगम्यते तत्तंतुरूपे
तेन तंतुनाऽन्यथासिद्धं· अनन्यथासिद्धं कारणमित्येवास्तु· एवं चेत्तर्हि तंतोर्घटकारणत्वं स्यात्· तंतो ३२

रनन्यथासिद्धत्वात्· तदर्थं नियतपूर्ववर्त्तीति पदमुपात्तं तंतोः घटापेक्षया नियतपूर्ववर्त्तित्वाभावात् ना
तिव्याप्तिः नन्विदं लक्षणमरण्यस्थदंडेऽव्याप्तं· कथं· कारणता द्विविधा· फलोपहिता· स्वरूपयोग्यतारू
पा च· तत्रारण्यस्थदंडे स्वरूपायोग्यतारूपकारणतायाः सत्वात्· तत्र दंडे घटापेक्षया नियतपूर्ववर्त्तित्वा
भावात्· दंडमात्रं लक्ष्यं· तस्यैकदेशोऽरण्यस्थो दंडः तत्र घटापेक्षयानन्यथासिद्धति नियतपूर्ववर्त्ति
त्वलक्षणं कारणलक्षणं तत्र कारणैकदेशेऽरण्यस्थदंडे नास्तीति कृत्वाऽव्याप्तिः किंच· इदं कारणसामा
न्यलक्षणमुत विशेषलक्षणं· नाद्यः कारणलक्षणस्य सर्वपदानां व्यर्थतापत्तेः पूर्ववर्त्ति कारणमित्ये
वसामान्यलक्षणं· न च रासभेऽतिव्याप्तिरिति वाच्यं· तस्यापि स्वपुत्रं प्रति कारणत्वात्· स्वगतरूपं प्रति

कारणत्वाच्च·नद्वितीयःसामान्यलक्षणंविनाविशेषलक्षणायोगात्इतिचेन्न·एतस्यकारणविशेषल
क्षणत्वात्·नचकारणसामान्यलक्षणंविनाविशेषलक्षणंनसंभवतीत्युक्तमितिवाच्यं·पारिमांडिल्य
भिन्नत्वेसतिवस्तुमात्रंकारणमितिकारणसामान्यलक्षणस्योदयनाचार्यैरुक्तत्वात्·तच्चात्रज्ञेयं·इदंच
कारणविशेषलक्षणं·अतएवानन्यथासिद्धादिपदानांसार्थकता·घटकारणलक्षणेक्रियमाणे
रासभादीनांपूर्ववर्त्तित्वेपिघटंप्रतिकारणत्वाभावात्·अतिव्याप्तिपरिहारार्थंनियतादिपदानिसार्थ
कानि·नचैतस्यलक्षणस्यकारणविशेषलक्षणत्वेऽरण्यस्थदंडेऽव्याप्तिरित्युक्तमितिवाच्यं·कार्यनि
यतपूर्ववर्त्तिजातीयत्वस्यविवक्षितत्वात्·कथं·कार्योघटस्तदपेक्षयानियतपूर्ववर्त्तीग्रामस्थोदं ३३

डःतज्जातीयत्वंनामग्रामस्थदंडनिष्ठायाजातिर्दंडत्वंतद्वत्वंअरण्यस्थदंडेवर्त्ततेइतिकृत्वानाव्याप्तिः·ननुए
वंचेत्तर्हिशब्दंप्रतिआकाशस्यकारणत्वंनस्यात्·एकव्यक्तिकत्वरूपजातिबाधकसत्वेनाकाशेजात्यभावेन
कार्यपूर्ववर्त्तिजातीयत्वस्याकाशेऽभावात्शब्दंप्रतिकारणतानस्यात्इतिचेन्न·कार्यनियतपूर्ववर्त्तिताव
च्छेदकधर्मवत्वस्यविवक्षितत्वात्·कार्यःशब्दस्तंप्रतिनियतपूर्ववर्त्तितावर्त्ततेआकाशेतस्यावच्छेदकोध
र्मःआकाशत्वंतद्वत्वंवर्त्ततेआकाशेइतिकृत्वाआकाशस्यशब्दंप्रतिकारणतास्यादेवेतिविस्तरस्तुलीलाव
तिवर्धमानेद्रष्टव्यः·बालव्युत्पत्तिप्रयोजनत्वान्न्यायसंग्रहस्येतिकृत्वाअत्रविस्तराभावइतिद्रष्टव्यं·का
रणलक्षणंकार्यघटितं·कथं·यस्यकार्यात्पूर्वभावोनियतइतितत्रकार्यलक्षणव्यतिरेकेणकारणल

क्षणंज्ञातुंनशक्यतेइतिकृत्वाकार्यलक्षणमुक्तं·कथमित्यपेक्षायांतत्रोक्तं·अनन्यथासिद्धनियतप
श्चाद्भावित्वं·कोऽर्थः अनन्यथासिद्धात्नियतःपश्चाद्भावोयस्यतदनन्यथासिद्धनियतपश्चाद्भावि
तत्कार्यं·यथाघटः अनन्यथासिद्धदंडात्नियतपश्चाद्भावोविद्यतेघटस्येतिकृत्वादंडकार्यताघट
स्य·पश्चाद्भावित्वंकार्यत्वमित्युच्यमानेरासभापेक्षयापश्चाद्भाविनिघटेऽतिव्याप्तिःतदर्थंनियतेतिप
दमुपात्तं·घटेरासभापेक्षयानियतपश्चाद्भावित्वाभावात्तस्मान्नातिव्याप्तिःतावन्मात्रोक्तौतंतुरूपा
पेक्षयानियतपश्चाद्भाविनिपटेऽतिव्याप्तिःपटस्यापिरूपकार्यत्वंस्यात्· तदर्थमनन्यथासिद्धनि
यतपश्चाद्भावित्वमुक्तं·तंतुरूपस्यानन्यथासिद्धत्वात्·कथंयंपुरस्कृत्येत्यादिअन्यथासिद्धेर्वि २४

द्यमानत्वात्·कथंयंतंतुंपुरस्कृत्ययस्यतंतुरूपस्यपूर्वभावोऽवगम्यतेपटंप्रतितत्तंतुरूपंतेनतंतुनान्य
न्यथासिद्धं·तन्तुरूपस्यपटरूपेकारणत्वात्·नपटे पटंप्रत्यपिकारणत्वेकल्पनागौरवात्·लाघवापे
क्षयागौरवस्याप्रामाण्यत्वात्·तदुक्तंग्रंथांतरे·कल्पनागौरवंयत्रतंपक्षंनसहामहे·कल्पनालाघवंय
त्रतंपक्षंरोचयामहे·अन्येनकेनचित्कारणलक्षणमुक्तं·कथं·कार्यानुकृतान्वयव्यतिरेकीकारणमिति
कोऽर्थःकार्येणानुकृतौनिरूपितौअन्वयव्यतिरेकौतौविद्येतेयस्यतत्कार्यानुकृतान्वयव्यतिरेकितत्कार
णं·यथाघटलक्षणकार्येणानुकृतौअन्वयव्यतिरेकौकीदृशौ·दंडसत्त्वेघटसत्त्वंदंडाभावेघटाभावःएता
दृशौविद्येतेदंडस्येतिकृत्वादंडःकारणं ननुइदमन्वयव्यतिरेकयोःस्वरूपमेवनभवति·कुतःदंडसत्त्वे

३५

घटसत्वेनन्नास्ति· चक्रादिविरहिते भूतले दंडसत्वे घटसत्वाभावात्· इति कृत्वा अन्वयो न भवति· नापिव्य
तिरेकः संभवति· दंडाभावे घटाभाव इति वक्तव्यं· तन्न संभवति· घटवति भूतले दंडाभावे विद्यमानेपि
घटाभावाभावात्· तत्र घटस्यैव विद्यमानत्वात्· तस्मादिदमन्वयव्यतिरेकयोः स्वरूपमनुपपन्नं· अ
त्रोच्यते· स्वस्वव्याप्येतरसकलसंपन्नौ सत्यां तत्सत्वे तत्सत्वं· तद्व्यतिरेके तद्व्यतिरेकः यथा दंडस्य घटं प्र
ति कारणस्यैतं· कथं· स्वशब्देन दंडः स्वव्याप्यो नाम दंडव्याप्य संयोगः तदितरसकलकारणसमवधा
नेको ऽर्थः चक्रचीवरकुलालादिसमवधाने सति दंडसत्वे घटसत्वं दंडाभावे घटाभावः इदं दंडस्य
कारणत्वं· ननु दंडसंयोग कथं दंडव्याप्यः इति चेन्न· व्याप्यता द्विविधा कालीकी दैशिकी चेति· य ३५

यत्र देशे धूमः तत्र देशे वह्निरिति दैशिकी व्याप्तिः यस्मिन्काले धूमः तस्मिन्काले वह्निरिति कालिकी व्याप्तिः क
थं यस्मिन्काले दंडसंयोगः तस्मिन्काले दंड इति कालिकव्याप्तेः सत्वात्· दंडसंयोगस्य न दंडव्याप्यत्वं तस्मात्का
र्येनुकृतान्वयव्यतिरेकीत्यादिके न चिह्नलक्षणं कृतं तन्न· दंडश्चसंयोगस्य दंडेन सह कालिकी व्याप्तिः ।। नित्ये व्या
पके च व्योम्नि अव्याप्तेः कथं· आकाशस्य शब्दं प्रति अन्वयव्यतिरेकाभ्यां कारणता वाच्या· तत्र यद्यप्याकाशस
त्वे शब्दसत्वमित्यन्वयः संभवति· तथाप्याकाशाभावे शब्दाभाव इति व्यतिरेको वाच्यः स च न संभवति· आका
शव्यतिरेकीसिद्धेः कथं आकाशव्यतिरेकस्स द्वेधा वक्तव्यः कालिको दैशिकश्च· तत्राकाशस्य नित्यत्वेन का
लिकव्यतिरेकाभावात्· अस्मिन्काले आकाशो नास्तीति प्रतीत्यसिद्धेः नापि दैशिको व्यतिरेकः आकाशस्यत

३६
स्वव्यापकतयासकलदेशावृत्तित्वेनदैशिकव्यतिरेकाभावात्· अस्मिन्देशेआकाशोनास्तीतिप्रतीत्ये
रसिद्धेः तस्मात्स्वोक्तमेवकारणलक्षणंनिरवद्यं· तच्चकारणंत्रिविधं· समवाय्यसमवायीतिनिमित्तभे
दात्· समवायीकारणस्यप्रथमोद्दिष्टत्वात्· समवायीकारणलक्षणमुच्यते· यत्समवेतंकार्यमुत्प
द्यतेतत्समवायीकारणं· कोऽर्थः यत्समवायसंबंधेनकार्यमुत्पद्यतेतत्समवायीकारणं· यथातंत
वः पटस्यसमवायिकारणं· कथं· तंतुषुपटः समवायसंबंधेनो'दृतिकृत्वातंतवः पटस्यसमवायी
कारणंतत्वादि· अत्रलक्षणद्वयंबोध्यं· कथं· यत्समवेतंकार्यंतत्समवायीकारणं· अथवायवेत
मुत्पद्यतेतत्समवायीकारणं· अन्यथाकार्यपदवैयर्थ्यप्रसंगात्· उत्पद्यतेइत्यनेनैवतस्यलाभात्· ३६

अतोलक्षणद्वयमुक्तं· लक्षणेपदकृत्यानि· कार्यंतत्समवायीकारणमित्येवास्तुएवंचेत्तर्हिरूपेतिव्याप्तिः
रूपंघटस्यकार्यंभवतितत्किंसमवायीकारणंसमवायीकारणंनभवतिअतस्तत्रातिव्याप्तिवारणार्थंयत्स
मवेतेतिपदमुपात्तं· रूपेसमवेतकार्याभावात्· रूपस्यगुणत्वात्· कार्यपदत्यागेतंतुत्वेतिव्याप्तिः कथंतं
तुत्वंतंतुसमवेतंभवतितत्किंसमवायिकारणंसमवायिकारणंनभवति· अतस्तत्रातिव्याप्तिः प्राप्तातत्प
रिहारार्थंकार्यपदमुपात्तं· तंतुत्वंयद्यपियत्समवेतंभवतितथापिकार्यंनभवतितस्यजातित्वेनकार्यत्वा
भावात्· नातिव्याप्तिः नन्विदंलक्षणंप्रथमक्षणावच्छिन्नेघटेऽव्याप्तं· तस्यप्रथमक्षणेसमवायिकारण
त्वेनतत्समवेतकार्याभावात्· ननुकार्ययोग्यताविवक्षिता· कोऽर्थः यदाकदाचित्कार्यवत्त्वंतस्यद्वितीय

३८

लक्षणेकार्यसत्वान्नाव्याप्तिरितिचेन्न· उत्पन्नविनष्टघटेऽव्याप्तिः तत्रकालत्रयेपिकार्याभावात्· अत्रोच्य
ते· स्वसमवेतकार्यजनकतिष्ठसत्तासाक्षाद्व्याप्याजातिःद्रव्यत्वं· तद्वत्वंप्रथमक्षणावछिन्नस्योत्प
न्नविनष्टस्यघटस्यवर्त्ततेइतिकृत्वानोभयत्राव्याप्तिः ननुतंतुनासहयथापटस्यसंबंधस्तथातुर्यापिसंबं
धःएवंसतितंतवएवसमवायिकारणंपटस्यनतुर्यादिरितिकथमितिचेन्न· यद्यपिसंबंधःसमानस्तथा
पिसंबंधभेदात् तंतुनासहपटस्यसमवायःसंबंधःउभयोरयुतसिद्धत्वात्· तुर्यासहसंयोगःपटस्यतु
रीपटयोरयुतसिद्धत्वाभावात्· कथमयुतसिद्धत्वाभावःअयुतसिद्धलक्षणानाक्रांतत्वात्· अयुत
सिद्धलक्षणंचेदं· ययोर्द्वयोर्मध्येएकमनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ· यथा· अवय ३७

वास्तंतवःअवयवीपटः घटरूपंगुणः गुणीघटः क्रियाघटनिष्ठा· क्रियावान्घटः घटत्वंजातिःघटोव्य
क्तिः विशेषपदार्थानित्यद्रव्याणिवेत्यादयोअयुतसिद्धाःएतेषांसंबंधःसमवायः कुतःअवयव्यादिनाम
वयवाद्येषुनियमेनाश्रितत्वात्· अविनश्यदवस्थापन्नानां विनश्यदवस्थापन्नाअनाश्रिताएवावति
ष्ठंतेयथातंतुनाशेसतिपटः यथावाआश्रयनाशेसतिगुणः अवयवावयविनोरिवतुरीपटाश्रितै
वावतिष्ठतेनापिपटस्तुर्याश्रितअवतिष्ठते· अतस्तयोःसंयोगएवसमवायाभावादेवपटस्यतुर्यादि
षुसमवेतत्वाभावःअतस्तंतुषुपटःसमवायसंबंधेनोत्पद्यतेतंतवएवपटस्यसमवायिकारणंनतु
र्यादीतिसिद्धं· तदुक्तंग्रंथांतरे· तावेवायुतसिद्धौद्वौविज्ञातव्यौययोर्द्वयोः अनश्यदेकमपराश्रितमे

३८

वावतिष्ठते· अयुतसिद्धानाह अवयवावयविनौ· गुणगुणिनौ· क्रियाक्रियावंतौ· जातिवक्ति· विशे
षनित्यद्रव्येचेति· अतस्तंतुपटयोरवयवावयवित्वात्· तंतुसमवेत एवपटः यत्समवेतंकार्यमुत्प
द्यतेतत्समवायिकारणं अतस्तंतव एवपटस्यसमवायिकारणंनतुर्यादि· एवंकपालमालाघटस्य
समवायिकारणंघटस्यतत्रसमवेतत्वात्· घटश्चस्वगतरूपादेः समवायिकारणं· घटेरूपस्यसमवे
तत्वादित्यादिज्ञेयं· विनश्यत्ताज्ञानव्यतिरेकेणाविनश्यंत इतिज्ञातुंनशक्यते इतिकृत्वाविनश्यता
लक्षणमाह· विनाशकारणसामग्रीसांनिध्यं· विनश्यतालक्ष्मा· विनाशकारणसामग्रीसानिध्यं
लक्षणं· लक्षणेतान्येवेत्यादिज्ञेयं· इदमपिविनश्यतायालक्षणंभवति· अत्रैतावंतिपदानिकि

३८

मर्थंग्राह्याणि· सांनि— विनश्यत्ताइत्येवास्तु· एवंचेत्तर्हिघटपटसांनिध्येऽतिव्याप्तिः तदर्थंकारणेतिप
दमुपात्तं· घटपटसांनिध्यंकारणसांनिध्यंभवति· इतिकृत्वानातिव्याप्तिः तावत्युक्ते उत्पत्तिकारणसांनि
ध्येऽतिव्याप्तिः तदपिकारणसांनिध्यंभवतिततोवक्तिविनाशे— स्योत्पत्तिकारणत्वेन विनाशकारणता
भावात्· तत्सांनिध्येनातिव्याप्तिः यत्किंचित्विनाशकारणसांनिध्येऽतिव्याप्तिवारणार्थंसामग्रीपदमि
तिमंतव्यं· सामग्रीपदस्यसकलकारणवाचित्वेन यत्किंचित्कारणसांनिध्यस्यसामग्रीत्वाभावात्ना
तिव्याप्तिर्भवति· ननुघटरूपस्यघटसमवायिकारणमित्युक्तंतन्नसंभवति· उभयोरेकदैवोत्पत्तेः
पूर्वापर्याभावात्· सव्येतरगोविषाणवत्कार्यकारणभावाभावात्· अतः घटः नस्वगतरूपस्य

२९

समवायिकारणं कारणत्वाभावे तद्भिन्नोऽसमवायिकारणत्वस्य सुतरामभावः अत्रोच्यते· घटतज्ज
तद्रूपादेर्नैकदोत्पत्तिः किन्तु द्रव्यं प्रथममुत्पद्यते पश्चाद्गुणोत्पत्तिः समानकालोत्पत्तौ गुणगुणिनोः स
मानसामग्रीकत्वात् भेदो न स्यात्· ननु गुणगुणिनोः समानसामग्रीकत्वमस्ति कुतः· गुणप्रागभावो गुण
सामग्री· गुणिप्रागभावो गुणिनः सामग्री प्रागभावयोर्भेदात् सामग्रीभेदः नच सामग्रीकत्वं नाम समान
समवायिकारणत्वं घटरूपयोः समवायिकारणं कपालमेवेति नोक्तदोष इति वाच्यं· तथा सति रूपरस
योर्भेदो न स्यात्· एकस्मिन्घटे समवेतत्वेन एकसमवायिकारणत्वात्· एकसमवायिकारणयोरभेदस्य
त्वयानुच्यमानत्वात्· तस्मात्पूर्वोक्तं सर्वमनुपपन्नमिति चेत्· अत्र ब्रूमः घटतज्जतद्रूपयोः समानकालोत्प

२९

त्तौ प्रोच्यमानायां घटरूपयोः समानसामग्रीकत्वं नाम एकसमवायिकारणत्वं तस्माद्भेदो न स्यात्· कोऽ
र्थः सत्तासाक्षाद्व्याप्यजात्यवच्छिन्नप्रतियोगिताको भेदो न स्यादित्यर्थः सत्तासाक्षाद्व्याप्याया जातिः
द्रव्यत्वं गुणत्वं च तदवच्छिन्नाप्रतियोगिता द्रव्ये गुणे च वर्त्तते तत्कृतो भेदः इदं द्रव्यं न गुणः अयं गुणो न
द्रव्यं इति भेदो न स्यात् वर्त्तते च भेदः अथवा घटतज्जतद्रूपयोः कपालसमवायीकारणकत्वे कपाले घट
रूपं कपालरूपं च वक्तव्यं· तथा सति एककपाले रूपद्वयाभावाद्घटरूपकपालरूपयोर्भेदो न स्यादित्य
र्थः वर्त्तते च भेद इति कारभेदनियतत्वात्कार्यभेदस्य तस्मात्प्रथमक्षणे निर्गुणः घट उत्पद्यते पश्चात्त
त्समवेता गुणा उत्पद्यन्ते इति कृत्वा पूर्वकालीनत्वेन घटस्य स्वगतगुणादीन्प्रति समवायिकारणत्वं

तदाकारणभेदोप्यस्तिननुसमवायीकारणैक्येकुत्रभेदाभावोदृष्टइत्यात्रांकार्यांदृष्टांतमाह·घटोद्विघ
टंप्रतिनकारणंएकत्वात्·समवायिकारणैक्यात्·पौर्वापर्याभावाच्च·नन्वेवंसतिप्रथमेक्षणेघटोअ
चाक्षुषःस्यात्·अरूपिद्रव्यत्वात्·यदरूपिद्रव्यंतदचाक्षुषं·यथावायुः अरूपिद्रव्यत्वमस्तुअचाक्षु
षत्वंमास्तुइत्यप्रयोजकोहेतुःतत्रोत्तरं·महत्वसमानाधिकरणोद्भूतरूपवद्द्रव्यंचाक्षुषंअत्रैतावं
तिपदानिकिमर्थंग्राह्याणि·रूपवत्द्रव्यंचाक्षुषंएवंचेत्तर्हिचक्षुरिंद्रियेऽतिव्याप्तिःततोउद्भूतरूप
वदितितत्रोद्भूतरूपाभावात्·अनुद्भूतरूपसत्वात्·एतावत्युक्तेपरमाणावतिव्याप्तिःतदर्थंमह
त्वेसतीतिपरमाणोमहत्वाभावात्नातिव्याप्तिःमहत्वाद्यधिकरणंचाक्षुषमित्युक्तेआकाशेऽति ४०

व्याप्तिःततोरूपवदितिआकाशेरूपाभावान्नातिव्याप्तिःएवंचेच्चक्षुरिंद्रियेऽतिप्रसंगःततोउद्भूतरूपव
दितिननुप्रथमक्षणावच्छिन्नेघटेमहत्वसमानाधिकरणोद्भूतरूपवत्वाभावात्·चाक्षुषत्वंनस्यादिति
चेत्किंच·प्रथमक्षणावच्छिन्नोघटःद्रव्यंनस्यात्गुणाश्रयत्वाभावात्गुणाश्रयोद्रव्यमितिद्रव्यलक्षणा
भावात्·अत्रोच्यते·प्रथमेक्षणेघटश्चक्षुषानगृह्यतेतदास्माकंकाहानिःसगुणोत्पत्तिपक्षेपिप्रथमेक्षणे
घटश्चक्षुषानगृह्यतेतथास्माकमपि·तेनव्यवस्थितमेवैतत्·निर्गुणएवप्रथमंघटःउत्पद्यतेद्वितीयोआ
दिर्यस्यतृतीयादिस्तस्मिन्क्षणेचक्षुषागृह्यते·नचप्रथमेक्षणेद्रव्यत्वंतस्यादित्युक्तमितिवाच्यं·सम
वायीकारणंद्रव्यमितिद्रव्यलक्षणयोगात्·ननुगुणाश्रयोद्रव्यमिदंलक्षणंप्रथमेक्षणेनास्तीतिअ

व्याप्तिरितिचेत्· तत्रोत्तरं· योग्यतयागुणाश्रयत्वंनामगुणात्यंताभावानधिकरणत्वंतच्चतत्रवर्त्ततइ
तिकृत्वानाव्याप्तिः तन्न· गुणात्यंताभावेऽतिव्याप्तिः अत्यंताभावेअत्यंताभावाभावात्· अत्रब्रूमःगु
म३ णात्यंताभावविरोधित्वं गुणात्यंताभावविरोधितत्त्वयः गुणः गुणप्रागभावः गुणध्वंसः प्रथमक्ष
णावच्छिन्नेघटेगुणप्रागभावस्यसत्वात्नातिव्याप्तिरितितत्वंसमवायिकारणानंतरमसमवायिका
रणस्योद्दिष्टत्वात्असमवायिकारणमुक्तंकथमित्यपेक्षायांतत्रोक्तं· समवायीकारणप्रत्यासन्नम
वधृतसामर्थ्यमसमवायिकारणं· कोऽर्थः समवायीकारणेप्रत्यासन्नंनामसमवायीकारणेसम
वायसंबंधेनविद्यमानमवधृतसामर्थ्यंनामकार्यजननेनिश्चितसामर्थ्यंतद्समवायीकारणं· य

थातंतुसंयोगः पटस्यासमवायीकारणं· कथं· पटसमवायीकारणास्तंतवः तत्रप्रत्यासन्नोनामसमवाय
संबंधेनविद्यमानः पटजननेऽवधृतसामर्थ्योनामनिर्णीतसामर्थ्यः इतिकृत्वातंतुसंयोगः पटस्यासमवा
यीकारणं· एवंकपालसंयोगः घटस्यासमवायीकारणंतत्राप्येवमेवलक्षणंयोज्यंअसमवायीकारणल
क्षणं· समवायीकारणेत्यादिलक्षणं· लक्षणेतान्येवेत्यादिज्ञेयं· अवधृतसामर्थ्यं· तत्असमवायीकारणं
चेत्निमित्तकारणेदंडेअतिव्याप्तिः दंडः घटंप्रतिअवधृतसामर्थ्योभवतिसकिंअसमवायीकारणंअ
समवायीकारणंनभवतिअतस्तत्रातिव्याप्तिः प्राप्तात्परिहारार्थंसमवायीकारणप्रत्यासन्नमित्युक्तं·
दंडस्यघटसमवायीकारणकपालेप्रत्यासन्नत्वाभावात्नातिव्याप्तिः समवायीकारणप्रत्यासन्नंतद

समवायीकारणमित्येवास्तु एवंचेत्तर्हितंतुत्वेऽतिव्याप्तिः तंतुत्वंसमवायिकारणंतंतवः तत्रप्रत्यासन्नत्वंना
मसमवायसंबंधेनविद्यमानंभवतितत्किमसमवायीकारणं असमवायीकारणंनभवति अतस्तत्राति
व्याप्तिः प्राप्तातत्परिहारार्थं अवधृतसामर्थ्यमित्युक्तं तंतुत्वस्यावधृतसामर्थ्याभावात्· नातिव्याप्तिः
नत्विदंलक्षणंतुरीतंतुसंयोगेऽतिव्याप्तंसमवायीकारणेषुतंतुषुसमवेतत्वात्· निमित्तकारणत्वेना
समवायीकारणत्वाभावात्· नचसमवायीकारणएवप्रत्यासन्नमित्यर्थः तस्यनिमित्तकारणभू
तायांतुर्यामपिसत्वान्नातिव्याप्तिरितिवाच्यं· तर्ह्यात्ममनःसंयोगस्यसुखादिकंप्रतिकारणतान
स्यात्तस्यसमवायीकारणभूतेआत्मन्येवसमवेतत्वाभावात्मनस्यपिसमवेतत्वात्· अत्रब्रूमः का ४२

र्यध्वंसप्रयोजकीभूतध्वंसाप्रतियोगिद्रव्यकारणवृत्तित्वेसतिज्ञानवन्मात्रावृत्तिसमवायीकारणप्रत्यास
न्नेअवधृतसामर्थ्यंतदसमवायीकारणं· एवंचतुरीतंतुसंयोगेनातिव्याप्तिः कार्यध्वंसःपटध्वंसःतत्प्रयोज
कीभूतोध्वंसःतंतुध्वंसःतस्याप्रतियोगिभूतंद्रव्यकारणंतत्रावृत्तित्वंनास्ति· तुरीतंतुसंयोगस्यतुर्यावृत्तेःसंयो
गस्यद्व्याश्रितत्वात्तर्हिम आत्ममनःसंयोगेऽव्याप्तिः कार्यध्वंसःसुखध्वंसःतत्प्रयोजकीभूतोध्वंसःआत्मम
नःसंयोगध्वंसःतस्याप्रतियोगियत्द्रव्यकारणंआत्मातत्रावृत्तित्वाभावात्· तदर्थंज्ञानवन्मात्रावृत्तिप
दंनुपात्ते· तस्ययद्यपिकार्यध्वंसप्रयोजकीभूतध्वंसाप्रतियोगिद्रव्यकारणवृत्तित्वंनास्तितथाप्यवृत्तित्वेसति
ज्ञानवन्मात्रवृत्तित्वाभावोस्त्येवेतितत्वं· पूर्वोक्तरीत्यातंतुसंयोगःपटस्यसमवायिकारणंएवंतंतुरूपंप

टगतरूपस्यासमवायीकारणं ननु तंतुरूपं पटगतरूपस्यासमवायीकारणं न संभवति तंतुरूपस्य पटरू
पसमवायीकारणे पटे प्रत्यासन्नत्वाभावात्· पटगतस्यैव कस्यचिद्धर्मस्यासमवायीकारणत्वौचित्यात्· त
स्य पटे प्रत्यासन्नत्वात्· न तंतुरूपस्य तस्य समवायीकारणप्रत्यासन्नत्वाभावादिति चेन्न· प्रत्यासत्तिर्द्वि
विधा· कारणैकार्थप्रत्यासत्तिः कार्यैकार्थप्रत्यासत्तिः यथा तंतुरूपस्य· कथं· स्वत्राद्वेन तंतुरूपं तस्य कार्यं
पटरूपं तस्य कारणं पटः तेन सहैकस्मिन्नर्थे तंतौ प्रत्यासत्तिः तंतौ तंतुरूपपटयोः समवायात् तंतुरू
पस्य· समवायीकारणप्रत्यासन्नत्वं।। तंतुसंयोगस्य कार्यैकार्थप्रत्यासत्त्यासमवायीकारणप्रत्यासन्न
त्वे कथं· स्वकार्येण सह एकस्मिन्नर्थे तंतौ प्रत्यासन्नत्वात् संयोगपटयोः अतस्तंतुरूपस्यसमवायीका

रण प्रत्यासत्तित्वान्नाव्याप्तिरिति तत्वं· असमवायीकारणलक्षणानंतरं निमित्तकारणस्य लक्षणं तच्चेदं· य
न्नसमवायीकारणं नाप्यसमवायीकारणं अथ च कारणं तन्निमित्तकारणं· यथा दंडः घटस्य निमित्तका
णं रणं कथं· दंडः घटस्य समवायीकारँ न भवति· नापि समवायीकारणं कारणं च भवतीति कृत्वा दंडः घटस्य
निमित्तकारणं· लक्षणे तान्येवेत्यादि ज्ञेयं· कारणं निमित्तकारणं इत्येवास्तु· एवं चेत्तर्हि समवायीकारणेऽ
तिव्याप्तिः तदर्थं यन्न समवायीकारणेति पदमुपात्तं· समवायीकारणस्य यन्न समवायीति विशेष
णाभावात् नातिव्याप्तिः एवं चेत्तर्हि असमवायीकारणेऽतिप्रसंगः तस्यापि समवायीकारणभिन्नत्वात्·
तदर्थं नाप्यसमवायीति पदमुपात्तं· असमवायीकारणस्यासमवायीकारणत्वेनासमवायीकारणभि

न्नत्वाभावात् ॥ नातिव्याप्तिः उभयविशेषणोक्तौ रासभेऽतिव्याप्तिः कथं· सैरोभः घटसमवायीकारणभि
न्नो भवति घटासमवायीकारणभिन्नो भवति अतस्तत्रातिव्याप्तिः तदर्थं कारणपदमुपात्तं· रासभस्य का
रणत्वाभावान्नातिव्याप्तिरिति· तदेतत् त्रिविधं कारणमुत्पत्तिमत्भावपदार्थानां अभावस्य निमित्तकार
णमात्रं· तस्य कुत्रापि समवायो नास्ति· समवायस्तु भावद्वयधर्मः अभावे समवायाभावात् समवायी
कारणताद्यभावः एतत्त्रिविधकारणस्य मध्ये यदेवाविलंबेन कार्योत्पादकं तदेव कारणं तेन प्रमाकरणं
प्रमाणमिति सिद्धं· मीमांसकास्तु अनधिगतार्थगंतृ प्रमाणमिति वदंति कोऽर्थः अनधिगतो नाम तेने
व प्रमात्रा पूर्वमनधिगतः एतादृशो योऽर्थः तस्य गंतृ गमयति अर्थं बोधयति तत् गंतृ तत् प्रमाणमिति

वदंति तन्न· एकस्मिन् घटे घटोऽयं घटोऽयमिति धारा भवंति यानि ज्ञानानि तेषां कारणानां प्रामाण्यं न स्यात्· अन
धिगतार्थबोधकत्वाभावात्· कथं पूर्वज्ञानेन विषयीकृतस्यार्थस्य बोधनात्· न च तत्राप्यनधिगतार्थगंतृत्वं
वर्त्तत एव कथं· पूर्वज्ञाने न पूर्वक्षणविशिष्टो घटो विषयीकृतः उत्तरज्ञाने नोत्तरक्षणविशिष्टो विषयीकृतः
स च पूर्वमनधिगत एवेति वाच्यं· प्रत्यक्षेण सूक्ष्मकालविशिष्टघटस्याविषयीकरणात्· सूक्ष्मकालोपाधेरतीं
द्रियत्वात् तर्हि युगपत् शतपत्रं भिन्नमिति प्रतीतेः का गतिः सा भ्रांतिः तत्र प्रथमतो क्रिया क्रियातो विभागः वि
भागात्पूर्वसंयोगनाशः पूर्वसंयोगनाशादुत्तरसंयोगोत्पत्तिरिति क्रियादिसंयोगांतानां योगपद्याभिमानप्र
तीतिर्भ्रांतिरेव· तस्मान्मीमांसकानां प्रमाणलक्षणमनुपपन्नं· स्वकीयमेव सम्यगिति· ननु प्रमायाः कार

णानिइंद्रियंइंद्रियार्थसंनिकर्षःप्रमातापुरुषःप्रमेयोविषयःतानिसर्वाणिकिंकारणान्युतनेति पूर्वपक्षः
तत्रसिद्धांतःइंद्रियसंयोगेसतिअविलंबेनप्रमाउत्पद्यतेप्रमातृप्रमेयेचसतिप्रमानोद्यते·इंद्रियार्थसंनि
कर्षसापक्षत्वात्तयोःअतरिंद्रियार्थसंयोगएवकारणंनप्रमात्रादिरितिप्रमाताप्रमेयादीनांसाधकत्वावि
शेषेपिइंद्रियार्थसंनिकर्षस्याविलंबेनप्रमोत्पादकत्वादिंद्रियसंयोगएवकारणंनेतरदितिसिद्धं·ता
निचप्रमाणानिचत्वारि·प्रत्यक्षानुमानोपमानशाब्दाख्यानि·तत्रप्रत्यक्षलक्षणमुच्यते·साक्षात्कारीप्रमा
करणंप्रत्यक्षं·साक्षात्कारिणीप्रमाइंद्रियजा·तस्याःकरणंप्रत्यक्षंप्रमाणं·अत्रप्रत्यक्षलक्षणं·साक्षा
त्कारिप्रमाकरणंलक्षणं·लक्षणेतान्येवेत्यादिज्ञेयं·करणंप्रत्यक्षप्रमाणमित्युक्तेकुठारेऽतिव्याप्तिः

तत्परिहारार्थंमाकरणमित्युक्तंएवंचेत्तर्हिकाचकामलादिदोषदुष्टचक्षुरिंद्रियेऽतिव्याप्तिःततःप्रपदमु
पात्तंएवंचेत्तर्हिअनुमानेऽतिव्याप्तिःतस्याप्यनुमितिरूपप्रमाकरणत्वात्·तदर्थंसाक्षात्कारीत्युक्तं·अनु
मानस्यसाक्षात्कारिप्रमाकरणत्वाभावात्नातिव्याप्तिःसाक्षात्कारिणीप्रमाद्विविधा·सविकल्पकनिर्विक
कभेदात्·तस्याःकरणंत्रिविधं·कदाचिदिंद्रियं·कदाचिदिंद्रियार्थसंनिकर्षःकदाचिज्ज्ञानं·यदाइंद्रियं
करणं·तदाइंद्रियार्थसंनिकर्षःअवांतरव्यापारःनिर्विकल्पकंज्ञानंफलं·निर्विकल्पकोत्पत्तिमाह·आ
त्मामनसासंयुज्यतेमनइंद्रियेणसंयुज्यतेइंद्रियमर्थेनसंयुज्यतेतोर्थसंनिकृष्टेनेंद्रियेणनामजात्या
दियोजनादिहीनंवस्तुमात्रावगाहियज्ज्ञानंजन्यतेतन्निर्विकल्पकंतर्कभाषाकारेणोक्तंकिंचिदिदमिति

४६

निर्विकल्पकज्ञानाकारः सबालबोधनार्थं वस्तुतः किंचित्त्वं चेत्प्रकारः तर्हि तत्ज्ञानं सविकल्पकं स्या
त्. तस्मान्निःप्रकारकं ज्ञानं निर्विकल्पकं. तथा चोक्तमुदयनाचार्यैः अस्ति ह्यालोचनाज्ञानं प्रथमं नि
र्विकल्पकं. बालमूकादिविज्ञानसदृशं शुद्धवस्तुजं. अस्यार्थः आलोचनाज्ञानं नाम व्यवहाराता
गं ज्ञानं प्रथमं जायते तच्च बालमूकादिविज्ञानसदृशं शुद्धवस्तुजं कोऽर्थः शुद्धं वस्तु स्वलक्षणं तस्माज्जातं.
तच्चेंद्रियस्य फलं. इंद्रियार्थसंनिकर्षोऽवांतरव्यापारः इंद्रियं करणं. यथा कुठारः छिदायाः करणं. कु
ठारदारुसंयोगः अवांतरव्यापारः छिदा फलं. तज्जन्यस्तज्जन्यजनकोऽवांतरव्यापारः यथा कुठार
दारुसंयोगः कुठारजन्यो भवति कुठारजन्याया छिदायास्तस्याः जनको भवति इति कृत्वा अवांतरव्यापारः

४६

कुठारस्य. तद्वत् इंद्रियार्थसंनिकर्षः इंद्रियजन्यः इंद्रियजन्याया निर्विकल्पकप्रमा तस्याः जनको भवति इ
ति कृत्वा इंद्रियार्थसंनिकर्षः अवांतरव्यापारः इंद्रियस्य. यदा इंद्रियार्थसंनिकर्षः करणं तदा निर्विक
ल्पकज्ञानमवांतरव्यापारः नामजात्यादियोजनात्मकं डित्थोयं ब्राह्मणोयं श्यामोयं इति विशेषणविशे
ष्यावगाहि ज्ञानं च सविकल्पकरूपं तदिंद्रियार्थसन्निकर्षः फलं. निर्विकल्पकज्ञानस्यावांतरव्यापा
रता व्यापारलक्षणाक्रांतत्वेन ज्ञेया. यदा निर्विकल्पकज्ञानं करणं तदा सविकल्पकज्ञानमवांतरव्या
छि पारः हानादिबुद्धिः फलं. हानादिबुद्धिर्नाम इदं हेयमिति बुद्धिः उपादानबुद्धिर्नाम इदं ग्राह्यमिति बुद्धिः
उपेक्षाबुद्धिस्तत्र जायते यत्र ग्राह्यबुध्यभावः यत्र हेयबुध्यभावः तत्र या बुद्धिर्नाम ज्ञानमुत्पद्यते प

धियपतितत्त्वणाद्दौसादुपेक्षाबुद्धीः एतत्त्रितयंयथायोग्यंफलंसविकल्पकस्यव्यापारस्त्वंपूर्ववत्· कश्चि
द्देवंवदति· सविकल्पकादीनांइंद्रियमेवकरणंयावंतितुअंतरालिकानिमध्येजातानिसंनिकर्षनिर्वि
कल्पकादीनिसर्वाण्यवांतरव्यापारः तन्न· व्यापारद्वयकल्पनागौरवप्रसंगात्· एकेकेनव्यापारेण
उपपत्तेरितियथोक्तमेवमनोरममितितत्वं· इंद्रियार्थयोस्तुयः सन्निकर्षः ससाक्षात्कारिप्रमाहेतुः
सचषड्विधः संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेष
णविशेष्यभावश्चेति· तत्रसंयोगप्रत्यासत्याइंद्रियेणघटादिविषयकानिज्ञानानिजन्यंतेतदाचक्षु
रिंद्रियं· घटादिकमर्थः अनयोः संनिकर्षः संयोगएव· नसमवायः तयोरयुतसिद्धत्वाभावात्· उदा

हरणांतरमुक्तंकेनाव मिश्रेण· मनसाअहमित्यात्मविषयंज्ञानंजन्यते· तदामनइंद्रियं· आत्माअर्थः
अनयोः संतिकर्षः संयोगएव· अयुतसिद्धत्वाभावादिति· संयुक्तसमवायप्रत्यासत्याघटादिनिष्ठरू
पादिग्रहणं तथाहि चक्षुषाघटनिष्ठरूपज्ञानंजन्यतेघटेश्यामंरूपमस्तीतितदाचक्षुरिंद्रियंघटरू
पमर्थः अनयोः संतिकर्षः संयुक्तसमवायएव· चक्षुः संयुक्तेघटेरूपस्यसमवायात्· एवंमनसाआत्म
समवेतंसुखज्ञानंअहंसुखीतिजन्यते· तदाअयमेवसंनिकर्षः मनः संयुक्तेआत्मनिसुखस्यसमवाया
दिति· घटनिष्ठरूपवत्घटनिष्ठपरिमाणादिग्रहणाभावः सत्यपिसंनिकर्षेसंयुक्तसमवायेपरिमा
णग्रहणाभावस्यानुभवसिद्धत्वात्तथाचकारणांतरंवक्तव्यंसचचतुष्टयसन्निकर्षएवतस्मात्· घ

टगतपरिमाणादिग्रहणं न संयुक्तसमवायमात्रेण तस्मिन्विद्यमानेपि दूरे परिमाणाद्यग्रहणात् चक्षु
ष्यसंनिकर्षोप्यधिकं कारणं स यथा· इंद्रियैकैवयवैरर्थावयवानां संनिकर्षएक इंद्रियावयविना
अथावयवीनः अपरः इंद्रियावयवैरर्थावयविनः तृतीयः अर्थावयवैरिंद्रियावयविनः चतुर्थः इदं
संनिकर्षचतुष्टयं संयुक्तसमवायापेक्षया अधिकं कारणं घटगतपरिमाणग्रहणे इति· यदा चक्षुषा
घटनिष्ठरूपतन्निष्ठरूपत्वादिसामान्यज्ञानं जन्यते तदा संयुक्तसमवेतसमवायः प्रत्यासत्तिः कथं· च
क्षुः संयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात्· तस्य प्रत्यासत्तित्वं· यदा श्रोत्रेंद्रियेण शब्दो गृह्य
ते तदा श्रोत्रे शब्दसमवाय एव प्रत्यासत्तिः तया तस्य ग्रहः कथं· श्रोत्रशब्दयोः समवायप्रत्यासत्तिः क

र्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमिति लक्षणेन श्रोत्रस्याकाशत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनोश्च
समवायात् शब्दग्रहे श्रोत्रस्य समवाय एव प्रत्यासत्तिः शब्दनिष्ठशब्दत्वग्रहे समवेतसमवायप्रत्यासत्तिः
श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्· श्रोत्रेण शब्दत्वग्रहः समवेतसमवायेन· विशेषणविशेष्यभा
वप्रत्यासत्त्या अभावसमवाययोर्ग्रहः तथाहि· संयुक्तविशेषणविशेष्यताप्रत्यासत्त्या भूतले घटाभावो
गृह्यते· घटाभाववद्भूतलमित्यत्र भूतलं विशेष्यं· घटाभावो विशेषणं· तथा संयुक्तस्य भूतलस्य घटाभा
वविशेषणत्वात्· यदा भूतले घटाभाव इति प्रतीतिश्चक्षुषा जायते तदा संयुक्तविशेष्यताप्रत्यासत्तिः
चक्षुः संयुक्तस्य भूतलस्य विशेषणत्वात्· सप्तम्यंतं विशेषणमिति नियमात्· तत्र घटाभावस्य विशेष्य

४९

त्वात् संयुक्तविशेष्यता प्रत्यासत्त्या भूतले घटाद्यभावग्रहः यदा रूपे रसाभावश्चक्षुषा गृह्यते रसाभाववद्रू
पं तदा संयुक्तसमवेतविशेषणता· कथं· चक्षुषा संयुक्तः घटस्तत्समवेतं रूपं रसाभावस्य रूपविशेषणत्वा
त् यदा रूपे रसाभाव इति प्रतीतिश्चक्षुषा जन्यते तदा संयुक्तसमवेतविशेष्यता प्रत्यासत्तिः अस्यां प्रतीतौ
रसाभावस्य विशेष्यत्वात् रूपस्य विशेषणत्वात्· यदा चक्षुषा रूपत्वे रसाभावो गृह्यते तदा संयुक्तसमवे
तसमवेतविशेष्यता प्रत्यासत्तिः चक्षुः संयुक्तो घटः तत्समवेतं रूपं तत्समवेतं रूपत्वं तस्य विशेषणत्वात्·
रसाभावस्य विशेष्यत्वात्· यदा चक्षुषा रसाभाववद् रूपत्वमिति प्रतीतिर्जन्यते तदा संयुक्तसमवेतसमवेतवि
शेषणता प्रत्यासत्तिः रसाभावस्य विशेषणत्वात्· यदा श्रोत्रसमवेते गकारे घत्वाभावो गृह्यते श्रोत्रेण त

४९

550

दा समवेतविशेष्यता प्रत्यासत्तिः श्रोत्रसमवेते गकारे घत्वाभावस्य विशेष्यत्वात्· गकारस्य विशेषणत्वात्·
यदा श्रोत्रेन्द्रियेण शब्दत्वे रसाभावो गृह्यते तदा समवेतसमवेतविशेष्यता प्रत्यासत्तिः श्रोत्रसमवेतः शब्दस्त
त्समवेतं शब्दत्वं तस्य विशेषणत्वात्· रसाभावस्य विशेष्यत्वात्· तदेवं संक्षेपतः पंचविधसंबंधान्यतमसंबं
धसंबंधेन विशेषणविशेष्यभावलक्षणेनेन्द्रियार्थसंनिकर्षेण अभावो गृह्यते· अभाववत् समवायोऽपि
विशेषणता प्रत्यासत्त्या गृह्यते· तथाहि· रूपसमवायवान् तंतुरित्यत्र संयुक्तविशेषणतया समवायो गृह्य
ते कथं· चक्षुः संयुक्त तंतूनां विशेष्यत्वात्· समवायस्य विशेषणत्वात्· यदा चक्षुषा तंतौ रूपसमवाय इति
गृह्यते तदा चक्षुः संयुक्तविशेष्यता प्रत्यासत्त्या गृह्यते अत्र तंतूनां विशेषणत्वात् समवायस्य विशेष्यता

५० त्·तदेवं सविकल्पकनिर्विकल्पकप्रमा·त्रिविधं तत्कारणं षोढासंनिकर्षो वर्णितः सोक्तंर्थे कुसुमांजलिसं
मतिमाह·अरूजाप्रमितिर्द्वेधा सविकल्पा निर्विकल्पका·करणं त्रिविधं तस्याः संनिकर्षस्तु षड्विधः केशवमिश्रेणो
क्तं प्रत्यक्षप्रमा द्विविधा सविकल्पकनिर्विकल्पकभेदादिति॰ तत्र बौद्धः शंकते इति·निर्विकल्पकं प्रत्यक्षं स्वलक्षणं वस्तुस्व
लक्षणं घटादिकं तद्विषयत्वात्·सविकल्पकं न प्रत्यक्षं·अनुगताकारावगाहित्वात् सामान्यविषयत्वा
च्चराज्जन्यज्ञानवत् लिंगजन्यज्ञानवत् सविकल्पकस्य प्रत्यक्षत्वाभावे हेतुः कः साक्षादर्थजन्यत्वाभावात्·
नच सामान्यरूपस्य अर्थजन्यत्वे नार्थजत्वमिति वाच्यं·सामान्यस्य परमार्थतः सत्वाभावादर्थस्य परमार्थतः
सत एव जनकत्वात् स्वलक्षणं तु परमार्थतः सत् सामान्यं तु परमार्थतः सन्न भवति तस्य प्रमाणनिरस्तवि ५०

धिभावस्यान्यव्यावृत्तात्मनः तुच्छत्वात् इति इच्यते·सामान्यस्य वस्तुभूतत्वादिति·नच वस्तुभूतत्वमसिद्धमि
ति वाच्यं·तस्यालीकत्वे तत्कृतव्यावृत्तिर्न स्यादिति न चापोहेनैवान्यस्माद्व्यावृत्तिः स्यादेवेति वाच्यं·अपोहेन
व्यावृत्तौ क्रियमाणायामन्योन्याश्रयता·तथाहि अपोहो नाम अद्रव्यव्यावृत्तिरेव द्रव्यत्वमनेनाद्रव्यत्वात् व्यावृत्तिः
द्रव्यस्य कर्तव्या तत्राद्रव्यं नाम द्रव्यभिन्नं वक्तव्यं·तत्र प्रथमं द्रव्ये व्यवहारो वक्तव्यः तदनंतरं अद्रव्यव्यावृत्ति
र्ज्ञातव्या·तथा चान्योन्याश्रयता अद्रव्यव्यावृत्तौ ज्ञातायां द्रव्यव्यवहारः द्रव्यव्यवहारे चाद्रव्यव्यावृत्तिरिति प
रस्पराश्रयता तस्माद्द्रव्यत्वं जातिः सद्रूपा असद्रूपा न भवति तज्जन्यत्वात् सविकल्पकस्य साक्षात् जातिरूप
जन्यत्वात् प्रत्यक्षत्वमिति तत्वं॰ इति न्यायसंग्रहे रामलिंगकृतौ प्रत्यक्षपरिच्छेदः समाप्तः ॰ प्रत्यक्षानं

तदनुमानखंडो[illegible]तदनुमानं निरूप्यते · अनुमितिकरणमनुमानं · कोऽर्थः येनानुमीयते तदनुमानं ·
लिंगपरामर्शेनानुमीयतेऽतो लिंगपरामर्शोऽनुमानं · इदं च नतिर्व्यापारवत्करणत्वपक्षे परामर्शव्यापाराभावा
त् · एतेषां मते व्यापारवत्कारणं तत्त्वाते लिंगं करणं · लिंगपरामर्शो व्यापारः · अनुमितिः फलं · लिंगपराम
र्शो वाऽसल्लिंगस्य तृतीयज्ञाने तदनुमानपदवाच्यं · अनुमितिं प्रति करणत्वात् · अनुमितीर्नाम अस्यादिज्ञा
नमनुमितिः तत्करणं धूमादिज्ञानं · नन्विदमनुमितेर्लक्षणं न संभवति · वह्निप्रत्यक्षेऽतिव्याप्तिः तस्यापि व
ह्निज्ञानत्वात् · इति चेन्न · व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिः कोऽर्थः व्याप्तिविशिष्टं
ताम व्याप्तिविषयकं यत्पक्षधर्मताज्ञानं वह्निव्याप्यधूमवानयमित्याकारकं तज्जन्यं ज्ञानं किं पर्वतो ५१

वह्निमानित्याकारकं तदनुमितिशब्देनोच्यते · अत्रानुमितिर्लक्ष्या व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमि
दं लक्षणं · लक्षणे तान्येवेत्यादिद्वेयं · ज्ञानमनुमितिरित्येवास्तु · एवं चेत्तर्हि ईश्वरज्ञानेऽ[struck]तिव्याप्तिः तदी
श्वरज्ञानं ज्ञानं भवति तत्किमनुमितिः · अनुमितिर्न भवति अतस्तत्रातिव्याप्तिः प्राप्ता तत्परिहारार्थं किं पदमु
पात्तं · जन्येति पदमुपात्तं · ईश्वरज्ञानस्य जन्यत्वाभावात् नातिव्याप्तिः कुतः ईश्वरज्ञानस्य नित्यत्वात् · जन्यं
ज्ञानमनुमितिरित्युच्यमाने निर्विकल्पकेऽतिव्याप्तिः तस्येंद्रियार्थसंनिकर्षजन्यत्वात् ततो वह्निज्ञानजन्येति
पदं न च तस्यापि नित्ये ईश्वरज्ञानजन्यत्वात् अतिव्याप्तिः स्यादेवेति वाच्यं · ज्ञानशब्देनानित्यज्ञानस्य विवक्षि
तत्वात् · ईश्वरज्ञानस्य नित्यत्वेन तज्जन्यत्वेपि नातिव्याप्तिः एवं चेत्तर्हि घटोयमिति सविकल्पकज्ञानेऽतिव्या
प्तिः तस्यापि जन्यं यन्निर्विकल्पकज्ञानं तज्जन्यत्वात् · अतोऽतिव्याप्तिः अतो ज्ञानजन्येति पदमुपात्तं · तस्य निर्वि
कल्पकरूपज्ञानजन्यत्वेपि व्याप्तिज्ञानजन्यत्वाभावान्नातिव्याप्तिः एतावदुच्यमाने व्याप्तिज्ञानानुव्यवसायेपिऽ

५२ तिव्याप्तिः कथं· व्याप्तिज्ञानं यत्र धूमस्तत्र वह्निरिति साहचर्यनियमज्ञाने तज्जन्योनुव्यवसायः एतादृशो व्याप्तिज्ञा
नवानहमित्याकारकः तत्र व्याप्तिज्ञानस्य विषयत्वेन कारणत्वात् अतो वक्ति· पक्षधर्मताज्ञानजन्येति व्याप्तिज्ञानानुव्य
वसायस्य पक्षधर्मताज्ञानजन्यत्वाभावात् नातिव्याप्तिः पक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिरिति उच्यमाने पक्षधर्मताज्ञा ५३
नानुव्यवसायेऽतिव्याप्तिः धूमवानयमिति यत्पक्षधर्मताज्ञानं तज्जन्यत्वात्· धूमवानयमिति ज्ञानवानहमिति ज्ञान
स्येति अतो व्याप्तिज्ञानजन्येति पदमुपात्तं· तस्य यद्यपि पक्षधर्मताज्ञानजन्यत्वेपि व्याप्तिज्ञानजन्यत्वाभावान्नाति
व्याप्तिः व्याप्तिज्ञानपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिरिति उच्यमाने व्याप्तिज्ञानपक्षधर्मताज्ञाने इति समूहालंब
नेऽतिव्याप्तिः तस्य व्याप्तिज्ञानपक्षधर्मताज्ञानोभयजन्यत्वात् अतो वक्ति· व्याप्तिविशिष्टेति पदं· तयोर्व्याप्तिवि
शिष्टज्ञानत्वाभावात् तज्जन्ये समूहालंबने नातिव्याप्तिः न च परामर्शानुव्यवसायेऽतिव्याप्तिः तस्यापि वह्निव्याप्य
धूमवानयमिति परामर्शजन्यत्वात्· वह्निव्याप्यधूमवानयमिति ज्ञानवानहमिति परामर्शानुव्यवसायेऽति ५२

व्याप्तिः स्यादेवेति वाच्यं· भिन्ने विषयेऽनुमितिसामग्र्याः बलवत्त्वेनानुमितेरेवोत्पत्तेः परामर्शानुव्यवसायाभावात्
नातिव्याप्तिः अग्रिमज्ञानपदत्यागे सत्प्रतिपक्षस्थले प्रकृतसाध्यद्वयहेत्वोः किं तत्त्वमिति जिज्ञासायामतिव्याप्तिः त
स्याः अनित्यत्वव्याप्यकृतकत्ववानयं नित्यत्वव्याप्यश्रावणत्ववानयमिति परामर्शद्वयजन्यत्वात्· परामर्शद्वयानंत
रं जिज्ञासायाः जायमानत्वात्· अतो ज्ञानपदं जिज्ञासाया इच्छारूपत्वेन ज्ञानत्वाभावात् नातिव्याप्तिरिति· विस्तरस्तु चिं
तामणौ द्रष्टव्यः बालानामनुपयुक्तत्वान्न इहोच्यते· इयमनुमितिस्तस्याः करणं लिंगज्ञानं नाम धूमादिज्ञानं पराम
र्शरूपं ननु किं लिंगं· तस्य परामर्शः कः उच्यते· व्याप्तिसहकारेण यदर्थबोधकं तल्लिंगं· यथा धूमोग्नेर्लिंगं· कथं· यत्र
धूमस्तत्राग्निरिति साहचर्यनियमरूपव्याप्तिसहकारेण अर्थो वह्निस्तस्य बोधको भवतीति कृत्वा धूमोग्नेर्लिंगं व्याप्ति
ज्ञानाभावे धूमस्याग्निबोधकत्वाभावात्· अतो व्याप्तिसहकारेणानुमापकत्वात् धूमोग्नेर्लिंगं तस्य तृतीयं ज्ञानं लिं
गपरामर्शः धूमस्य प्रथमं ज्ञानमाह· प्रथमं महानसादौ भूयो भूयो धूमं पश्यन् वह्निं पश्यति शतशतेन भूयोदर्श

५३ तेनधूमाग्न्योःस्वाभाविकसंबंधमवधारयति·यत्रधूमस्तत्राग्निरितिस्वाभाविकःसंबंधएवव्याप्तिरित्युच्यते·एतादृ
ग्व्याप्तौगृह्यमाणायांमहानसेयद्धूमज्ञानंतत्प्रथमं·स्वाभाविकएवसंबंधएवव्याप्तिरित्युक्तंनत्वौपाधिकः।
सोपाधिकसंबंधस्यव्याप्तिपदवाच्यत्वाभावात्·तथाहि·गर्भस्थोमित्रातनयःश्यामोभवितुमर्हतिमैत्रीतनय
त्वात्·परिदृश्यमानमैत्रीतनयवदिति·यद्यपियत्रयत्रमैत्रीतनयत्वंतत्रतत्रश्यामत्वमिति·भूयोदर्शनंयत्रधूम
स्तत्रवह्निरितिभूयोदर्शनेनसमानं·तथापिमैत्रीतनयत्वश्यामत्वयोर्नस्वाभाविकःसंबंधःकिंत्वौपाधिकःशाका
द्यन्नपरिणामस्योपाधेर्विद्यमानत्वात्·साध्यव्यापकत्वेसतिसाधनाव्यापकउपाधिरित्युपाधिलक्षणं·अत्र
पदकृत्यं·साध्यव्यापकउपाधिरित्युच्यमानेपर्वतोवह्निमान्धूमवत्त्वादितिसदनुमानेप्रमेयत्वमुपाधिःस्या
त्तस्ययत्रवह्निस्तत्रप्रमेयत्वमितिसाध्यव्यापकत्वात्·अतउक्तंसाधनाव्यापकइति·तस्यकेवलान्वयित्वेन
साधनधूमव्यापकत्वान्नोपाधित्वं·साधनाव्यापकउपाधिरित्युच्यमानेपर्वतोवह्निमानितिसदनुमानेघट ५३

स्योपाधित्वंस्यात्तस्यसाधनाव्यापकत्वात्कथं·यत्रधूमस्तत्रघटइतिनास्तिनिर्घटेपर्वतेधूमोवर्त्ततेतत्रघटोनास्ति·अ
तउक्तंसाध्यव्यापकइतिघटस्यसाध्यव्यापकत्वाभावात्·कथं·यत्रवह्निस्तत्रघटइतिनास्ति·अयोगोलकेव्यभिचारा
त्·तच्चशाकाद्यन्नपरिणामलक्षणोपाधौवर्त्तते·यत्रनरत्वेसतिश्यामत्वंतत्रशाकाद्यन्नपरिणामःइतिसाध्यव्यापकत्वंश्या
मत्वेशाकाद्यन्नपरिणामस्यप्रयोजकत्वात्·प्रयोजकश्चोपाधिरित्युच्यते·ननुमैत्रीतनयत्वात्·तस्यश्यामत्वप्रयोजक
त्वात्तैर्भावात्·तद्वद्धूमाग्न्योःसंबंधेयोग्योऽयोग्योवाउपाधिर्नास्ति·कुतः·अयोग्यस्यशंकितुमशक्यत्वात्·योग्यस्यानु
पलभ्यमानत्वात्·यत्रोपाधिरस्तितत्रोपलभ्यते·तथाहि·पर्वतोधूमवान्वह्निमत्त्वात्यत्रवह्निमत्त्वंतत्रधूमवत्त्वं
नास्ति·अयोगोलकेव्यभिचारात्·व्यभिचारोनामहेतुसत्त्वेसाध्यासत्त्वं·व्यभिचारेचावश्यमुपाधिरिति·आर्द्रेन्धन
संयोगस्योपाधित्वं·तस्ययत्रधूमस्तत्रार्द्रेन्धनसंयोगइतिसाध्यव्यापकत्वंयथामहानसे·यत्रवह्निस्तत्रार्द्रेन्धनसं

योगोनास्ति·अयोगोलकेवह्निर्वर्त्तते·आर्द्रेंधनसंयोगोनास्तीतिसाधनाव्यापकत्वेनार्द्रेंधनसंयोगस्योपाधित्वं·
उदाहरणांतरमाह·यागीयाहिंसाअधर्मसाधनं·हिंसात्वात्·यत्रहिंसात्वंतत्राधर्मसाधनत्वं·यथाक्रतुबाह्यहिं
सावदिति·अत्रनिषिद्धत्वमुपाधिःकथं·साध्यमधर्मसाधनत्वंतस्यव्यापकं·यत्राधर्मसाधनत्वंतत्रनिषिद्धत्वं·
यथाक्रतुबाह्यहिंसायां·इतिसाध्यव्यापकत्वंयत्रहिंसात्वंतत्रनिषिद्धत्वमितिनास्ति·यागीयपशुहिंसायांसत्य
पिहिंसात्वेनिषिद्धत्वाभावात्·साधनाव्यापकत्वेनायमुपाधिःगर्भस्थोमित्रातनयइत्यत्रोपाधिस्तूक्तएव·
एवंधूमवह्निसंबंधेउपाध्यदर्शनात्·तत्रतदभावोऽवधारयति·यदिस्यादुपलभ्येतदर्शनाभावान्नास्तीतितर्कस
हकारिणाअनुपलब्धिसहकारिणाप्रत्यक्षेणोपाध्यभावोऽवधार्यतेउपाध्यभावावधारणानंतरंउपाध्यभाव
ग्रहणजनितसंस्कारसहितेनभूयोदर्शनजनितसंस्कारसहितेनसाहचर्यग्राहिणाप्रत्यक्षेणधूमाग्न्योर्व्याप्ति ५४

रवधार्यते·तेनधूमाग्न्योःस्वाभाविकएवसंबंधःनत्वौपाधिकःसएवव्याप्तिरिति·अनेनप्रकारेणमहानसेयद्धूमज्ञानंतत्प्र
थमंपर्वतादौपक्षेयद्धूमज्ञानंतद्द्वितीयं·ततःपूर्वगृहीतांधूमाग्न्योर्व्याप्तिंस्मृत्वातत्रैवपर्वतेधूमज्ञानंपुनर्जायते·अस्य
त्रपर्वतेअग्निनाव्याप्तोधूमइतितदिदंधूमज्ञानंतृतीयं·एतच्चतृतीयंज्ञानमवश्यमंगीकरणीयं·अन्यथायत्रमहान
सादौधूमस्तत्राग्निरित्येवस्यात्·इहपर्वतेकथमग्निनाभवितव्यंतस्मादिहापिपर्वतेवह्निव्याप्योधूमोस्तीतिज्ञानमंगी
करणीयं·अयमेवलिंगपरामर्शःअनुमितिंप्रतिकरणत्वात्·अनुमानं·एतस्मादनुमानात्पर्वतोवह्निमानिति·अनुमि
तिरूपज्ञानमुत्पद्यतेइति नन्वितिपूर्वपक्षमाशंकते·प्रथमंमहानसेयद्धूमज्ञानंतत्कथंनास्त्यनुमापकंइतिचेत्·न प्र
थमतोव्याप्तेरगृहीतत्वात्·गृहीतायामेवव्याप्तावनुमित्युदयात्·ननुमहानसेधूमज्ञानंतदनंतरंव्याप्तिग्रहःतदनंत
रंमहानसेएवाग्निरनुमीयतांतृतीयज्ञानप्रयोजनाभावादितिचेन्न·संदिग्धश्चार्थोऽनुमीयते·अत्रभाष्यकारसंमति

५५ माह· सर्वथानुपलब्धेऽर्थे निर्णीते वार्थे न्यायो नाम अनुमानं न प्रवर्त्तते· तथा च महानसे अग्नेर्दृष्टत्वेन संदेहस्यासि
साधयिषायाश्चाभावेनानुमित्यभावः तस्मात्प्रथमं ज्ञानं नास्त्यनुमापकं ननु पर्वते यद्द्वितीयं धूमज्ञानं तत्कथं ना
स्त्यनुमापकं· पर्वते वह्नेः साधकं प्रमाणं बाधकं प्रमाणं च नास्तीति कृत्वा संशयस्य न्यायप्राप्तत्वादिति चेन्न· द्विती
यं ज्ञानं नास्त्यनुमापकं· व्याप्तिस्मरणस्य वह्न्यनुमितिजनकत्वात्· गृहीतविस्मृतव्याप्तेरनुमित्यनुदयात्· अत्र
दृष्टांतः अगृहीतव्याप्तेरिव· तथा च व्याप्तिस्मरणेन भाव्यं· तच्च व्याप्तेः संबंधिधूमदर्शनेनोद्बुद्धसंस्कारस्य भवति· त
था च धूमदर्शने यत्र धूमस्तत्र वह्निरिति व्याप्तिस्मृतौ जातायां यद्धूमज्ञानं तत्तृतीयं धूमवांश्चायमित्याकारकं तदेवा
ग्निमनुमापयति तदेव लिंगपरामर्शः तेन व्यवस्थितमेतत् लिंगपरामर्शोऽनुमानमिति· तच्चानुमानं द्विविधं स्वा
र्थं परार्थं च· स्वार्थं स्वप्रयोज्यं· स्वप्रतिपत्तिहेतुः तदेव प्रदर्श्यते पुरुषः स्वयमेव महानसादौ धूमाग्न्योर्व्याप्तिं गृहीत्वा ५५

पर्वतसमीपं गतः पश्चात्पर्वतगते अग्नौ संदिहानः पर्वतवर्त्तिनीमनवच्छिन्नमूलां धूमलेखां पश्यन् धूमदर्शने
नोद्बुद्धसंस्कारो व्याप्तिं स्मरति यत्र धूमस्तत्राग्निरिति· अत्रापि धूमोऽस्तीति प्रतिपद्यते· धूमसत्वादेव वह्निरस्तीति प्र
तिपद्यते स्वयमेव तत्स्वार्थमनुमानं· परार्थानुमानं च स्वयं धूमेन वह्निं ज्ञात्वा परबोधनार्थं यत्र पंचावयववा
क्यप्रयोगः तेन प्रयोज्यं परार्थानुमानं· तथाहि पर्वतः पक्षः वह्निमानिति साध्यं धूमवत्वात्· अयं हेतुः यो यो धूम
वान् सो सोऽग्निमान् यथा महानसः अयं दृष्टांतः तथा चायं कोऽर्थः वह्निव्याप्यधूमवानयमुपनयः तस्माद्वह्निव्या
प्यधूमवत्वात्· तथा वह्निमानिति निगमनं· अनेन वाक्येन प्रतिपादितात्पंचरूपोपपन्नलिंगात्· अपरोपि· द्वि
तीयोपि अग्निं प्रतिपद्यते तेन कारणेन एतत्परार्थानुमानं· परार्थानुमाने धूमवत्वं हेतुः स चान्वयव्यतिरेकी· को
ऽर्थः यत्रान्वयव्याप्तिर्वर्त्तते व्यतिरेकव्याप्तिरपि सोऽन्वयव्यतिरेकी· यत्र धूमस्तत्राग्निर्यथा महानसे इत्यन्वयव्या
प्तिः यत्र वह्निर्नास्ति तत्र धूमो नास्ति यथा महाह्रदे इति व्यतिरेकव्याप्तिः व्याप्तिद्वयं च धूमे वर्त्तते· व्यतिरेकव्या

५६ ह्रेस्त्वयंक्रमः अन्वयव्याप्तौ व्याप्यं धूमः तदभावः व्यतिरेकव्याप्तौ व्यापकः अन्वयव्याप्तौ व्यापकं वह्निः त
दभावः व्यतिरेकव्याप्तौ व्याप्य इति · तदुक्तमुदयनाचार्यैः भावयोर्धूमवह्न्योः यादृक् व्याप्यव्यापकभाव उच्यते ·
तयोरभावयोः कोर्थः धूमाभाववह्न्यभावयोः तस्माद्भावाद्विपरीतः प्रतीयते · अन्वयव्याप्तौ साधनं नाम हेतुः स
व्याप्यः साध्यं व्यापकं साध्याभावः अन्यथा व्यतिरेकव्याप्तौ व्याप्यः हेत्वभावः व्यापकः व्याप्यस्य वचनं प्रथ
मतः व्यापकस्य वचनं पश्चात् एवं प्रकारेण परिष्कृता व्याप्तिः तत्वतः स्फुटी भवति · तदेवं धूमवत्वे हेतौ अन्व
यव्यतिरेकव्याप्तिरस्ति · यत्र वा क्वचिद्धूमे केवलमन्वयव्याप्तिरेव दृश्यते यत्र धूमस्तत्राग्निरिति · तत्र एकेनैव चरि
तार्थता नाम अनुमित्युत्पत्तेः तत्रान्वयस्यावक्रत्वात् प्रदर्शनं · व्यतिरेकव्याप्तेर्वक्रत्वात् प्रदर्शनाभावः तत्र न्यायः
ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेण साधनायोगात् · विद्यमानाया व्यतिरेकव्याप्तेर्वक्रत्वात् प्रदर्शनाभावः एवं धू
मवह्न्योपि अन्वयव्यतिरेकी हेतुर्द्रष्टव्यः स च यथा घटः अनित्यः कृतकत्वात् · यत्कृतकं तदनित्यं यथा पटः ५६

इत्यन्वयव्याप्तिरुभयव्याप्तिसत्वात् · अन्वयव्यतिरेकी कृतकत्वं हेतुः कश्चिद्धेतुः केवलव्यतिरेकी · तद्यथा · जीवच्छ
रीरं सात्मकं प्राणादिमत्वात् · यत्सात्मकं न भवति तत्प्राणादिमन्न भवति · यथा[illegible] घटः न तथा चायं · कोऽर्थः सा
ध्याभावव्यापकाभावप्रतियोगिमन्न भवतीति न तस्मात्तथा · कोऽर्थः साध्याभावव्यापकाभावप्रतियोगिमत्वा
त्साध्यवदिदं · ननु अयं दृष्टान्तो न संभवति कुतः घटे सात्मकत्वाभावो वक्तव्यः स च न संभवति कुतः आत्मनो व्या
पकत्वेन घटे सात्मकत्वसत्वात् · सात्मकत्वं नाम आत्मना सह वर्त्तमानं सात्मकं तस्य भावः सात्मकत्वं[illegible] तच्च
घटे वर्त्तते · तदभावाभावात् · कथं घटस्य व्यतिरेकदृष्टान्तत्वमिति चेन्न · इच्छासमवायीकारणसंयोगावच्छेदक
त्वस्य विवक्षितत्वात् · तच्च घटे नास्ति · कथं इच्छायाः समवायीकारणीभूतो यः संयोगः तदवच्छेदकं शरीरं · शरीराव
च्छिन्ने आत्मनि आत्ममनःसंयोगे विद्यमाने इच्छोत्पत्तेरिति कृत्वा शरीरमवच्छेदकं · तच्च सात्मकत्वं घटे नास्ति · घटाव
च्छिन्ने आत्मनि मनःसंयोगे विद्यमाने इच्छानुत्पत्तेः इति कृत्वा घटे सात्मकत्वाभावो वर्त्तते · प्राणादिमत्वाभावोपि

५१ वर्त्तते इति कृत्वा घटस्य व्यतिरेकदृष्टांतत्वं · अत्रान्वयव्याप्तेरभावः यत्प्राणादिमत्तत्सात्मकं · यथा अमुक इति दृष्टां
तो नास्ति · जीवच्छरीरं दृष्टांतो वक्तव्यः स च न संभवति · तस्य पक्षत्वात् · पक्षभिन्नस्यैव दृष्टांतत्वात् · इति सात्मकत्वे हे
तुः केवलव्यतिरेकी · अन्योपि केवलव्यतिरेकी · पृथिवीलक्षणं गंधवत्वं · व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनं ·
इदं पृथिवीति व्यवहर्त्तव्यं गंधवत्वात् · यन्न पृथिवीति व्यवह्रीयते तन्न गंधवत् · यथा आपः यद्गंधवत्तत्पृथिवी
ति व्यवहर्त्तव्यमिति दृष्टांताभावात् · पृथिवीमात्रस्य पक्षीकृतत्वात् · अपरोपि केवलव्यतिरेकी · प्रत्यक्षादि
प्रमाणमिति व्यवहर्त्तव्यं प्रमाकरणत्वात् · यत्प्रमाणमिति न व्यवह्रीयते न तत्प्रमाकरणं · यथा प्रत्यक्षाभासो
नाम दूरे तेजसि जलबुद्धिस्तद्वत् · यत्प्रमाकरणं तत्प्रमाणमिति व्यवहर्त्तव्यमिति दृष्टांतो नास्ति · प्रमाणमात्र
स्य पक्षत्वात् · पक्षातिरिक्तान्वयदृष्टांताभावात् · तस्मादयं केवलव्यतिरेकी · अत्र प्रमाणं पक्षः व्यवहारः सा
ध्यः न तु प्रमाणत्वं तस्य प्रमाकरणत्वाद्धेतोरभेदेन साध्याभेददोषप्रसंगः कोर्थः हेतुसाध्ययोरभेदे साध्य ५१

वद्धेतोरपि संदिग्धत्वं स्यात् · तथा च सति तस्य साध्यसाधकत्वं न स्यात् · निश्चितस्यैव हेतोः साध्यसाधकत्वात् · इत्या
दयः केवलव्यतिरेकिणो दर्शिताः कश्चिद्धेतुः केवलान्वयी यथा घटोऽभिधेयः प्रमेयत्वात् · यत्प्रमेयं तदभि
धेयं · यथा घटः तथा चायं कोर्थः अभिधेयत्वव्याप्यप्रमेयत्ववान् घटः तस्मादभिधेयत्वव्याप्यप्रमेयत्वात्तथा ·
कोर्थः अभिधेयः अयं केवलान्वयी · यदभिधेयं न भवति तत्प्रमेयं न भवति यथा अमुक इति दृष्टांताभावात् · प्रमा
णसिद्ध एवार्थो दृष्टांतः स च प्रमेयोऽभिधेयश्चेति · तस्मात्प्रमेयत्वं हेतुः केवलान्वयी · केवलव्यतिरेकी · अन्वयव्य
तिरेकी · हेतुत्रयमध्ये यो हेतुः अन्वयव्यतिरेकी धूमादिः स पंचरूपोपपन्न एव स्वसाध्यं वह्निं साधयितुं समर्थो भ
वति · न त्वेकेनापि रूपेण हीनः तानि पंचरूपाणि पक्षधर्मत्वं सपक्षे सत्वं विपक्षाद्व्यावृत्तिरबाधितविषयत्वं अस
त्प्रतिपक्षत्वं चेति तानि पंचरूपाणि अन्वयव्यतिरेकिणि धूमे विद्यंते · पक्षधर्मत्वं नाम धूमस्य पर्वते विद्यमानत्वं ·
सपक्षे महानसे धूमस्य सत्वं · सपक्षे सत्वं · विपक्षान्महाह्रदात् धूमस्य व्यावृत्तिः विपक्षाद्व्यावृत्तिः एवं धूमेऽबा

५९ धितविषयत्वं· कथंधूमस्यहेतोर्विषयःसाध्योधर्मः अग्निःसचकेनापिप्रमाणेनाबाधितएतद्व्याख्यानंनखंडित
मित्यर्थः एवमसत्प्रतिपक्षोयस्येत्यसत्प्रतिपक्षः धूमवत्वं· साध्यविपरीतसाधकंहेत्वंतरंसत्प्रतिपक्षः सचधूम
वत्वेहेतौनास्त्येववह्न्यभावसाधकस्यहेत्वंतरस्यानुपलंभात्· यतोधूमवत्वेहेतौपंचरूपाणिविद्यंते· ततोधूम
वत्वमग्निमत्वंसाधयति· अग्नेःपक्षधर्मत्वंहेतोःपक्षधर्मताबलात्सिध्यति· अनुमानस्यद्वेअंगेव्याप्तिःपक्षधर्मता
च· व्याप्त्यासामान्याकारेणसाध्यसिद्धिःपक्षधर्मताबलात्साध्यस्यपक्षसंबंधित्वविशेषःसिध्यतिःपक्षधर्मेण
धूमेनवह्निरपिपर्वतसंबद्धएवानुमीयते· अन्यथासामान्याकारेणसाध्यसिद्धिःव्याप्तिग्रहादेवता अनुमानंव्य
र्थंस्यात्· तस्मात्पक्षधर्मताबलात्विशेषसिद्धिरिति· धूमवत् अन्योपि अन्वयव्यतिरेकीहेतुःसपंचरूपोपन्न
एवस्वसाध्यंसाधयितुंक्षमतेनत्वेकेनरूपेणहीनःसयथा· शब्दोऽनित्यःकृतकत्वात्· यत्रकृतकत्वंतत्रानित्य
त्वं· यथाघटइत्यन्वयव्याप्तिः यत्रानित्यत्वाभावस्तत्रकृतकत्वाभावःयथाआकाशइतिव्यतिरेकव्याप्तिः ५९

अन्वयव्यतिरेकिणःपंचरूपोपन्नत्वाभावेहेत्वाभासत्वं· विशेषोऽभिधेयःप्रमेयत्वात्· अयंकेवलान्वयि· एतस्यवि
पक्षाद्व्यावृत्तिर्नास्तीविपक्षाभावात्· कोऽर्थःसाध्याभाववान्विपक्षःसाध्यमभिधेयत्वंतदभाववान्विपक्षोवक्तव्यः
अभिधेयत्वाभावाप्रसिद्धेःतस्माद्विपक्षाभावादेवविपक्षाद्व्यावृत्तिर्नास्तीत्यर्थःजीवच्छरीरंसात्मकंप्राणादिमत्वात्
अयंकेवलव्यतिरेकी· एतस्यसपक्षेसत्वंनास्ति· सपक्षाभावात्· कथंनिश्चितसाध्यवान्सपक्षःसात्मकत्वंसाध्यंत
स्यनिश्चयःपक्षातिरिक्तेकुत्रापिनास्तीतिसपक्षाभावःअयमपिचतुरूपोपन्नएवस्वसाध्यंसाधयतीत्यर्थःपक्षस
पक्षविपक्षलक्षणान्युच्यंते· संदिग्धसाध्यधर्माधर्मीपक्षःकोऽर्थःसंदिग्धःसाध्यरूपोधर्मोयस्यससंदिग्धसा
ध्यधर्मा· सचासौधर्मीचेतितथोक्तःयथापर्वतःपक्षःकथंसाध्यंवह्निःसचपर्वतेसंदिग्धोस्तीतिकृत्वापर्वतःपक्षः
पक्षोलक्ष्यःसंदिग्धेतिलक्षणंपक्षलेत्यादिज्ञेयं· धर्मवान्पक्षःएवंचेत्तर्हिघटेऽव्याप्तिःसघटत्वधर्मवान्भवति· । ति
अतउक्तंसाध्यधर्मवानिति· घटेघटत्वस्यनिश्चितत्वेनसाध्यधर्मत्वाभावात्नातिव्याप्तिःएवंचेत्तर्हिसपक्षेमहा

५९ नसेऽतिव्याप्तिः महानसः वह्निरूपसाध्यधर्मवान्‌भवति· अतस्तत्रातिव्याप्तिः अतो वक्ति संदिग्धेति· महानसे सा
ध्यसंदेहाभावात्‌नातिव्याप्ति· एवं चेत्तर्हि पक्षलक्षणे गोष्ठेऽतिव्याप्तिः तस्यापि संदिग्धसाध्यवत्वात्‌ अतिव्याप्तिः न
तो धर्मपदमुपात्तं· गोष्ठो यद्यपि संदिग्धसाध्यवान्‌भवति तथापि धर्मी न भवति धर्मित्वं नाम प्रकृतानुमितिप्रयोज
कीभूतसंदेहविशेष्यत्वं प्रकृतानुमितिः पर्वतो वह्निमानित्येवाकारा तत्प्रयोजकीभूतो नाम तत्कारणीभूतो यः
संदेहः पर्वतो वह्निमान्नवेति तद्विशेष्यत्वं पर्वतस्यवर्त्तते न गोष्ठस्येति नातिव्याप्तिः सपक्षलक्षणमाह निश्चित
साध्यवान्‌धर्मी सपक्षः यथा महानस इति· अत्र धर्मिपदं स्पष्टार्थं· पक्षेतिव्याप्तिपरिहारार्थं निश्चितेति पदं· विप
क्षलक्षणमाह· निश्चितसाध्याभाववान्‌विपक्षः यथा पर्वते महाहृद इति लक्षणे पदकृत्यं· पक्षे अतिव्याप्तिवा
रणार्थं निश्चितसाध्याभाववानिति· पक्षे संदिग्धसाध्यवत्वात्‌नातिव्याप्तिः तदेवं केवलान्वयी केवलव्यतिरेकी
अन्वयव्यतिरेकिणो दर्शिताः एभ्योऽन्ये हेतवः हेतुवदवभासमानाः हेत्वाभासाः तेचासिद्धविरुद्धानैकान्तिकप्र ५९

करणसमकालात्ययापदिष्टभेदात्पंचैव· तत्रासिद्धस्त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति· तत्राश्रया
सिद्धोदाहरणं· गगनारविंदं सुरभि अरविंदत्वात्‌· सरोजारविंदवत्‌· अत्र गगनारविंदं आश्रयः स च नास्त्येवेति केशवमि
श्रेणोक्तं तन्न संभवति· गगनारविंदस्याप्रसिद्धत्वेनाप्रसिद्धप्रतियोगिकाभावासंभवात्‌· नेदं तदुदाहरणं· अत्रोच्य
ते· आश्रयविशेषणाप्रसिध्या आश्रयासिद्धिरिति केशवमिश्राणामाशयः प्रकृते चारविंदत्वहेतोराश्रया अरविंदं
तत्र गगनीयत्वरूपविशेषणाप्रसिध्या आश्रयासिद्धः गगनीयत्वं शाह्रे प्रसिद्धं तदभावः अरविंदे उच्यते· न कोपिवि
रोधः स्वरूपासिद्धोदाहरणं शब्दः अनित्यश्चाक्षुषत्वाद्घटवदिति· अत्र चाक्षुषत्वं हेतुः स च शब्दे नास्त्येव तस्य
श्रावणत्वात्‌· अतो पक्षावृत्तित्वेन चाक्षुषत्वं हेतुः स्वरूपासिद्धः व्याप्यत्वासिद्धस्तु द्विविधः एको व्याप्तिग्राहकः प्रमा
णाभावात्‌· अपरस्तु उपाधिसद्भावात्तत्र व्याप्तिग्राहकप्रमाणाभावात्‌ व्याप्यत्वासिद्धोदाहरणं यत्सत्तत्क्षणिकं।
यथा घनः सश्चशब्दादिः न च सत्वक्षणिकत्वयोर्व्याप्तिग्राहकं प्रमाणमस्ति न च सत्वस्य हेतोरुपाधिसद्भावादेव व्या

६०

व्याप्यत्वासिद्धत्वमिति वाच्यं · न हि लौकिकत्वसाध्यस्य उपाधिप्रयुक्तत्वस्यात् न चेत् इत्ति · उपाधिसद्भावात् व्याप्यत्वासि
द्धो यथा · यागीया हिंसा अधर्मसाधनं हिंसात्वात् क्रतुबाह्यहिंसावदिति · अत्र निषिद्धत्वमुपाधिः एतस्य उपाधिलक्ष
णाक्रांतत्वेनोपाधित्वं · यथा वर्त्तते तथोक्तं प्राक् · तस्माद्धिंसात्वं हेतुरुपाधिसद्भावाद्व्याप्यत्वासिद्धः ।। विरुद्धलक्षणमा
ह साध्यविपर्ययव्याप्तो हेतुर्विरुद्धः कोऽर्थः साध्यस्य यो यं विपर्ययः साध्याभावः तेन व्याप्तो हेतुर्विरुद्धः तस्योदाह
रणमाह · शब्दो नित्यः कृतकत्वादित्यत्र साध्यं नित्यत्वं तस्य विपर्ययोऽनित्यत्वं तेन सह कृतकत्वहेतोर्व्याप्तेर्विद्यमा
नत्वात् · यत्कृतकं तदनित्यमिति अतो विरुद्धं कृतकत्वमिति · व्यभिचारवान् हेतुरनैकांतिकः स द्विविधः साधारणा
नैकांतिको असाधारणानैकांतिकश्चेति · तत्र साधारणानैकांतिको नाम पक्षसपक्षविपक्षवृत्तिः तस्योदाहरणं ·
शब्दो नित्यः प्रमेयत्वात् व्योमवदिति · प्रमेयत्वं हेतुः पक्षे शब्दे वर्त्तते सपक्षे नित्ये व्योमादौ वर्त्तते विपक्षे अनित्ये घटा
दौ वर्त्तते इति कृत्वा पक्षत्रयवृत्तित्वात् साधारणानैकांतिकः असाधारणानैकांतिकस्तु सपक्षविपक्षाभ्यां व्यावृत्तः ६०

पक्ष एव वर्त्तते सोऽसाधारणः तदुदाहरणमाह भूर्नित्या गंधवत्वात् गंधवत्वं सपक्षान्नित्याद्व्योमादेर्व्यावृत्तं · विपक्षाज्जला
देर्व्यावृत्तं पक्षीभूतायां भुवि वर्त्तते · इति कृत्वा असाधारणः प्रकरणसमलक्षणमाह · यस्य हेतोः साध्यविपरीतसाध
कं नाम साध्याभावसाधकं हेत्वंतरं विद्यते स प्रकरणसमः तदुदाहरणं शब्दः नित्यः कृतकत्वाद्घटवत् · अत्र साध्यमनि
त्यत्वं तस्य विपर्ययः अभावो नित्यत्वं तत्साधको हेतुः कः शब्दः नित्यः श्रावणत्वात् शब्दत्ववदिति · अयं सत्प्रतिपक्ष
उच्यते॰ एवमन्यत्र ज्ञेयं · बाधलक्षणमाह · पक्षे प्रमाणांतरावधृतसाध्याभावो हेतुर्बाधितविषयः कालात्ययापदि
ष्ट इत्युच्यते · बाधकालात्ययापदिष्टयोः पर्यायतैव · तदुदाहरणं · वह्निरनुष्णः कृतकत्वात् · अयं बाधितविषयः क
थं · कृतकत्वस्य हेतोः विपर्ययः साध्यो धर्मः अनुष्णत्वं तस्य अभावः उष्णत्वं तच्च स्पार्शनप्रत्यक्षेणैवावधारितं · इति असद्धेतुः
कृत्वा अयं हेतुर्बाधित इति · एतद्धेत्वाभासान्यतरवान् हेतुः असद्धेतुः एतत्पंचकशून्यो यो हेतुः स सद्धेतुरिति तत्वं ·
इति न्यायसंग्रहे अनुमानपरिच्छेदः अनुमानानंतरमुपमानस्योद्दिष्टत्वादनुमाननिरूपणानंतरमुपमानंनि

दी१ ख्यते। तत्रोपमानलक्षणं अतिदेशवाक्यार्थसहकृतं गोसादृश्यविशिष्टपिंडज्ञानमुपमानं। कोऽर्थः तद्यदित्यतिदेशः इ
स२ तिसामान्यतः विशेषस्तु गोसदृशो गवय इत्यतिदेशवाक्यं तस्य अर्थः गोसादृश्यं तस्य स्मरणं तत्सहकृतं यद्गोसादृश्यं
विशिष्टपिंडज्ञानं तदुपमानं। उपमानं लक्ष्यं इत्यर्थः लक्षणं। लक्षणे तान्येवेत्यादि ज्ञेयं। ज्ञानमुपमानमित्येवास्तु
एवं चेत्तर्हि वंध्यापुत्रज्ञाने अतिव्याप्तिः तदर्थं पिंडज्ञानेति पिंडज्ञानशब्देन प्रमाणसिद्धपदार्थज्ञानं वंध्यापुत्रस्य
प्रमाणसिद्धत्वाभावात्। तज्ज्ञाने नातिव्याप्तिः एवं चेत्तर्हि अयं घट इति ज्ञाने अतिव्याप्तिः तदपि घटरूपपिंडज्ञानं भ
वति ततो वक्ति सादृश्येति। अयं घट इति यद्यपि पिंडज्ञानं तथापि सादृश्यविशिष्टो यः पिंडस्तज्ज्ञानं न भवति अतो
नातिव्याप्तिः एवं चेत्तर्हि एतदन्यघटसदृशः अयं घट इति प्रत्यक्षज्ञाने अतिव्याप्तिः अतो गोसादृश्येति। तत्र गोसा
दृश्यविशिष्टपिंडज्ञानाभावा अतिव्याप्तिः एवं चेदेतद्गोसदृशोऽयं गौरिति प्रत्यक्षज्ञाने अतिव्याप्तिः ततो वक्ति अति
देशवाक्यार्थस्मरणसहकृतेति। तस्यातिदेशवाक्यार्थस्मरणसहकृतत्वाभावात् नातिव्याप्तिः उपमानस्वरूपमाह। दी१

ग्रामस्थः पुरुषः स्वयं गवयमजानन् वनस्थं पुरुषं प्रति प्रश्नं करोति कीदृग्गवय इति वनस्थेनोत्तरितं गोसदृशो गवय इ
ति तद्वाक्यं श्रुत्वा नगरस्थो वनं गतः गोसदृशो गवय इति वाक्यं स्मरन् यदा गोसादृश्यविशिष्टपिंडं पश्यति तदा तद्वाक्या
र्थस्मरणसहकृतगोसादृश्यविशिष्टपिंडज्ञानमुपमानं। उपमानं करणं। शक्तिग्रहरूपावांतरव्यापारः अयं गवयशब्दवा
च्यः पिंड इति संज्ञासंज्ञिसंबंधिप्रतीतिरुपमितिः सैव फलं। इति न्यायसंग्रहे उपमानपरिच्छेदः उपमानोद्देशानंतरं शब्दप्र
माणस्योद्दिष्टत्वाच्छब्दप्रमाणलक्षणमाह। आप्तवाक्यं शब्दः अत्र लक्षणद्वयं ज्ञेयं अन्यथा आप्तपदवैयर्थ्यापत्तेः वक्ष्य
माणवाक्यलक्षणाभावेन अनाप्तवाक्येऽतिव्याप्तेरभावात् पदवैयर्थ्यापत्तेः तथा चाप्तशब्दः प्रमाणशब्द इत्येकं लक्षणं। वा
क्यं शब्दः प्रमाणशब्द इत्यपरं। लक्षणे अनाप्तशब्देऽतिव्याप्तिवारणार्थं उभयलक्षणे उभयविशेषणकृत्यं ज्ञेयं। आप्तलक्ष
णमाह। यथाभूतार्थस्योपदेष्टा पुरुषः आप्तः कोऽर्थः यथाभूतो नाम यथा प्रकाश्यते तथैव कालांतरे विद्यमानः एतादृशार्थ
स्य यः उपदेष्टा स आप्त इत्यर्थः लक्षणे तान्येवेत्यादि ज्ञेयं। पुरुष आप्तः एवं चेत्तर्ह्यनुपदेष्टरि पुरुषे अतिव्याप्तिस्ततो व

६२ किंतुपदेष्टेतितत्[illegible]रिव्याप्तिः एवंचेत्तर्हिनाप्तोऽतिव्याप्तिः अनाप्तः घटस्थानेपटस्योपदेष्टाभवतिसकि
माप्तः आप्तोनभवतिअतोऽतिव्या[illegible]र्थयथाभूतेतितस्ययथाभूतार्थोपदेष्टत्वाभावात्नातिव्याप्तिः वाक्यलक्ष
णमाह· आकांक्षा[illegible]संनिधिमतांपदानांसमूहः [illegible]स्यपदस्ययत्पदव्यतिरेकेणस्वार्थान्वयाननुभावकत्वमाकां
क्षा· बाधकप्रमाविरहोयोग्यता· अविलंबेनान्वयप्रतियोग्युपस्थितिरासत्तिः एतत्त्रितयवंतियानिपदानितेषां
समूहोवाक्यमित्यर्थः लक्षणेतान्येवेत्यादिक्षेयं· अत्रेतावंतिपदानिकिमर्थंग्राह्याणि· समूहोवाक्यमेवंचेत्तर्हिघट
पटसमूहेऽतिव्याप्तिः ततष्पदानामितिपदमुपात्तंसयद्यपिसमूहोभवतितथापिपदानांसमूहोनभवतिअतस्तत्र
नातिव्याप्तिः पदसमूहोवाक्यमित्युच्यमानेगोः अश्वः पुरुषः हस्तीतिपदसमुदायेतिव्याप्तिः ततोवक्ति आकांक्षेति· गो
रश्वइत्यादौपरस्पराकांक्षाभावात्नातिव्याप्तिः एवंचेत्तर्हिवह्निनासिंचेदितिवाक्येऽतिव्याप्तिः तदपिआकांक्षावत्स
मुदायवत्भवतिअतोवक्तियोग्यतावदितितस्मिन्वाक्येयोग्यतायाः अभावात्· नातिव्याप्तिः कथंयोग्यताभावः तत्रो ६२

च्यते॰ अग्निनेतितृतीययासेकरूपंकार्यंप्रतिअग्नेः करणत्वप्रतिपादितंनचाग्निः सेकेकरणीभवितुंयोग्यः तेन
नकार्यकारणभावलक्षणः संबंधः अग्निसेकयोरयोग्यत्वात्॰ कोर्थः बाधकप्रमाणविरहरूपयोग्यतायाअभा
वात् नातिव्याप्तिः एवंचेत्तर्हिएकैकप्रहरेउच्चारितानिगामितिप्रहरेआनयेतिद्वितीयेशुक्लामितितृतीयेदं
डेनेतिचतुर्थेउच्चारितेषुपदेषुअतिव्याप्तिः तत्रपरस्पराकांक्षायोग्यतयोःसत्वात्॰ अतोवक्ति॰ संनिधिमता
मिति॰ तत्रव्यवहितत्वेनपरस्परसांनिध्याभावात्॰ नातिव्याप्तिः तस्मादाकांक्षायोग्यतासंनिधिवंतिपदा
नितेषांसमूहोवाक्यंतत्रवेदस्थलेज्योतिष्टोमेनस्वर्गकामोयजतेतिवाक्यं॰ लौकिकवाक्यंनदीतीरेपंचफलानि
संतीति॰ अथप[illegible]विशे[illegible]च्चारिताः[illegible]कोयम[illegible]येत्यादीतिवाक्यं॰ ननुपदेपरस्पराकांक्षानास्ति कथं।
फलपदस्यअर्थः फलंतस्य[illegible]अयोयमर्थः तीरंतदपेक्षात्वात्फलस्याधेयत्वात्तीरस्याधारत्वात्॰
अर्थयोरेवपर[illegible]क्षा[illegible]योः विचार्यमाणेपदार्थयोरप्याकांक्षानास्तिपदार्थानामचेतनत्वेनाकां

ईन्र क्षायाः अभावात्। आकांक्षाया इच्छात्मकत्वेन चेतनधर्मत्वात् इति चेन्न। अर्थे आकांक्षा उपचरिता अर्थवाचक
पदश्रोतरि पुरुषे आकांक्षाजनकत्वेन साकांक्षा इत्युच्यंते। अर्थद्वारेणार्थवाचकपदानि साकांक्षाणीत्युप
चर्यते। अथवा पदान्येवार्थप्रतिपाद्यार्थांतरविषयाकांक्षा पुरुषस्य जनयंत्युपचारात्साकांक्षाणि। कुतः सा
कांक्षपदप्रतिपाद्यत्वात् अर्था अपि साकांक्षा इत्युच्यंते। परस्परान्वययोग्या उच्यंते। तद्द्वारेण पदान्यपि यो॰
ग्यानीत्युच्यंते। अविलंबेनोच्चरितत्वलक्षणं संनिहितत्वं तच्च साक्षादेव पदेषु संभवति न अर्थद्वारा। तथा
चायमर्थः अर्थप्रतिपादनद्वारा श्रोतुः पुरुषस्य पदांतरविषयामर्थांतरविषयां वा आकांक्षां जनयतां प्र
तीयमानः परस्परमन्वययोग्यो योऽर्थस्तत्प्रतिपादकानामविलंबेनोच्चारितानां पदानां समूहो वाक्यं।
पदलक्षणमाह। पदं च वर्णसमूहः नन्वकारो वासुदेवः स्यान्मकारः शिव उच्यते इत्यत्रैकवर्णपदेऽव्याप्तिस्त
त्र वर्णसमुदायाभावादिति चेन्न। एकवर्णपदभिन्नपदस्यैव लक्षणत्वान्नाव्याप्तिर्ननु वर्णसमूहोऽपि न संभ ईन्र

वति वर्णानां क्रमवतां आशुतरविनाशित्वेनैकदाऽनेकवर्णसमूहाभावादिति चेत् न एकज्ञानविषयत्वस्य
समूहशब्दवाच्यत्वात्। तत्र शाब्दबोधसामग्री उच्यते। वर्णज्ञानं पदज्ञानं शक्तिज्ञानं ततः परं। पदार्थोपस्थि
तिः पश्चादाकांक्षादेश्च धीमतः पुनः पदानां स्मरणं समूहालंबनात्मकं। ततो भवति वाक्यार्थबुद्धिः संसर्ग
गोचरा २ ननु वर्णानां क्रमवतामाशुतरविनाशित्वेन एकदाऽनेकवर्णविषयोऽनुभव एव कथमिति
चेत् न पूर्वपूर्ववर्णानुभवैर्जनिता ये संस्कारा अंत्यवर्णश्रवणकाले संति तैः सहकृतेनांत्यवर्णसंबद्धेन
पदव्युत्पादनसमयो नाम शक्तिस्तस्य ग्रहो नाम शक्तिज्ञानं तेनानुगृहीतेन श्रोत्रेंद्रियेण एकदैव सदसद
नेकवर्णावगाहिनी पदप्रतीतिर्जन्यते सहकारिसामर्थ्यात्। अत्र दृष्टांतमाह। प्रत्यभिज्ञाप्रत्यक्षवदिति तस्या त्य३
यमर्थः सोऽयं देवदत्त इति प्रत्यभिज्ञानं तच्च संस्कारेंद्रियसंयोगाभ्यां जायते तत्रेंद्रियस्य संस्कारः सहकारी ए
वमत्र पूर्ववर्णसंस्कारसहितेन श्रोत्रेंद्रियेण सदसदनेकवर्णविषयं ज्ञानं जन्यते तत्पदज्ञानं तदनंतरं पदा

र्थशक्तिग्रहः तदनंतरं पदार्थज्ञानं ततआकांक्षादिज्ञानं तदनंतरं पूर्वपूर्वपदानुभवजनितसंस्कारसहि
तेनांत्यसंबद्धेन श्रोत्रेंद्रियेण पदार्थज्ञानसहितेनानेकपदावगाहिनी वाक्यप्रतीतिः क्रियते तदिदं वा
क्यमाप्तपुरुषेण प्रयुक्तं शाब्दनामकं प्रमाणं॰ अस्य वाक्यार्थज्ञानं फलं॰ तथा च लौकिकोपि शाब्दः प्रमाणं॰
तत्र विशेषः वैदिकं वाक्यं सर्वं प्रमाणं॰ सर्वस्येश्वररूपाप्तवाक्यत्वात्॰ ननु लौकिकं॰ तथा लोके आप्तोऽ
नाप्तश्चेति द्विविधः पुरुषः तत्राप्तवचनं प्रमाणं॰ अनाप्तवचनमप्रमाणमिति तत्वं॰ इति शाब्दः परिच्छेदः
समाप्तः ॰ वर्णितानि चत्वारि प्रमाणानि॰ एभ्योऽन्यत्प्रमाणं नास्तीति प्रामाण्यस्य सतोत्रैवांतर्भावात्॰
तानि प्रमाणानि॰ प्रत्यक्षमेकं चार्वाकाः कणादसौगतौ पुनः अनुमानं च तच्चापि सांख्याः शाब्दं च ते अपि॰
न्यायैकदेशिनोप्येवमुपमानं च केचन॰ अर्थापत्त्या सहितानि चत्वार्याहुः प्रभाकराः अभावषष्ठान्येतानि
भाट्टा वेदांतिनस्तथा॰ संभवऐतिह्ययुक्तानि तानि पौराणिका जगुः तत्र प्रभाकरः शंकते अर्थापत्तिः । ६४

स्वतंत्रं प्रमाणमस्तीति॰ अर्थापत्तेर्लक्षणमाह॰ अनुपपद्यमानार्थदर्शनात्तदुपपादकभूतमर्थांतरकल्प
नमर्थापत्तिरिति तदुपपादयति॰ पीनो देवदत्तः योगिरोगिभिन्नः दिवा न भुंक्ते इति स्वयं दृष्टं अथवा आ
प्तवचनात्श्रुतं तत्र रात्रिभोजनं कल्प्यते कथं दिवा अभुंजानस्य पीनत्वं रात्रिभोजनमंतरेण नोप
पद्यतेऽतः पीनत्वान्यथानुपपत्त्या रात्रिभोजनं कल्प्यते तत्र प्रमाणमर्थापत्तिरेव सा च प्रत्यक्षा
दिभ्यो भिन्ना रात्रिभोजनस्यानुमानाद्यविषयत्वादिति प्राभाकराः नैतत्साधु॰ अर्थापत्तेरनुमानां
तर्भावात्तत्कार्यस्यानुमानेनैव सिद्धत्वात्पृथक्प्रमाणत्वाभावात् तथाहि॰ अयं देवदत्तः रात्रौ भुं
क्ते दिवा अभुंजानत्वे सति पीनत्वात् यस्तु रात्रौ न भुंक्ते नासौ दिवा अभुंजानत्वे सति पीनः यथा दि
वा रात्रावभुंजानोऽपीनः कृशः न चायं तथा कोऽर्थः साध्याभावव्यापकाभावप्रतियोगिमत्त्वं भवतीति
न तस्मात्तथेति कोऽर्थः साध्याभावव्यापकाभावप्रतियोगिमत्त्वात्साध्यवानिति केवलव्यतिरेकि

६५ नुमानेनैव रात्रिभोजनस्य कल्पनीयमानत्वात् किमर्थमर्थापत्तिः कल्पनीयेति० इत्यर्थापत्तिखंडनं ०।
भाट्टानां मतमाह० अभावग्रहणाय अभावाख्यं पृथक्प्रमाणमंगीकरणीयमिति० तथाहि घटोऽनु
पलब्धा कोऽर्थः घटोपलब्ध्यनुपलब्ध्या घटाभावो गृह्यते तेन स्वतंत्राभावप्रमाणेन घटाभावो गृ
ह्यते तन्न० यद्यत्र घटोऽभविष्यत्तर्हि भूतलमिवाद्रक्ष्यदित्यादितर्कसहकारिणानुपलंभसनाथेन
प्रत्यक्षप्रमाणेंद्रियेणाभावग्रहात्० नन्विंद्रियेणाभावग्रहणं न संभवति इंद्रियाभावयोः संबंधा
भावात्० असंबंधस्येंद्रियस्याग्राहकत्वात्० इंद्रियाणां वस्तुप्राप्यकारित्वनियमात् तथाहि० इं
द्रियाणि वस्तु प्राप्य प्रकाशकानि० ज्ञानकरणत्वात्० आलोकवत्० यद्वा चक्षुःश्रोत्रे वस्तु प्राप्य प्रका
शकारिणी० कोऽर्थः ज्ञानजनकेंद्रियत्वात्० त्वगादिवत्० न च दृष्टांतासिद्धिरिति वाच्यं० त्वगादीनां प्रा
प्यकारित्वस्योभयवादिसिद्धत्वात्० इत्थं चेंद्रियाभावयोर्न संबंधः संयोगः द्रव्ययोरेव संयोगात्० ६५

अभावस्य द्रव्यत्वाभावात् नापि समवायः चक्षुरभावयोरयुतसिद्धत्वाभावात्० अयुतसिद्धयोः संबंधः स
मवाय इत्युक्तत्वात्० ननु चक्षुरभावयोर्विशेषणविशेष्यभाव एव संबंध इति चेत् न तस्य संबंधत्वाभावा
त्० संबंधस्वरूपं चेदं० संबंधो हि संबंधिभ्यां भिन्नः तदुभयसंबंध्याश्रितश्चैकश्च० यथा भेरीदंडसंयो
गः भेरीदंडाभ्यां भिन्नः तदुभयाश्रितः कोऽर्थः भेरीदंडाश्रितः एकश्च विशेषणविशेष्यभावः विशेषण
विशेष्यस्वरूपाभ्यां भिन्नो भवति विशेषणविशेष्यभावत्वाच्च तथाहि० दंडपुरुषयोर्विशेषणविशेष्य
भावः दंडपुरुषाभ्यां न भिद्यते कुतः दंडे विशेषणत्वं नार्थांतरं अपि तु दंडस्वरूपमेव नापि पुरुषे विशेष्य
त्वमर्थांतरमपि तु पुरुषस्वरूपमेव० इत्थं च घटाभाववद्भूतलमित्यत्राभावस्यापि विशेषणत्वात्०
तद्विशेषणत्वमभावस्वरूपात्मकमेव न तु विशेषणत्वमभावनिष्ठो धर्मः अस्तु वाभावनिष्ठो धर्म
इति चेत्० न विशेषणत्वं धर्मः द्रव्याद्यन्यतमरूपो वक्तव्यः स चाभावे नास्ति० अभावस्य द्रव्याद्यन्यत

६६ रूपविशे [illegible] वात्॰ अभा [illegible] धारत्वात्तन्न चद्व्याद्यतिरिक्तमेव विशेषणत्वं तस्याप्रामा
णिक [illegible] त्वेयत्स्वरूपं तदेव विशेषणत्वं न त्वर्थांतरं॰ विशेषणवि
शेष्यभावव [illegible] द्वयोः कार्यकारणभावः संबंधो न भवति तयोः सं
बंध्ययेत्रायःभि॰ तत्वा [illegible] व्यापकत्वं नाम वह्निप्रतिबच्छाया बुद्धिर्वह्निबुद्धिः तज्जनकं यत्स्व
रूपं तदेव व्यापकत्वं न त्वर्थांतरं॰ एवं तत्वादीनां कारणत्वं नाम कार्यानुकूतान्वयव्यतिरेकि स्वरूप
मेव न त्वर्थांतरं॰ तदेवं विशेषणविशेष्यभावो न विशेषणविशेष्यस्वरूपाभ्यां भिन्नः नाप्यतिरिक्तत्वो
भयाश्रितः विशेषणे विशेषणभावो नाम विशेषणत्वं तन्मात्रस्य सत्वात्॰ विशेष्यभावस्य विशेष्यत्व
स्यातिरिक्तत्वाभावात्॰ विशेष्ये च विशेष्यत्वमात्रस्य सत्वात्॰ विशेषणत्वाभावात्॰ तस्माद्विशेषणविशे
ष्यभावो नोभयाश्रितः नाप्येकः विशेषणं च विशेष्यं च तयोर्भाव इति द्वंद्वांते श्रूयमाणो भावशब्दः प्रत्ये ६६

कमभिसंबध्यते॰ तथा च विशेषणभावो विशेष्यभावश्चेत्यापन्नं॰ द्वौ चेत्तौ संबंधश्चैकः तस्माद्विशेषण
विशेष्यभावो न संबंध इति सिद्धं॰ विशेषणविशेष्यभाववत् व्याप्यव्यापकभावकार्यकारणभावादयो न
संबंधाः व्याप्यव्यापकभावादीनां द्वित्वैकवृत्तित्वे नोभयाश्रितत्वाभावात्॰ तयोर्द्वैभेनैकत्वाभावाच्चे
ति॰ ननु तेषां संबंधत्वाभावे संबंधशब्दप्रयोगो न स्यात्॰ वर्त्तते चाभियुक्तानां व्याप्यव्यापभावः संबंधः
कार्यकारणभावः संबंध इति संबंधशब्दप्र[illegible]योग इति चेत्॰ नोपचारेण तत्र संबंधशब्दप्रयोगात्॰
उपचारे बीजं उभयनिरू [illegible] साधर्म्यमेव मुख्यसंबंधः उभयसंबंधिभ्यां निरूप्यः एवं कार्यकार
णभावादयो [illegible] सन्त्वाः प्र [illegible] त्तात्र संबंधशब्दप्रयोगो औपचारिकः यथा सिंहो माण
वकः [illegible] वत [illegible] शौर्यक्रौर्ययोगेन सिंहशब्दः यथा माणवके औपचारि
कः तद्वत् [illegible] धशब्दो औ [illegible] इति॰ तथा चेंद्रियस्याभावेन संबंधाभावात्॰ इंद्रियेणाभा

६१ [illegible]दहात्भावग्रहणार्थमनुपलब्धिरूपमभावप्रमाणमंगीकरणीयमितिचेन्न
[illegible]वं॰अभावंप्रकाशयदिंद्रियंविशेषणविशेष्यभावेनै
[illegible]इंद्रियेणेतिचेत्तत्रविशेषणतायाएवाभावात्यत्रविशे
षणताप्रत्यासत्तिःइंद्रियस्तावन्नैंद्रियेणासंयुक्तज्ञानंजन्यतएव॰असंबंधाभावग्रहेयोदोषउक्तःभट्टै
नसरूभावज्ञानंजन्यतेतर्हिअसंनिहितसकलाभावज्ञानंजन्येतेतिवाच्यं भट्टस्यापिसमानःक
थं॰अनुपलब्धिरूपमभावाख्यंप्रमाणंतेनसहाभावस्यसंबंधाभावात्॰कथंतेनाभावग्रहणमिति॰
तस्मात्त्वव्याघातकंदूषणमदूषणमितितत्त्वं॰अत्राचार्याणांश्लोकः यत्रोभयोःसमोदोषःपरिहारो
पिवासमःनैकःपर्यनुयोक्तव्यस्तादृगर्थविचारेण॰अस्यार्थःयस्मिन्नर्थेवादिप्रतिवादिनोर्विवक्षात
योःसमानोदोषःपरिहारोपिवा॰यत्रसमानस्तत्रएकःनपर्यनुयोक्तव्यःकोर्थःनाशंकनीयःतादृगर्थ ६१

विचारणेन॰इत्यभावखंडनं ॰ प्रमाकरणंप्रमाणमत्रविचार्यते॰प्रामाण्यंद्विविधं॰करणनिष्ठंप्रमानि
ष्ठंच॰तत्रकरणनिष्ठंप्रामाण्यंप्रमाकरणत्वरूपं॰प्रमानिष्ठंप्रामाण्यंतद्विशेष्यकत्वेसतितत्प्रकारकज्ञा
नत्वरूपंप्रामाण्यं॰तत्रप्रमानिष्ठंप्रामाण्यंस्वतोग्राह्यं॰परतोग्राह्यमितिविवादः तत्रैवंवस्तुस्थितिः दूर
प्रदेशेजलज्ञानंपुरुषस्यजातंतस्मिन्जलज्ञानेप्रामाण्यमवधार्यतेपुरुषःकश्चित्प्रवर्त्ततेकश्चित्तुप्रा
माण्यमनवधार्यसंदेहादेवप्रवृत्तः प्रवृत्त्युत्तरकालेजलप्राप्तिलंभेसतितस्यजलज्ञानस्यप्रामाण्यमव
धारयतीति॰अत्रमीमांसकाः प्रथमतएवप्रामाण्यमवधार्यपुरुषःप्रवर्त्ततेस्वतएवप्रामाण्यावधार
णात्॰को[illegible]वतः[illegible]प्रामाण्यमपिगृह्यते॰ननुज्ञानग्राहकाद्भिन्नत्वात् ज्ञानधर्मस्य
प्रामाण्य[illegible]हिकायावतीज्ञानग्राहिकासामग्रीतयातज्ज्ञाननिष्ठंप्रामा
ण्यंगृह्यते॰[illegible]कत्वितयसा[illegible]धारणविधिकोद्यर्थः ज्ञानग्राहकसामग्र्यतिरिक्तसामग्रीग्राह्यत्वं

६९ निषेधक[illegible]विषयि[illegible]तक[illegible]षेधकोटिद्वैयायिकानां । तत्र मुरारीमते त्रिपुटीप्रत्यक्षवादी
नः मिश्रमते ज्ञानग्राहकाया सामग्र्या अनुव्यवसायस्तेनैव प्रामाण्यं गृह्यते । भट्टमते ज्ञानग्राहकाया साम
ग्री ज्ञाततालिंगकानुमितिः अहं ज्ञानवान् ज्ञाततावत्त्वात् एतादृश्या अनुमितिः तया प्रामाण्यं गृह्यते ।
प्राभाकरमते ज्ञानग्राहकाया सामग्री ज्ञानमेव तेषां मते ज्ञानस्य स्वप्रकाशत्वात् । ते त्रिपुटिप्रत्यक्षवा
दिनः आत्मांशः स्वात्मांशः वेद्यांशश्चेति तेषां मते घटमहं जानामीत्येवाकारः सर्वज्ञानस्य । तत्र आत्मां
शः स्वात्मांशो सर्वज्ञानं प्रत्यक्षं । वेद्यांशो किंचित्प्रत्यक्षं चाप्रत्यक्षं चानुमित्यादिः आत्मास्वांशो प्रत्यक्षमेव
वेद्यांशो वह्न्यादौ प्रत्यक्षमेव । तत्रात्मा ज्ञानाश्रयत्वेन भासते ज्ञानस्य स्वप्रकाशत्वेन वेद्यांशस्तु विषय
त्वेन । तथा च ज्ञानग्राहिका सामग्री ज्ञानमेव तेन प्रामाण्यं गृह्यते सर्वत्रेदमेव स्वतस्त्वं । तत्र युक्तिः
ज्ञानं च पूर्वमेव गृहीतं इति कृत्वा तन्निष्ठं प्रामाण्यमपि गृहीतमेव न च प्रथमतो ज्ञानग्राहकमेव ६८

नास्तीति वाच्यं । ज्ञानधर्मिकं प्रामाण्यं तदभावे कोटिकसंदेहो न स्यात् । अत्र ज्ञानं धर्मी धर्मज्ञानाभावे संश
यानुपपत्तेः संशये धर्मिज्ञानस्य कारणत्वात् । तथा च तैः पूर्वमेव ज्ञानग्राहकासामग्री वक्तव्या । सा च
ज्ञाततान्यथानुपपत्तिप्रसूतार्थापत्तिरेव तया ज्ञाने गृहीते तद्गतप्रामाण्यमपि तयैव गृह्यते ततः पुरुषः
प्रवर्त्तते । ननु प्रथमं ज्ञानमात्रं गृह्यते ततः प्रवृत्त्युत्तरकालफलदर्शनेन ज्ञानं धर्मप्रामाण्यमवधार्यते । अ
त्र पदकृत्यानि । प्रामाण्यं ज्ञानग्राहकसामग्री प्रामाण्यानुमितिस्तया गृह्यत एव । अतो वक्तियावर्त्तते
ति ज्ञानग्राहकासामग्रीति । इदानीं न सिद्धसाधनं । यावती सामग्री मध्ये अनुव्यवसायस्यापतितत्वात् ।
ग्राह्यत्वस्य सिद्धत्वात् । मुरारिभट्टम[illegible] सिद्धसाधनं । भट्टमतेपि न सिद्धसाधनं । ज्ञाततालिंगकानुमि
तिग्राह्यत्वस्य [illegible] सिद्धत्वात् । या[illegible] ज्ञानग्राहकसामग्री तद्ग्राह्यत्वं चेत्तर्हि बाधः कथं । अप्रामाण्य ।
ग्राहिका[illegible]सामग्री [illegible] ज्ञानग्राहिका[illegible]ीन भवति कथमिदं ज्ञानमप्रमा । अनया ज्ञानग्राहकसा

२९ ख्याप्रामाण्यस्य [illegible] स्त्याग्राहिकेति॰ इयं चाप्रामाण्यग्राहिकेवेति न बाध इति॰
तस्मात्स्वत [illegible] काया [illegible] यते॰ ज्ञाततान्यथानुपपत्तिप्रसूतार्थापत्त्या ज्ञानं गृह्यत इ
ति यदुक्तं [illegible] मास्य ग्रहणं दूरत एव तत्र प्रथमतो मीमांसकाभिप्रायं वदति॰ घ
टादिविषये ज्ञाने जाते तेन [illegible] घट इति घटस्य ज्ञातत्वं प्रतिसंधीयते तेन ज्ञाने जाते सति ज्ञातता
नाम कश्चिद्धर्मो जात इत्यनुमीयते॰ स च ज्ञानात्पूर्वमजातत्वात् ज्ञाने जाते सति ज्ञातत्वात्॰ अन्वयव्य
तिरेकाभ्यां ज्ञानेन जन्यत इत्यवधार्यते॰ कारणाभावे कार्यानुदयात्॰ तेनार्थापत्त्या स्वकारणं ज्ञानं ज्ञात
तया क्षिप्यत इति मीमांसकैरुक्तं॰ तन्न॰ ज्ञानविषयत्वातिरिक्तायाः॰ ज्ञाततायाः अभावात्॰ ननु ज्ञानवि
षयत्वसिद्धौ ज्ञाततासिद्धिः कथं ज्ञानजनितज्ञाततात्वमेव घटादेर्ज्ञानविषयत्वात् न च प्रकारान्तरेण
ज्ञानविषयत्वमिति वाच्यं॰ प्रकाराभावात्॰ तथाहि॰ न तावद्घटस्य ज्ञानेन तादात्म्येन विषयता घटज्ञा २९

नयोः तादात्म्यानभ्युपगमात्॰ अथ घटात् ज्ञानमुत्पद्यते ज्ञाने घटस्य विषयत्वेन हेतुत्वात्॰ ज्ञानं घट
विषयमिति चेत्॰ न घटादेरिव इंद्रियादेर्विषयत्वापत्तिः इंद्रियादेरपि घटोयमिति ज्ञानस्योत्पत्तिरिति तस्मा
त् ज्ञानजनितज्ञातताधारत्वमेव घटादेर्विषयत्वं॰ तथा च विषयत्वान्यथानुपपत्त्यैव ज्ञाततासिद्धिः न तु ज्ञातो
घट इति प्रत्यक्षमात्रेणेति॰ उच्यते॰ स्वभावादेव ज्ञानविषयत्वोपपत्तेः घटज्ञानयोस्तादृश एव स्वभाववि
शेषः येनानयोर्विषयविषयीभावः॰ अथ ज्ञानजनितज्ञातताधारत्वेन ज्ञानविषयत्वं घटादेरिति चेत्॰ अ
तीतानागतयोर्ज्ञानविषय [illegible] त्॰ ज्ञानेन तत्र ज्ञातताजननासंभवात्॰ असति धर्मिणि धर्मजननायोगा
त्॰ किंच [illegible] विषयत्वे ज्ञातताज्ञाने ज्ञाततायाविषयत्वं न स्यात्॰ ज्ञातता ज्ञानेन ज्ञात
२त तांतराजन [illegible] सिद्धत्वात्॰ या [illegible] कारेऽनवस्थापातः॰ अथ ज्ञाततायां ज्ञाततांतर [illegible] भावेपि स्वभा
वादेव ज्ञा [illegible] चेत्तर्हि घटादावपि स्वभावादेव ज्ञानविषयत्वं भविष्यति॰ किं

७१ त्तिःभावत्तद्धेतोःपक्षधर्मताअतःव्याप्तिपक्षधर्मतोभयवैशिष्ट्यलिंगस्यनास्तीतिकथंगमकत्वं॰
अथव्यतिरेकव्याप्त्याऽन्वयव्याप्तिरनुमीयतेतथाहिसमर्थजनकप्रवृत्तित्वंहेतुःअन्वयव्याप्तिमान्
व्यतिरेकव्याप्तिमत्त्वात्॰धूमवद्वित्वत्॰तर्हिअर्थांतरतोप्रकृतानुपयुक्तार्थांतरोपन्यासःप्रकृतानुमि ता३
तिःतत्रानुपयुक्ताव्यतिरेकव्याप्तिस्तदुपन्यासःननुप्रकृतानुमितिस्तदुपयुक्ताऽन्वयव्याप्तिस्तदुपयुक्त
त्वेनैवव्यतिरेकव्याप्तेरुपन्यासःइतिचेत्तर्हिअप्राप्तकालताप्रथमतोऽन्वयव्याप्तिरुपन्यसनीयातदुप
योगित्वेनव्यतिरेकव्याप्तिरुपन्यसनीयेतिनचतथोपन्यासइतिनन्वानाप्राप्तकालताअवयवविपर्या
सवचनंअप्राप्तकालतेतिसूत्रात्यत्रावयवानांविपर्यासवचनंतत्राप्राप्तिकालता॰प्रकृतेचावयववि
पर्यासेवचनाभावान्नाप्राप्तकालतेतिवाच्यं॰सूत्रेअवयवग्रहणस्योपलक्षणत्वयातदन्यविपर्यासस्या
पिअप्राप्तकालत्वात्॰तस्मात्केवलव्यतिरेकीनप्रमाणमिति॰उच्यते॰निरुपाधिव्यतिरेकसहचारेण ७२

न्वयव्याप्तिरेवानुमीयते॰नचनिरुपाधिव्यतिरेकसहचारव्याप्त्योरेकत्वात्॰कथंतेनतदनुमानमिति
आत्माश्रयदोषापत्तेरितिवाच्यं॰तयोर्भेदात्उभयोःसामानाधिकरण्यंसहचारःसाधनसमानाधिकर
णात्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यंव्याप्तिरितितयोर्भेदात्॰नचान्यसहचारेणान्यव्याप्ति
ग्रहेऽतिप्रसंगःधूमवह्निसहचारेणघटपटयोरपिव्याप्तिर्गृह्येतेतिवाच्यं॰प्रतियोग्यनुयोगिभावस्यनि
यामकत्वात्॰ययोरभावयोःसहचारस्तत्प्रतियोगिनोरेवव्याप्तिर्घटपटादिस्थलेप्रतियोग्यनुयोगिभा
वाभावात्नातिप्रसंगइति॰तथाचव्यतिरेकिस्थलेव्याप्तिविशिष्टपक्षधर्मताज्ञानस्यसत्त्वात्नातिव्याप्ति
रिति॰अथवाव्याप्तिविशिष्टपक्षधर्मताज्ञानंअन्वयानुमितिप्रयोजकं॰व्यतिरेकिणितुसाध्याभावव्या
पकाभावप्रतियोगित्वज्ञानप्रयोजकं॰तच्चप्रकृतेवेतिनकिंचिद्दूषणमितितत्त्वं॰अनेनकेवलव्यतिरे
क्यनुमानोनान्यासहचरापन्नस्यप्रमाणस्यप्रमाणेववोधितेतदृष्टांतेनप्रवृत्तेःपूर्वमपितज्जातीयत्व

७२ लिंगेनान्वयव्यतिरेकिणाऽन्यस्य ज्ञानस्य ज्ञानस्यानभ्यासदशापन्नस्य ज्ञानस्य प्रामाण्यमनुमीयते॰ त
थाहि॰ अनभ्यासदशापन्नं [illegible] ज्ञानं प्रमा समर्थप्रवृत्तिजनकजातियत्वात्॰ यत्समर्थप्रवृत्तिजनकजा
तीयं तत्प्रमाणं॰ य[illegible]भ्यासदशापन्नजलज्ञानवदिति अन्वयी॰ व्यतिरेकी वा यत्प्रमा न भवति न त
त्समर्थप्रवृत्तिजनक[illegible]तीयं यथाप्रमात्वकाभ्यास इति॰ इत्यन्वयव्यतिरेक्यनुमानेनैव प्रामाण्यग्रह
इति॰ परत एव प्रामाण्यग्रह॰ न स्वत इति॰ कोऽर्थः अप्रामाण्याग्राहिका यावत्ज्ञानग्राहिका सामग्री
तन्मात्रेण प्रामाण्यं न गृह्यत इति ॰ इति रामलिंगकृतौ प्रामाण्यपदार्थः शुभमस्तु अथ सू
त्रक्रमानुसारेण प्रमेयान्युच्यंते॰ अपवर्गार्थं ज्ञेयं यत्तत्प्रमेयं॰ तच्च द्वादशधा॰ आत्मशरीरेंद्रियार्थ
मनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति सूत्रं सूत्रे द्वादशविधप्रमेयाभिधाना
त्॰ तत्र तार्किकरक्षासंमतिमाह॰ प्रमेयमपवर्गार्थं ज्ञेयं द्वादशधा च तत्॰ आत्मा देहेंद्रियार्थधी ७२

मनो दोषाः प्रवृत्तयः प्रेत्यभावफलं दुःखं मोक्षश्चात्मात्र चेतनः तत्रात्मनः प्रथममुद्दिष्टत्वात्तल्लक्षण
माह॰ आत्मत्वसामान्यवानात्मा॰ आत्मा लक्ष्यः आत्मत्वसामान्यवानिदं लक्षणं॰ लक्षणे तान्येवेत्या
दि ज्ञेयं॰ सामान्यवानात्मा॰ इत्युच्यमाने घटेऽतिव्याप्तिः स घटत्वसामान्यवान्भवति स किमात्मा आत्मा
न भवति॰ ततो वक्ति आत्मत्वसामान्यवानिति॰ घटो यद्यपि घटत्वसामान्यवान्भवति तथाप्यात्मत्वसा
मान्यवान्न भवति॰ अतो नातिव्याप्तिः सामान्यपदं आत्मत्वस्य जातित्वज्ञापनार्थं॰ नन्विदं लक्षणं कालेऽ
तिव्याप्तं कालोपि आ[illegible]त्वसामान्यवान्भवति॰ कालस्य जगदाधारत्वेनात्मत्वसामान्याश्रयत्वादिति
चेन्न॰ आत्मत्वंस[illegible]बंधेन विद्यते यत्र स आत्मा॰ एवं च नातिप्रसंगः काले आत्मत्वं आधाराधे
यसंबंधे[illegible]वर्तते न सम[illegible]येन [illegible]त्मत्वयोरयुतसिद्धत्वाभावात्॰ अयुतसिद्धयोः संबंधः समवा
य इत्युक्तं प्राग्नेवेति॰ ननु काले आत्मत्वं समवायेन नास्तीति कोऽर्थः काले आत्मत्वं नास्तीति वक्तुं न श

७२ क्यते। कुतः कालस्य जगदाधारत्वं न स्यात् तन्मध्ये आत्मत्वस्य पतितत्वात्। तदनाधारत्वे सर्वमेतद्विरु
ध्येत कालेऽप्यात्मत्वेऽपि समवायो नास्तीत्यपि वक्तुमशक्यं। समवायस्यैकत्वेनात्मत्वसमवायस्य
कालनिष्ठसमवायस्य चाभेदेन काले आत्मत्वसमवायो नास्तीत्येतद्वक्तुमशक्यमेवेति चेन्न काले आ
त्मत्वनिरूपितसमवायो नास्तीत्यर्थः। काले यद्यप्यात्मत्वसमवायो विद्यते तथापि यत्रात्मत्वनिरूपितः
समवायस्तत्रात्मेति प्रतीतिः। काले आत्मत्वनिरूपितः समवायश्चेत् कालोऽप्यात्मा इति प्रतीतिः स्यान्न
त्वेतादृशी प्रतीतिस्तस्मादात्मत्वसामान्यवानात्मेति सिद्धं। ननु देहातिरिक्त आत्मा नास्त्येव कार्याका
रपरिणतं भूतचतुष्टयमेवात्मा तत्रैव चैतन्यं। अहं स्थूलः अहं कृशः अहं गौर इत्यादिप्रतीतयो
शरीरस्यात्मत्वे प्रमाणभूताः। अतो शरीरमेवात्मेति चेन्न शरीरस्यात्मत्वे बाल्ये दृष्टं कौमारादौ न स्मरेत्
बाल्यकौमारादिशरीराणां यावद्द्रव्यभावीपरिमाणभेदेन भेदात्। न ह्यन्येन दृष्टमन्यः स्मरति नहि ७२

चैत्रेणानुमैत्रःभूतं स्मरति प्रकृते च शरीरस्यात्मत्वे बाल्यशरीरस्वरूप आत्माभिन्नो भवति कौमारशरीरापे
क्षया बाल्यशरीरस्य भिन्नत्वात्। अन्येनानुभूतं यद्वस्तु तस्यान्येन स्मरणं कथं स्यात् तस्माच्छरीरातिरि
क्त आत्मा वक्तव्यः। तदुक्तं कुसुमांजलौ। नान्यदृष्टं स्मरत्यन्यो नैकं भूतमपक्रमात्। वासनासंक्रमो ना
स्ति न च गत्यंतरं स्थिरे। किंच शरीरं नात्मा रूपादिमत्वादुपचयापचयवत्वाद्घटवत्। किंचापि। शरीर
स्यात्मत्वे शरीरनाशे आत्मनो नाशः स्यात्। अस्यार्थः अन्यदृष्टमन्यो न स्मरति। ननु बाल्यशरीरं कौमा
रशरीरं मेकमेवेति चेन्न। एकं भूतं न सम्भवति। उभयोरैक्याभावः कुतः अपक्रमात्। बाल्यशरीरस्य
नष्टत्वात्। तत्संस्कारो भविष्यतीति चेन्न। अन्यनिष्ठसंस्कारस्यान्यनिष्ठत्वाभावात्। तस्मात् स्थिरे
आत्मनि अतिरिक्तत्वव्यतिरेकेण गत्यंतरं नास्तीत्यर्थः। नित्यत्वप्रतिपादकविनाशः स्यात्। न चेष्टा
पत्तिः आत्मनोऽस्तीति विरोधः। न च स्थूलोऽहं कृशोऽहमित्यादिप्रत्ययविरोध इति वाच्यं। तस्य भ्रांतत्वा

७४ देहनिष्ठकृशत्वं आत्मन्युपचर्यते॰ किंच शरीरं चक्षुरिंद्रियेण त्वचा वा अवश्यग्राह्यं आत्मा मनोमात्र
ग्राह्यः इतोपि आत्मा शरीराद्भिन्न इति॰ किंच शरीरात्मनोभिन्नत्वे अभेदे आत्मनो नित्यत्वे शरीरस्यापि
नित्यत्वं स्यात्॰ न चेष्टापत्तिस्तस्यांत्यावयवित्वेन कार्यद्रव्यत्वात्॰ किंच तस्य नित्यत्वे अग्निना तस्य भस्मी
भावो न स्यात्॰ वर्त्तते च भस्मीभावः तस्माच्छरीरमनित्यं न नित्यं॰ किंच शरीरात्मनोरभेदे पार्थिवमिदं
शरीरं आप्यं तैजसं वायवीयमिति आत्मनि संज्ञाभेदः किंनिबंधनः॰ न च संज्ञाभेदो नास्त्येवेति वाच्यं॰ सां
प्रदायिकोदयनाचार्यैः संज्ञाभेदस्य कृतत्वात्॰ न च तेषां संप्रदायाव्यभिज्ञत्वमसिद्धत्वमिति वाच्यं॰
बौद्धमतकुंजरविदारणसिंहभूतस्योदयनाचार्यस्य भवानभिज्ञस्य त दृशो वोचितं॰ किंच शरीरस्या
त्मत्वे भोगायतनत्वं न स्यात्॰ यदवच्छिन्ने आत्मनि भोगो जायते तद्भोगायतनं तच्च शरीरस्यात्मत्वेन
संभवति न हि स्वावच्छिन्ने स्वस्मिन् भोगः संभवति॰ [illegible] शरीरं [illegible] इंद्रियाण्येवात्मेति॰ अ ७५

हंकारः अहं बधिर इति प्रतीतेः अहंकारभूतस्य [illegible] त्मत्वं इंद्रियत्वेनो
पपन्नं॰ अतो इंद्रियाण्येवात्मेति॰ तन्न॰ इंद्रियाणामात्मत्वे इंद्रियनाशे आत्मनोपि नाशः स्यात्॰ न चेष्टाप
त्तिः नष्टे चक्षुर्नष्टो आत्मा नष्ट इति कस्यचित्प्रतीतिरस्ति तस्मादिंद्रियातिरिक्त आत्मा॰ आत्मन इंद्रियरू
पत्वेऽतींद्रियतापत्तेः इंद्रियाणामतींद्रियत्वात्॰ न चेष्टापत्तिः आत्मनो मानसप्रत्यक्षतायाः सर्वतांत्रिक
जनसिद्धत्वात्॰ किंचात्मनोंद्रियरूपत्वे ज्ञानसमवायिकारणत्वं न स्यात्॰ इंद्रियाणां ज्ञाने प्रतिनिमित्तकार
णत्वात्॰ ज्ञानसमवायिकारणत्वाभावात्तस्मादयींद्रियव्यतिरिक्त आत्मेति ननु आत्मत्वे सामान्यवाना
त्मा इदं लक्षणं न संभवति कुतः सामान्यमनेकसमवेतं वक्तव्यं॰ आत्मन एकत्वे न आत्मत्वस्यानेकस
मवेतत्वाभावात्तद्घटितलक्षणासंभवः गोतम इत्याशंकायामाह॰ स च प्रतिशरीरं भिन्नः नानात्मानो व्य
वस्थात इति गोतमसूत्रात्॥ अस्यार्थः आत्मनो नानात्वं कुतः व्यवस्थातः कोर्थः सुखदुःखवैचि

१५ श्चेणएक॰सुखीअपरोदुःखीतिप्रतीतेःआत्मनोनानात्वंनचैकस्मिन्शरीरेएकस्मिन्नात्मनिपादेमेसुखं
शिरसिमेवेदनेतिवत्सर्वशरीरेएकस्मिन्नात्मनितत्तच्छरीरावच्छेदेनसुखदुःखादिप्रतितिःस्यादिति
तच्छरीरावच्छेदेनदुःखंएतच्छरीरावच्छेदेनसुखमितिप्रतीत्यैवएकःसुखीअपरोदुःखीतिप्रतीत्युपप
त्तेःतत्प्रतीत्यनुरोधेनात्मनोनानात्वमितिवाच्यं॰एकस्मिन्शरीरेपादादेरवच्छेदकत्वेनतत्राविषयसं
बंधस्यनियामकत्वेनतथाप्रतीतिःएकस्यात्मनःपादेमेसुखंशिरसिमेवेदनातथाप्रतीतिःनचैक^
स्मिन्शरीरेनानाआत्मानइतिवाच्यं॰एकस्मिन्शरीरेनानासत्वेनात्मनांभिन्नकार्यत्वेनशरीरमुन्मथ्ये
त॰अक्रियंवास्यात्नन्वतद्यपितस्मादेकस्मिन्शरीरेनानात्मानइतिनतथाभिन्नशरीरेएकस्यात्म
नइति॰तत्रप्रतिशरीरमंतःकरणभेदेनतद्विशिष्टस्यात्मनःभेदेनतत्तच्छरीरेतत्तद्विशिष्टस्यमदी
यत्वाभिमानात्॰उभयशरीरेएकस्यमदीयत्वाभिमाना[illegible]करणभेदान्नेदइति॰नेति १५

११ तन्नित्यं॰यथाव्योमइत्यात्मनिरूपणं ॰ इदानींशरीरनिरूपणंतस्यभोगायतनमंत्यावयविशरीरं॰त
स्यात्मनःयद्भोगायतनंसदंत्यावयवीकोर्थःद्रव्यानारंभकंकार्यद्रव्यंतत्शरीरं॰यथाअस्मदादीनांशरीरं॰
लक्षणेतान्येवेत्यादिज्ञेयं॰आयतनंशरीरमेवंचेत्तर्हिघटेऽतिव्याप्तिःतस्यापिरूपादीनामायतनत्वादतउ
क्तंभोगेति॰घटस्यभोगायतनत्वाभावात्॰नातिव्याप्तिःएवंचेत्तर्हिशरीरावयवेतिव्याप्तिःतस्यापिसुख
दुःखान्यतरसाक्षात्काररूपभोगायतनत्वात्॰अतउक्तमंत्यावयवीतिपदमुपात्तं॰तस्यद्रव्यारंभकत्वेनां
त्यावयवित्वाभावान्नातिव्याप्तिःद्रव्यानारंभकंकार्यद्रव्यमंत्यावयवीअंत्यावयविलक्षणेपदकृत्यानि
दृष्टव्यानिद्रव्यमंत्यावयवीत्युच्यमानेआकाशेऽतिव्याप्तिःततोवक्तिकार्यद्रव्येतितावत्युक्तेकपालेऽ
तिव्याप्तिःततोद्रव्यानारंभकेति॰कपालस्यद्रव्यारंभकत्वान्नातिव्याप्तिःद्रव्यानारंभकमत्यावयवीत्युच्य
मानेरूपेऽतिव्याप्तिःततोद्रव्येतिपदं॰एतावत्युच्यमानेआकाशेऽतिव्याप्तिःअतोकार्यद्रव्येति॰॥०॥भोग ११

७६ ह्यत्वादित्युच्यमाने परमाणौ व्यभिचारः व्यभिचारो नाम हेतुसत्त्वे साध्याभावत्वं० परमाणौ ग्राह्यत्वं वर्त्तते गुण
त्वं नास्ति अतो बहिरिंद्रियेति० एतावत्युच्यमाने घटे व्यभि[illegible]तो बहि[illegible] एकेति० घट[illegible]द्रियग्राह्यत्वा
त् न व्यभिचारः एतावत्युच्यमाने पुनर्घटे व्यभिचारः अतस्तस्यापि द्वींद्रियग्राह्यत्वे एकेंद्रियग्राह्यत्वात्०
अतो बहिरेकमात्रेति० तस्यैकमात्रेंद्रियग्राह्यत्वाभावान्न व्यभिचारः एतावत्युच्यमाने रूपत्वे व्यभिचारः तदर्थ
मनित्यत्वे सतीति० रूपत्वस्य नित्यत्वेनानित्यत्वाभावान्न व्यभिचारः गुणाश्च गुण्याश्रिता एवात्र परिशेष
प्रमाणेन गुणी आत्मा नान्य इति० परिशेषो नाम प्रसक्तप्रतिषेधे० अन्यत्राप्रसंगात्० शिष्यमाणे संप्रत्य
यः परिशेषः परिशेषप्रकारमाह० तत्र बुध्यादयः न पृथिव्यादिभूतानां गुणाः मानसप्रत्यक्षत्वात्०
अत्र व्यतिरेकव्याप्तिः ये हि पृथिव्यादिभूतानां गुणाः न ते मनसा गृह्यंते० यथा रूपादय इति० न च दि
कालमनसां गुणा बुध्यादय इति वाच्यं० बुध्यादीनां विशेषगुणत्वात्० दिगादीनां विशेषगुणरहि ७६

तत्वात्० ये हि दिगादिगुणाः संख्यादयः न ते विशेषगुणाः ते सर्वद्रव्यसाधारणाः एवं विशेषगुणाः न च बु
ध्यादीनां विशेषगुणत्वमसिद्धमिति वाच्यं० बुध्यादयस्तु विशेषगुणाः गुणत्वे सत्येकेंद्रियग्राह्यत्वात्०
अतो न दिगादिगुणादयो न दिगादिगुणाः बुध्याप्रसक्तानि अष्टद्रव्याणि तत्रैव गुणत्वप्रतिषेधः अन्यत्र गु
णकर्माद्यो बुध्यादीनां गुणत्वाप्रसंगात्० शिष्यमाणे आत्मनि बुध्यादीनां संप्रत्ययः परिशेषः तस्मादेभ्यो तिरि
क्तो बुध्यादीनां गुणी द्रष्टव्यः स एवात्मा तत्र प्रयोगः बुध्यादयः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रिताः पृथि
व्याद्यष्टद्रव्यानाश्रितत्वे सति गुणत्वात्० यस्तु पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितो न भवति नासौ पृ
व्याद्यष्टद्रव्यानाश्रितो गुणः यथा रूपादय इति केवलव्यतिरेकी तदेवं पृथिव्याद्यष्टद्रव्यातिरिक्तं नवमं द्रव्य
मात्मा सिद्धः तस्य गुणाश्चतुर्दश० संख्यापरिमाणपृथक्त्वसंयोगविभागा बुद्धिसुखदुः[illegible]द्वेषप्रयत्नध
र्माधर्माभावनाख्यसंस्काराख्याश्चतुर्दश गुणाः स च सर्वत्र कार्योपलंभाद्विभुः स च नित्यः विभुत्वात् यद्विभु

११ तन्नित्यं०यथाव्योमइत्यात्मनिरूपणं ० इदानींशरीरनिरूपणंतस्यभोगायतनमंत्याव यविशरीरं०त
स्यात्मनःयद्भोगायतनंसदंत्यावयवीकोऽर्थःद्रव्यानारंभकंकार्यद्रव्यंतत्शरीरं०यथाअस्मदादीनांशरीरं०
लक्षणेतान्येवेत्यादिज्ञेयं०आयतनंशरीरमेवंचेत्तर्हिघटेऽतिव्याप्तिःतस्यापिरूपादीनामायतनत्वादतउ
क्तंभोगेति०घटस्यभोगायतनत्वाभावात्०नातिव्याप्तिःएवंचेत्तर्हिशरीरावयवेतिव्याप्तिःतस्यापिसुख
दुःखान्यतरसाक्षात्काररूपभोगायतनत्वात्०अतउक्तमंत्यावयवीतिपदमुपात्तं०तस्यद्रव्यारंभकत्वेनां
त्यावयवित्वाभावान्नातिव्याप्तिःद्रव्यानारंभकंकार्यद्रव्यमंत्यावयवीअंत्यावयविलक्षणेपदकृत्यानि
ऽष्टव्यानिद्रव्यमंत्यावयवीत्युच्यमानेआकाशेऽतिव्याप्तिःततोवक्तिकार्यद्रव्येतितावत्युक्तेकपालेऽ
तिव्याप्तिःततोद्रव्यानारंभकेति०कपालस्यद्रव्यारंभकत्वान्नातिव्याप्तिःद्रव्यानारंभकमंत्यावयवीत्युच्य
मानेरूपेऽतिव्याप्तिःततोद्रव्येतिपदं०एतावत्युच्यमानेआकाशेऽतिव्याप्तिःअतोकार्यद्रव्येति०॥०॥भोग ११

लक्षणमाह०स्वसमवेतसुखदुःखान्यतरसाक्षात्कारोभोग[illegible]तेयेसुखदुःखेतयोर्मध्येअन्यतर
स्यसुखस्यदुःखस्यवायःसाक्षात्कारःसभोगःसाक्षात्कारोभो[illegible]साक्षात्कारोतिभोगःस्यात्०अतउ
क्तंसुखसाक्षात्कारेति०घटसाक्षात्कारःसुखसाक्षात्कारोनभवति[illegible]नातिव्याप्तिःएवंचेत्तर्हिदुःखसाक्षा
त्कारेऽतिव्याप्तिःसभोगोपिभवतिसुखसाक्षात्कारोनभवतिअतोदुःखेतिपदमुपात्तं०एवंचेत्तर्हिसुखसाक्षा
त्कारेऽतिव्याप्तिःअतोवक्तिसुखदुःखसाक्षात्कारोति०एवंचेत्तर्ह्यसंभवःएकस्मिन्समयेसुखदुःखसाक्षात्का
रासंभवात्०अतोऽन्यतरेतिःपदं०ननुतथापिअव्याप्तिःस्यादेवेतिचेन्न०सुखदुःखान्यान्यसाक्षात्कारइ
तिलक्षणार्थःसुखदुःखान्यत्रैलोक्यं०तदन्यत्सुखदुःखमेव०तयोःसाक्षात्कारःभोगःएवंचेत्तर्हिईश्व
रसाक्षात्कारेऽतिव्याप्तिःकथं०ईश्वरसाक्षात्कारस्यसर्वविषयत्वेनसुखदुःखान्यतरसाक्षात्कारत्वात्०नच
ना तस्यभोगत्वेनलक्षणत्वात्अतिव्याप्तिरितिवाच्यं०ईश्वरसाक्षात्कारस्यभोगत्वेईश्वरोपिशरीरंस्यात्०भोगायत

७९ नेच्छरीरमिति नियमात्॰ तस्य शरीराभावे निरधिकरणको भोगो न स्यात्॰ तदर्थं स्वसमवेतेति पदं॰ एवं च ना
तिप्रसंग ईश्वरसमवेतसुखदुःखयोरभावेन तद्विषयकसाक्षात्कारस्य भोगत्वाभावात् नातिव्याप्तिः भोग
यदवच्छिन्ने आत्मनि जायते तद् भोगायतनं तदेव शरीरं॰ ननु मृतशरीरेऽव्याप्तिः तस्य भोगायतनत्वाभावा
त्॰ किंच प्रथमक्षणावच्छिन्ने शरीरेऽव्याप्तिः तस्यापि भोगायतनत्वाभावात्॰ न च यदाकदाचिद्भोगायतनत्वं
विवक्षितं तयोरपि यदाकदाचिद्भोगायतनत्वमिति नोक्ताव्याप्तिरिति वाच्यं उत्पन्नविनष्टे शरीरेऽव्याप्तिः त
त्र यदाकदाचिद्भोगाभावात्॰ प्रथमक्षणे भोगानधिकरणत्वेन द्वितीयक्षणे च शरीरस्याप्यभावेन यदाक
दाचिद्भोगाधिकरणत्वाभावात्॰ किंच॰ अहल्याशरीरेऽव्याप्तिः तस्य पा[illegible]णरूपत्वेन कदाचिदपि भोगा
धिकरणत्वाभावात् न च तच्छरीरमेव न भवतीति वाच्यं॰ शा[illegible]इतिव्य[illegible]च॰ तच्छरीरप्रसिद्धेः सत्वात् इति
चेन्न॰ भोगायतनेतरावृत्ति सकलभोगायतनवृत्ति धर्म[illegible]स च धर्मः शरीरत्वमेव ततश्च तस ७९

वच्छरीरमिति नाव्याप्त्यादिरिति स च धर्मः जातिर्वा उपाधि[illegible]र्वेति [illegible]दिति॰ अथवा चेष्टाश्र
यः शरीरं॰ न च घटेऽतिव्याप्तिः तस्यापि चेष्टा नाम क्रिया तदाश्रयत्वा[illegible]ष्टा हितसाराहितप्राप्ति अहि
तपरिहारार्था क्रिया न तु स्पंदनमात्रमिति अतो घटे नातिव्याप्तिरिति॰ [illegible]लक्षणमाह॰ शरीरसंयुक्तं
ज्ञानकरणमतींद्रियमिंद्रियं॰ यथा चक्षुरिंद्रियं शरीरसंयुक्तं भवति ज्ञानकरणं भवति॰ अतींद्रियं नाम इंद्रि
याग्राह्यं भवतीति कृत्वा तदिंद्रियं॰ इंद्रियं लक्ष्यं॰ इतरल्लक्षणं॰ लक्षणे पदकृत्यानि मूल एव द्रष्टव्यानि॰ ता
नि चेंद्रियाणि षट्॰ घ्राणरसनचक्षुःश्रोत्रत्वक्मनांसि॰ तत्र घ्राणं लक्षणं॰ गंधोपलब्धिसाधनमिंद्रियं घ्राणं॰
गंधस्य या उपलब्धिर्ज्ञानं तस्य साधनं यदिंद्रियं तत् घ्राणं॰ इंद्रियं घ्राणमित्युच्यमाने रसनेंद्रियेतिव्याप्तिः
अत उपलब्धिसाधनमिति॰ न च तस्यापि रसोपलब्धिसाधनत्वात् अतिप्रसंग इति वाच्यं॰ तस्य गंधोप
लब्धिसाधनत्वाभावान्नातिव्याप्तिरिति॰ इंद्रियपदत्यागे घ्राणेंद्रियसन्निकर्षेऽतिव्याप्तिः तस्यापि गंधोपल

१९ ब्धिसाधनत्वात्० अतीवक्ति० इंद्रियमिति० तस्येंद्रियत्वाभावात्तन्नातिव्याप्तिरिति० तच्चनासाग्रवर्त्तीअ
तींद्रियंतच्चानभिभूतंसत्गंधग्राहकं० अतएवश्लेष्मोपहतघ्राणेंद्रियस्यपुंसःगंधानुपलब्धेरिति० घ्राणें
द्रियंपार्थिवंगंधवत्वात्० यद्गंधवत्तत्पार्थिवं० यथा घटः नचगंधवत्वमसिद्धमितिवाच्यं० घ्राणेंद्रियं
गंधवत्गंधग्राहकत्वात्० यदिंद्रियंरूपादिषुपंचसुमध्येयंगुणंगृह्णातितदिंद्रियंतद्गुणयुक्तंय
थाचक्षुरिंद्रियंरूपग्राहकंअतोरूपवत्० प्रकृतेचगंधग्राहकंचघ्राणंअतोगंधवत्० रसनलक्षण
माह० रसोपलब्धिसाधनमिंद्रियंरसनं० लक्षणार्थःपदकृत्यादिच० घ्राणलक्षणवत्० घ्राणेतिव्या
प्तिवारणार्थंरसपदं एतावान्विशेषः तच्चजिह्वाग्रवर्त्ती० त [illegible] नं आप्यंभवितुमर्हतिरू
पादिषुपंचसुमध्येरसस्यैवाभिव्यंजकत्वात्० [illegible] च [illegible] लक्षणमाह० रू
पोपलब्धिसाधनमिंद्रियंचक्षुःपार्थिवेंद्रि [illegible] सिन्नोपलक्षणं० तच्चक्षु १९

ष्णताराग्रवर्त्तिचक्षुरिंद्रियंतैजसंरूपादिषुपंचसु [illegible] प्रदीप [illegible] त्० तच्चादुष्टं
सत्प्रमारूपज्ञानजनकं० दुष्टंभ्रमरूपज्ञानजनकमिति० [illegible] एतेवा [illegible]० [illegible] लब्धिसाधनमिंद्रियं
श्रोत्रं० इतरेंद्रियेष्वतिव्याप्तिवारणायशब्दपदं० तच्चकर्णशष्कुल्य [illegible] माकाशमेवनद्रव्यांतरं० प्रयो
गश्च श्रोत्रेंद्रियंआकाशंभवितुमर्हतिशब्दगुणत्वात्० यत्नआकाशंनतत्शब्दगुणंयथा पृथिवी न
चशब्दगुणत्वमसिद्धमितिवाच्यं० श्रोत्रेंद्रियंशब्दगुणवत्शब्दग्राहकत्वात्० यदिंद्रियंरूपादिषुपंचसु
मध्येयंगुणंगृह्णातितदिंद्रियंतत्गुणवत्० यथाचक्षुः रूपग्राहकंरूपवत्० शब्दग्राहकंचश्रोत्रंअतो
शब्दगुणकं० त्वगिंद्रियलक्षणमाह० स्पर्शोपलब्धिसाधनमिंद्रियंत्वक्० इतरेंद्रियेतिव्याप्तिवारणार्थं
स्पर्शेतिपदं० तच्चसर्वशरीरव्यापित्वकस्थं० त्वगिंद्रियंवायवीयंरूपादिषुपंचसुमध्येस्पर्शस्यैवाभि
व्यंजकत्वात्० अंगसंगिसलिलशैत्याभिव्यंजकव्यंजनवातवत्० स्पर्शस्याभिव्यंजकत्वादित्युच्यमाने

८० मनसिव्यभिचारःतस्यापिस्पर्शाव्यंजकत्वात्॰कुतःसर्वज्ञानंमनोजन्यमितिसिद्धांतात्अतएवेति॰मनसि
स्पर्शस्यैवाभिव्यंजकत्वाभावात्॰तस्यसाधारणकारणत्वात्नव्यभिचारःएवंचेत्तर्हिअसिद्धिःत्वगिंद्रियस्य
स्पर्शत्वजातेरव्यभिव्यंजकत्वात्॰स्पर्शस्यैवाभिव्यंजकाभावात्॰असिद्धिःअतोवक्तिरूपादिषुपंचसुमध्ये
इतिएवंचनासिद्धिःत्वगिंद्रियस्यरूपादिषुपंचसुमध्येस्पर्शस्यैवाभिव्यंजकत्वात्॰स्पर्शत्वस्यजातित्वेनरू
पादिषुगणनायाअभावात्नासिद्धिरिति ॰ मनसोलक्षणमाह॰ अतींद्रियमिंद्रियंसुखग्राहकंमनःअ
तींद्रियमितिस्वस्वरूपनिर्देशार्थं॰तच्चाणुपरिमाणंबाह्येंद्रियसंयुक्तंसत्बाह्यार्थग्राहकंमनसोबहिरस्वा
तंत्र्यादितिननुचक्षुरादींद्रियसद्भावेकिंप्रमाणं॰उच्यते॰अनुमानमेव॰तथाहिरूपाद्युपलब्धयःकरणसा
ध्याःक्रियात्वादितिछिदिक्रियावत्॰यानिचरूपादिज्ञानसाधनानितानींद्रियाणीति॰इंद्रियनिरूपणा
नंतरंअर्थप्रमेयनिरूपणं॰अर्थाःषट्पदार्थाःतेचद्रव्यगुणकर्मसामान्यविशेषसमवायाःयद्यपिप्र ८०

माणादयोप्यत्रैवांतर्भवंतितथापिप्रयोजनवशात्भेदेनसंकीर्तनं॰तत्रद्रव्यलक्षणमाह॰समवायीकार
णंद्रव्यं॰लक्षणार्थस्तुपूर्वमुक्तएव॰तानिचद्रव्याणि॰पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसिनवैव॰त
ल त्रपृथिवीलक्षणमाह॰पृथिवीत्वसामान्यवतीपृथिवी॰लक्षणंदर्शितंतस्यलक्षणवद्भूया॰पृथिवीत्वव्यंजक
माह॰गंधवतीपृथिवी॰लक्षणार्थस्त्वेवं॰द्रव्यत्वसाक्षाद्व्याप्यजातिसमानाधिकरणजातिमतीपृथिवीति॰
एवंचप्रथमक्षणावच्छिन्नेघटेउत्पन्नविनष्टघटेचनाव्याप्तिःतत्रगंधसमानाधिकरणजातेःपृथिवीत्वस्य
सत्वात्॰गंधसमानाधिकरणसत्तारूपजातिमत्वात्॰जलेऽतिव्याप्तिःअतोव्याप्येतिविशेषणंसत्तायाःव्या
पकत्वान्नातिव्याप्तिःएवंचेत्तर्हिपुनर्जलेऽतिव्याप्तिःकथं॰सत्तायाःव्याप्यागंधसमानाधिकरणायाजातेःद्रव्य
त्वंतद्वत्वंजलेवर्त्ततेअतोवक्तिद्रव्यत्वसाक्षाद्व्याप्येति॰द्रव्यत्वस्यद्रव्यत्वसाक्षाद्व्याप्यजातित्वाभावात्ना
तिव्याप्तिःसाक्षाद्व्याप्यत्वस्यभेदगर्भितत्वात्॰द्रव्यत्वजातेःद्रव्यत्वेनाभेदेस्वसाक्षाद्व्याप्यत्वाभावात्साक्षा॰

८९ घ्राणत्वंनामतद्व्याप्यत्वेसतिस्वभिन्नतद्व्याप्यजात्यव्याप्यजातिः साक्षाद्व्याप्याजातिः साचकाठिन्यकोमलत्वा
द्यवयवविशेषयुक्ता साचनित्याऽनित्याच॰ नित्यापरमाणुरूपाऽनित्याकार्यरूपा साचशरीरेंद्रियविषय
रूपा शरीरमस्मदादीनांप्रत्यक्षसिद्धं॰ इंद्रियंगंधव्यंजकंघ्राणं॰ विषयोमृत्पाषाणादिरूपः साचचतुर्दशगु
णवती॰ रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारवती॰ द्वि
विधायाःपृथिव्याः रूपरसगंधाः अनित्याः पाकजाश्च॰ पाकस्तुतेजःसंयोगः तेनपृथिव्याःपूर्वरूपादयोन
श्यंति अन्येजन्यंत इतिपाकजाः इदानींजललक्षणमाह॰ अप्त्वसामान्यवत्या आपः लक्षणार्थस्तुपूर्ववत्॰ अ
प्त्वव्यंजकमाह॰ शीतस्पर्शाआपः लक्षणार्थस्त्वेवं॰ द्रव्यत्वसाक्षाद्व्याप्यशीतस्पर्शसमानाधिकरणजातिमत्य
आपः तेनप्रथमक्षणावच्छिन्नेजलेउत्पन्नविनष्टेचनाव्याप्तिः तास्तु द्विविधाः नित्यानित्यभेदात्॰ नित्यापरमा
णुरूपाकार्यरूपास्त्वनित्याः कार्यरूपास्तुरसनेंद्रियशरीर[illegible]समुद्रहिमकरकादिरूपाः गंधवर्जस्नेहयुक्त ८९

पूर्वगुणवत्यः तत्रनित्यानांरूपादयोनित्याएव॰ तेजोलक्ष[illegible]जस्त्वसाम[illegible]वत्तेजः लक्षणार्थः पूर्व
वत्॰ तेजस्त्वव्यंजकमाह॰ उष्णस्पर्शंतेजः द्रव्यत्वसाक्षाद्व्याप्योष्णस्प[illegible]र्शसमानाधिकरणजातिमत्तेजः तेनप्र
थमक्षणावच्छिन्नेतेजसिउत्पन्नविनष्टेचनाव्याप्तिरिति॰ तच्च द्विविधं॰ परमाणुरूपंनित्यं॰ कार्यरूपमनि
त्यं॰ कार्यरूपंचक्षुःशरीरसवितृसुवर्णवह्निविद्युदादिप्रभेदं॰ तच्चैकादशगुणवत्॰ रूपस्पर्शसंख्यापरिमाण
पृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारवत्॰ तच्चतुर्विधं॰ उद्भूतरूपस्पर्शं॰ प्रथमंयथासौरंतेजः सु
वर्णंतुउद्भूताभि॰भूतरूपस्पर्शं॰ अनुद्भूतरूपत्वेऽचाक्षुषंस्यात्॰ अनुद्भूतस्पर्शत्वेत्वचानग्रहेत्॰ अभिभव
स्तु॰ बलवत्सजातीयग्रहणकृतमग्रहणं॰ तन्न॰ अंधकारेबलवत्सजातीयरूपादिग्रहणाभावात्तत्कृतग्र
हणस्यापिअभावात्सुवर्णादेरुद्भूताभिभूतरूपत्वाभावप्रसंगः स्तस्माद्बलवत्सजातीयसंबंधः सुव
र्णे। बलवत्सजातीयेनपार्थिवरूपेणस्पर्शेनचकृतः सुवर्णरूपस्पर्शयोरभिभवः अनुद्भूतरूपस्पर्श

९२ मपरं॰ यथा चक्षुरिंद्रियं॰ अनुद्भूतरूपं उद्भूतस्पर्शं तृतीयं॰ यथा तप्तवारिस्थं तेजः उद्भूतरूपमनुद्भूतस्प
र्शं चतुर्थं॰ यथा प्रदीपप्रभामंडलं॰ वायुलक्षणमाह॰ वायुत्वाभिसंबंधवान्वायुः लक्षणार्थः पूर्ववत्॰ वायु
त्वव्यंजकमाह॰ अरूपी स्पर्शवान्वायुः अरूपित्वे सति द्रव्यत्वसाक्षाद्व्याप्यस्पर्शसमानाधिकरणजाति
मान्वायुः अरूपिपदत्यागे पृथिव्यामतिव्याप्तिः अत अरूपित्वे सति पृथिव्या रूपवत्त्वात्तत्र नातिव्याप्तिः प्रथ
मक्षणावच्छिन्ने वायौ उत्पन्नविनष्टे च रूपवत्त्वान्नातिव्याप्तिः प्रथमक्षणेनाव्याप्तिरिति॰ स च द्विविधः नित्या
नित्यभेदात्॰ नित्यः परमाणुरूपः अनित्यः कार्यरूपः अनित्यः शरीरेंद्रियविषयप्राणलक्षणश्चतुर्विधः
शरीरं वायुलोके इंद्रियं स्पर्शव्यंजकं॰ विषयो वृक्षादिकंपजनकः प्राणश्च शरीराभ्यंतरचारी वायुः स ए
व क्रियाभेदादपानादिसंज्ञां लभते॰ स च नव गुणवान् स्पर्शसंख्यापरिमा[illegible]पृथक्त्वसंयोगविभागपरत्वाप ष
रत्ववेगवान्॰ स च स्पर्शानुमेयः योयं वायुर्वाति अपाक[illegible]शीतस्पर्श उपलभ्यते स परक्षः क्वचि ९२

दाश्रितः गुणत्वात्॰ यो गुणः स क्वचिदाश्रितः यथा रूपं॰ अपा[illegible]अनुष्णाशीतस्[illegible]र्शः गुणिनं विना ऽनुपपद्य
मानो गुणिनमनुमापयति गुणी च वायुरेव॰ पृथिव्यामनुपलब्धेः पृथि[illegible]पाकजस्पर्शवत्त्वात्॰ अनुष्णा
शीतस्पर्शमात्रस्य पृथिवी वायुव्यतिरेकेणाभावात्॰ तस्मादपाकजानुष्णाशीतस्पर्शाश्रयो वायुरिति सि
द्धं॰ बुद्धिस्थस्योपेक्षानर्हत्वलक्षणप्रसंगसंगत्या पृथिव्यादीनां चतुर्णां कार्याणामुत्पत्तिक्रमः कथ्यते॰ द्व
योः परमाण्वोः क्रियासंयोगे सति द्व्यणुकमुत्पद्यते॰ द्व्यणुकस्य समवायिकारणं परमाणुद्वयं॰ परमा
ण्वोः संयोगो ऽसमवायीकारणं॰ अदृष्टादिनिमित्तकारणं॰ द्व्यणुकोत्पत्त्यनंतरं त्र्यणुकं त्रिभिः संयुक्तै
र्द्व्यणुकैरुत्पद्यते॰ तस्य द्व्यणुकानि समवायीकारणानि॰ तेषां संयोगो समवायीकारणं॰ अदृष्टादिनि
मित्तकारणं॰ एवं चतुर्भिस्त्र्यणुकैश्चतुरणुकमुत्पद्यते॰ तस्य त्र्यणुकानि समवायीकारणानि॰ शेषं पू
र्ववत्॰ एवं चतुरणुकैः पंचस्थूलं तैः स्थूलतरं॰ तैः स्थूलतमं॰ एवं क्रमेण महापृथिवी॰ एवं द्व्यणुका

८२ दिक्रमेण महत्यापः महत्तेजः महांश्च वायुरुत्पद्यते। कार्यगता रूपादयः स्वाश्रयसमवायीकारणगतेभ्यो
रूपादिभ्यो जायंते कारणगुणा हि कार्यगुणानारंभंत इति न्यायात्। इति पृथिव्यादीनामुत्पत्तिक्रमः। अ
थ पृथिव्यादीनां विनाशक्रम उच्यते। इत्थमुत्पन्नस्य रूपादिमतः कार्यद्रव्यस्य घटादेरवयवे कपाला
दौ नोदनादभिघाताद्वा कर्म जायते। वेगरहितस्पर्शवत्संयोगो नोदनं। वेगवत्स्पर्शवद्द्रव्यसंयोगोऽभि
घातः तेन कर्मणा कृतो यो विभागः तेनावयवारंभकस्यासमवायीकारणभूतस्य संयोगस्य नाशः क्रि
यते ततः कार्यद्रव्यस्य घटादेर्नाशः एतेनासमवायीकारणनाशेन द्रव्यनाशो दर्शितः क्वचित्सम
वायीकारणनाशेन द्रव्यनाशः यथा पूर्वोक्तस्यैव पृथिव्या[illegible] संजिहीर्षा महेश्वरस्य संजि
हीर्षा जायते। कोऽर्थः संसारकारणसमवहितेच्छे[illegible] ततो [illegible] विभागस्ततः संयो
गनाशो द्व्यणुकेषु नष्टेषु आश्रयनाशो त्र्यणुकादि[illegible] महापृथिव्यादिनाशः यथा ८२

तंतुनाशे सति पटः तद्गतानां च रूपादीनां स्वाश्रयनाशो [illegible] तैर्गुणैर्गुणनाशमाह। सत्येवाश्र
ये विरोधिगुणप्रादुर्भावेनैव नाशः क्वचित्। यथा [illegible] घटादिस्थं रूपादि [illegible] पीलुपाकपिठरपाकप्र
क्रियानुसारेण ज्ञेयं। पाकेन परमाणुरूपनाश इति। ननु परमाणुसद्भावे प्रमाणाभावात्सर्वेयं प्रक्रिया
भित्तिचित्रादिति। उच्यते। यदिदं जालसूर्यमरीचिस्थं रजः सर्वथा सूक्ष्मतममुपलभ्यते। तत्स्वल्प
परिमाणद्रव्यारब्धं कार्यद्रव्यत्वात्। घटवत्। तच्च द्रव्यं कार्यमेव। महद्द्रव्यारंभकस्य कार्यत्वनियमात्।
तस्मादेवं द्व्यणुकं सिद्धं द्व्यणुकं पक्षः स्वापेक्षया स्वल्पपरिमाणसमवायीकारणारब्धं कार्यद्रव्यत्वात्। घ
टवत् यश्च द्व्यणुकारंभकः स एव परमाणुः स चानारब्ध एव ननु कार्यद्रव्यारंभकस्य कार्यतया व्य
भिचारात् कथमनारंभकत्वं। उच्यते। अनंतकार्यपरंपरादोषः स्यात्। तथा च सति अनंतद्रव्यारब्ध
त्वाविशेषेपि मशकमातंगयोरपि तुल्यपरिमाणत्वप्रसंगः तस्मादनारब्ध एव परमाणुः द्व्यणुकं

८४ तुद्वाभ्यामेवपरमाणुभ्यामारभ्यते॰एकस्यानारंभकत्वात्॰आधिक्यकल्पनायांप्रमाणाभावात्॰त्र्य
णुकंतुत्रिभिरेवद्व्यणुकैरारभ्यते॰एकस्यानारंभकत्वात्॰द्वाभ्यामारंभेकार्यगतमहत्त्वानुपपत्तिः
कार्येहिमहत्त्वंकारणमहत्त्वात्कारणबहुत्वाद्वा॰तत्रप्रथमस्यासंभवात्॰चरममेषितव्यं॰चतुरादि
कल्पनायांप्रमाणंनास्ति॰त्रिभिरेवमहत्त्वारंभोपपत्तेरिति॰ वायुलक्षणानंतरमाकाशलक्षणमा
ह॰शब्दगुणमाकाशं॰शब्दस्यद्रव्यत्वनिराकरणार्थंगुणपदं॰शब्दस्यद्रव्यत्वंप्राभाकराःवदंति॰व
र्णात्मकाश्चयेशब्दानित्याःसर्वगताश्चये॰पृथक्द्रव्यतयातेहि [illegible] गुणा॰ ऽस्यत्विन्मताःतन्न॰शब्दःगु
णःसामान्यवत्वेसत्यस्मदादिबाह्येंद्रियग्राह्यत्वाद्रूपवत्॰ग्राह्य [illegible] नेअनुमानग्राह्यवह्नौ
व्यभिचारःततोवह्नि॰इंद्रियेति॰एतावत्युच्यमाने [illegible] बाह्येति॰एतावत्युच्यमा
नेघटेव्यभिचारःअतोवह्नि॰एकेंद्रियग्राह्येतिलक्ष [illegible] भिचारः॰एवमप्यनिवृत्तिः ८४

द्वींद्रियग्राह्यस्याप्येकेंद्रियग्राह्यत्वात्॰अतोमात्रपदं [illegible] भिचारः॰अतोवह्निःसामा
न्यवत्वेसतीति॰सामान्येसामान्याभावान्नव्यभिचारः [illegible] शब्दस्यगुणत्वेनद्रव्यत्वमि
ति॰तथाचप्रयोगः॰शब्दःक्वचिदाश्रितःगुणत्वाद्रूपवत्॰गुणाश्र [illegible] स्यगुणिनश्चपरिशेषप्रमा
णेनाकाशएव॰तथाहिशब्दःनपृथिव्यादिचतुष्टयात्मनांगुणः [illegible] ग्राह्यत्वात्॰येहिपृथिव्यादिगुणाः
नतेश्रोत्रेणगृह्यंते॰यथारूपादयइति॰शब्दःनदिक्कालमनसांगुणः॰विशेषगुणत्वात्॰येहिदिगादिगु
णानतेविशेषगुणाःसंख्यादयःतेहिसर्वद्रव्यसाधारणाएवेतितस्मादेभ्योष्टभ्योऽतिरिक्तःशब्दस्यगु
णमीयतेसएवाकाशइति॰तच्चैकंवास्तवभेदेप्रमाणाभावात्॰औपाधिकभेदेविद्यमानेपितस्या
प्रयोजकत्वात्॰वास्तवैकत्वेनाकाशत्वंनामसामान्यं॰आकाशोनास्तिसामान्यस्यानेकवृत्तित्वात्॰वि
भुश्चाकाशं॰परममहत्त्वःपरिमाणमिवपरिमाणंयस्येत्यर्थः॰अन्यथामहत्परिमाणमितिस्यात्॰स

८५ र्वत्रकार्योपलब्धेःविभुत्वाकाशं॰विभुत्वान्नित्यमिति॰तस्यगुणाःषट्॰शब्दसंख्यापरिमाणपृथक्त्वसं
योगविभागवान्॰काललक्षणमाह॰दिक्कृतपरत्वापरत्वव्यतिरिक्तपरत्वापरत्वानुमेयःकालः॰तस्य
गुणाःपंच॰संख्यापरिमाणपृथक्त्वसंयोगविभागवान्॰एकोविभुर्नित्यश्च॰ननुकथमस्यदिग्विपरीत
परत्वापरत्वानुमेयत्वं॰उच्यते॰संनिहितेदृष्टदेशसंनिधानात्दिक्कृतापरत्वार्हेविपरीतंपरत्वंप्रतीय
तेतत्कालकृतंव्यवहितेपूतिव्यवधानात्परत्वार्हेविपरीतमपरत्वंप्रतीयतेतत्कालकृतं॰तदिदंप
रत्वापरत्वंकार्यंसत्कारणेनदिगादेरसंभवात्कालमेवकारणमनु[illegible]यति॰सचएकोपिवर्त्तमाना
तीतभविष्यत्क्रियोपाधिवशात्वर्त्तमानादिव्यपदेशं[illegible]दुदयपव्यादिक्रियोपाधि
वशात्त्याचकादिसंज्ञांलभते॰नित्यत्वविभुत्वेचा[illegible]कालित्याविभ्वीचेतिदिक्स्व
रूपं॰दिक्लक्षणंचेदं॰आदित्यसंयोगानुत्पा[illegible]परत्वापरत्वानधि ८५

करणंदिक्॰संख्यापरिमाणपृथक्त्वसंयोगवि[illegible]पूर्ववती॰[illegible]दिक्प्राच्याग्नेयीयाम्यानैर्ऋती
वारुणीवायवीकौबेरीईशानीनागीब्राह्मीत्येडिवेदिता[illegible]साचपूर्वापरादिप्रत्ययैर
नुमेयासाचैकापीसवितृतत्तद्देशसंयोगोपाधिवशात्[illegible]संज्ञां[illegible]भते॰आत्मत्वसंबंधवाना
त्मासचगुणविशिष्टस्तुउक्तएवप्रसंगे॰मनस्त्वाभिसंबंधवत्[illegible]इंद्रियप्रसंगेनोक्तंपूर्वमेव॰इ
दानींद्रव्यप्रसंगेनोच्यते॰तच्चनित्यंसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगवत्॰तत्सं
योगेनबाह्येंद्रियमर्थग्राहकं॰अतएवसर्वोपलब्धिसाधनं॰तच्चनप्रत्यक्षं॰अपितुअनुमानग
म्यं॰तथाहि॰सुखाद्युपलब्धयःचक्षुर्व्यतिरिक्तकरणसाध्याःअसत्स्वपिचक्षुरादिषुजायमान
त्वात्॰यच्चसुखाद्युपलब्धिकरणंतन्मनइति॰तदुक्तंग्रंथांतरे॰वायोर्नवैकादशानांतेजसोगुणाः
जलक्षितिप्राणभृतांचतुर्दश॰दिक्कालयोःपंचषडेवचांबरंमहेश्वरेष्टौमनसस्तथैवच॰द्रव्या

८६ ण्युक्तानि॰ गुणाउच्यंते॰ सामान्यवान् असमवायीकारणमस्पंदात्मा गुणः यथा रूपं तत्र रूपत्वसा
मान्यवद्भवति असमवायीकारणं नासमवायीकारणभिन्नं भवति॰ अस्पंदात्वे तेनाम कर्मभिन्नंभ
वतिइतिकृत्वा रूपंगुणः अस्पंदात्मागुणइत्युक्ते समवायीकारणेऽतिव्याप्तिः अतोवक्ति॰ असम
वायिकारणेति॰ तदर्थः असमवायीकारणभिन्नं तच्चसमवायीकारणे नास्ति अतोनातिव्याप्तिः ए
वंचेत्तर्हि सामान्येतिऽव्याप्तिः ततोसमान्यवानिति कर्मणि अतिव्याप्तिवारणार्थं अस्पंदात्मेतिः स
चऽव्याप्तिलः ते रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्व
द्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारभेदाच्चतुर्विंशतिगुणाः तत्र
चक्षुर्मात्रग्राह्यविशेषगुणोरूपं॰ गुणोरूपमित्युच्य[illegible]माने संयोगेऽतिव्याप्तिः ततोविशेषगुणेति॰
संयोगस्यसामान्यगुणत्वान्नातिव्याप्तिः एवंचेत्तर्हि [illegible] तिः अतोचक्षुर्ग्राह्येति॰ चक्षुर्ग्राह्यं ८६

रूपमित्युच्यमाने घटेऽतिव्याप्तीः अतोगुणेति॰ र[illegible]तिव्याप्तिः अतोमात्रपदं संयोगस्य
द्वींद्रियग्राह्यत्वात्तन्नातिव्याप्तिः एवंचेत्तर्हि [illegible] अतोविशेषपदमितिवदंति॰ त
न्नचचक्षुर्मात्रग्राह्योविशेषगुणोरूपमित्येवास्तु॰ [illegible]मात्रपदवैयर्थ्यापत्तेः तद्वारणीयस्यसा
मान्यगुणस्यविशेषपदेनैववारणात्॰ ननुपरमाणुरूपेऽव्याप्तिः तस्यचक्षुर्ग्राह्यत्वाभावात्॰ इति
चेन्न॰ चक्षुर्मात्रग्राह्यजातिमत्वस्यविवक्षितत्वात्॰ तथाचचक्षुर्मात्रग्राह्योग्यायाजातिः रूपत्वं तद्वत्वं प
रमाणुरूपेविद्यते अतोनातिव्याप्तिः ननुमात्रपदं साकल्यवाचीवा अवधारणवाचीवानाद्यः रूप
स्ययावच्चक्षुर्ग्राह्यत्वाभावादवधारणवाचीवक्तव्यः अवधारणत्वंचचक्षुर्ग्राह्यत्वेसतिचक्षुरि
तरांग्राह्यत्वं तच्चरूपेनास्ति चक्षुरितरत्वअनुमानंतेनग्राह्यत्वाद्रूपस्य॰ अथचक्षुरितरेंद्रिया
ग्राह्यत्वंतथापिरूपेनास्ति॰ चक्षुरितरदिंद्रियंमनः तद्ग्राह्यत्वाद्रूपस्य॰ अथचक्षुरितरद्वहिरिं

८१ ड्रियाग्राह्यत्वं तदपि रूपेनास्ति॰ उपनीतस्य सर्वस्य सर्वेंद्रियग्राह्यत्वात्॰ तथाच रूपस्यापि चक्षु
रितरबहिरिंद्रियग्राह्यत्वात्॰ ततो लौकिकप्रत्यासत्त्येति तथाच एवं लक्षणार्थः सयत्नः॥ चक्षु
र्ग्राह्यत्वे सति लौकिकप्रत्यासत्त्या चक्षुरितरबहिरिंद्रियाग्राह्यजातिमद्रूपं॰ तच्च रूपं पृथिव्या
दिचतुष्टयवृत्ति॰ सितलोहितपीतहरितकृष्णकपिलचित्रभेदादनेकप्रकारं पाकजं पृथिव्यां॰
तदनित्यं पृथिवीमात्रे॰ आप्यतैजसपरमाण्वोर्नित्यं॰ आप्यतैजसकार्येऽनित्यं॰ शुक्लभास्व
रपाकजं तेजसि॰ तदेवाभास्वरमप्सु॰ रसो रसनेंद्रियग्राह्यो गुणः रसत्वेऽतिव्याप्तिवारणाय गु
णपदं॰ ननु परमाणुरसेऽव्याप्तिः तस्य रसनेंद्रियग्राह्यत्वाभावात्॰ इति चेन्न॰ रसनेंद्रियग्राह्यगु
णवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वस्य वि[illegible]त्वात् एवं च परमाणुरसे नाव्याप्तिः त
त्र एतादृशी जातिः रसत्वं सा तत्र वर्तते॰ स च[illegible]कत्ति [illegible] तत्र पृथिव्यां मधुरतिक्तक ८१

तंतुनाशे सति पटः तज्जातानां च रूपादीनां स्वाश्रयनाशे [illegible]ः [illegible] तैरेव गुणनाशमाह॰ सत्येवाश्र
ये विरोधिगुणप्रादुर्भावेनैव नाशः क्वचित्॰ यथा पाकेन घटादिमं रूपादि[illegible] पिलुपाकपिठरपाकप्र
क्रियानुसारेणाद्धेयं॰ पाकेन परमाणुरूपनाश इति॰ ननु पर[illegible]सद्भावे प्रमाणाभावात्सर्वेयं प्रक्रिया
विचित्रा इति॰ उच्यते॰ यदिदं जालसूर्यमरीचिस्थं रजः सर्वथा सूक्ष्मतममुपलभ्यते॰ तस्य[illegible]ः स्वल्प
परिमाणद्रव्यारब्धं कार्यद्रव्यत्वात्॰ घटवत्॰ तच्च द्रव्यं कार्यमेव॰ महद्द्रव्यारंभकस्य कार्यत्वनियमात्॰
[illegible] द्व्यणुकमिति द्व्यणुकं प[illegible]ः स्वापेक्षया स्वल्पपरिमाणसमवायीकारणारब्धं कार्यद्रव्यत्वात्॰ घ
[illegible] द्व्यणुकारंभकः स एव परमाणुः स चानारब्ध एव ननु कार्यद्रव्यारंभकस्य कार्यतया अव्य
[illegible] पारंभकत्वं॰ उच्यते॰ अनंतकार्यपरंपरादोषः स्यात्॰ तथा च सति अनंतद्रव्यारब्ध
[illegible] मातंगयोरपि तुल्यपरिमाणत्वप्रसंगः तस्मादनारब्ध एव परमाणुः द्व्यणुकं

८४ तुद्वाभ्यामेव परमाणुभ्यामारभ्यते॰ एकस्यानारंभकत्वात्॰ आधिक्यकल्पनायां प्रमाणाभावात्॰ त्र्य
णुकं तु त्रिभिरेव द्व्यणुकैरारभ्यते॰ एकस्यानारंभकत्वात्॰ द्वाभ्यामारंभे कार्यगतमहत्त्वानुपपत्तिः
कार्ये हि महत्त्वं कारणमहत्त्वात् कारणबहुत्वाद्वा॰ तत्र प्रथमस्यासंभवात्॰ चरममेषितव्यं॰ चतुरादि
कल्पनायां प्रमाणं नास्ति॰ त्रिभिरेव महत्त्वारंभोपपत्तेरिति॰ वायुलक्षणानंतरमाकाशलक्षणमा
ह॰ शब्दगुणमाकाशं॰ शब्दस्य द्रव्यत्वनिराकरणार्थं गुणपदं॰ शब्दस्य द्रव्यत्वं प्राभाकराः वदंति॰ व
र्णात्मकाश्च ये शब्दा नित्याः सर्वगताश्च ये॰ पृथक्द्रव्यतया ते हि [illegible] गुणा [illegible]ऽस्य चिन्मताः तन्न॰ शब्दः गु
णः सामान्यवत्वे सत्यस्मदादिबाह्येंद्रियग्राह्यत्वाद्रूपवत्॰ आह्य [illegible] दिषु [illegible] नेऽनुमानग्राह्यवह्नौ
व्यभिचारः ततो वह्नि॰ इंद्रियेति॰ एतावत्युच्यमाने [illegible] बाह्येति॰ एतावत्युच्यमा
ने घटे व्यभिचारः अतो वह्नि एकेंद्रियग्राह्येति [illegible] भिचारः एवमप्यनिवृत्तिः ८४

द्विंद्रियग्राह्यस्याप्येकेंद्रियग्राह्यत्वात्॰ अतो मात्रपदं [illegible] व्यभिचारः अतो वह्नि सामा
न्यवत्वे सतीति॰ सामान्ये सामान्याभावान्न व्यभिचारः [illegible] शब्दस्य गुणत्वे न द्रव्यत्वमि
ति॰ तथा च प्रयोगः शब्दः क्वचिदाश्रितः गुणत्वाद्रूपवत्॰ गुणाश्र [illegible] गुणी च परिशेषप्रमा
णेनाकाश एव॰ तथा हि शब्दः न पृथिव्यादिचतुष्टयात्मनां गुणाः [illegible] ग्राह्यत्वात्॰ ये हि पृथिव्यादिगुणाः
न ते श्रोत्रेण गृह्यंते॰ यथा रूपादय इति॰ शब्दः न दिक्कालमनसां गुणः विशेषगुणत्वात्॰ ये हि दिगादिगु
णा न ते विशेषगुणाः संख्यादयः ते हि सर्वद्रव्यसाधारणा एवेति तस्मादेभ्योऽष्टभ्योऽतिरिक्तः शब्दस्य गु
णयमीयते स एवाकाश इति॰ तच्चैकं वास्तवभेदे प्रमाणाभावात्॰ औपाधिकभेदे विद्यमानेऽपि तस्या
प्रयोजकत्वात्॰ वास्तवैकत्वेनाकाशत्वं नाम सामान्यं आकाशे नास्ति सामान्यस्यानेकवृत्तित्वात्॰ वि
भु चाकाशं॰ परममहतः परिमाणमिव परिमाणं यस्येत्यर्थः अन्यथा महत्परिमाणमिति स्यात्॰ स

८५ र्वत्रकार्योपलब्धेःविभुचाकाशं॰विभुत्वान्नित्यमिति॰तस्यगुणाःषट्॰शब्दसंख्यापरिमाणपृथक्त्वसं
योगविभागवान्॰काललक्षणमाह॰दिक्कृतपरत्वापरत्वव्यतिरिक्तपरत्वापरत्वानुमेयःकालःतस्य
गुणाःपंच॰संख्यापरिमाणपृथक्त्वसंयोगविभागवान्॰एकोविभुर्नित्यश्च॰ननुकथमस्यदिग्विपरीत
परत्वापरत्वानुमेयत्वं॰उच्यते॰संनिहितेदृष्टदेशसनिधानात्दिक्कृतापरत्वार्हेविपरीतंपरत्वंप्रतीय
तेतत्कालकृतं॰व्यवहितेयूनिव्यवधानात्परत्वार्हेविपरीतमपरत्वंप्रतीयतेतत्कालकृतं॰तदिदंप
रत्वापरत्वंकार्यंसत्कारस्थैर्येणदिगादेरसंभवात्कालमेवकारणंसमनु[illegible]यते॰सचएकोपिवर्त्तमाना
तीतभविष्यक्रियोपाधिवशात्वर्त्तमानादिव्यपदेशं[illegible]पाधु[illegible]दुदयपर्यादिक्रियोपाधि
वशात्याचकादिसंज्ञांलभते॰नित्यत्वविभुत्वेचा[illegible]कानित्याविभ्वीचेतिदिकस्व
रूपं॰दिक्लक्षणंचेदं॰आदित्यसंयोगानु[illegible]ध्यरातपरत्वापरत्वानधि ८५

टुकषायाम्ललवणभेदवान्॰पाकजश्चाप्सु[illegible]जः॰परमाणुभूतास्वप्सुनित्यःका
र्यभूतास्वप्सुअनित्यः॰गंधोघ्राणग्राह्योगुणः[illegible]स्सुरभिरसुरभिश्च॰सुरभि
श्चंपकादौ॰असुरभिर्मद्यादौ॰जलादौगंधप्रतिभानंसंयुक्तसमवायेनद्रष्टव्यं॰स्पर्शस्तुत्वगिंद्रि
यग्राह्योविशेषगुणःसंयोगेऽतिव्याप्तिवारणार्थंविशेषपदं॰सचपृथिव्यादिचतुष्टयवृत्ति॰स
चत्रिविधःशीतोष्णानुष्णाशीतभेदात्॰शीतःपयसिउष्णस्तेजसि॰अनुष्णाशीतःपृथिवीवाय्वोः
एतेरूपादयश्चत्वारोमहत्त्वेकार्थसमवेतत्वेसतिउद्भूताएवप्रत्यक्षाः॰संख्यात्वसामान्यवती
संख्याःसंख्यात्वव्यंजकमाह॰एकत्वद्वित्वबहुत्वादिव्यवहारहेतुःसंख्यासामान्यगुणःसाएक
त्वादिपरार्धपर्यंता॰तत्रैकत्वंद्विविधं॰नित्यानित्यभेदात्॰नित्यगतंनित्यं॰कार्यगतमनित्यं॰
स्वाश्रयसमवायीकारणगतैकत्वजन्यं॰द्वित्वंवानित्यमेव॰द्वित्वंचद्वयोःपिंडयोरिदमेकमिद

८८ त्मकमित्यपेक्षाबुध्या जन्यते॰ तत्र द्वौ पिंडौ समवायिकारणं॰ अपेक्षाबुद्धिर्निमित्तकारणं॰
अपेक्षाबुद्धिनाशाद्वित्वनाशः एवं त्रित्वाद्युत्पत्तिः परिमाणत्वसामान्यवत्परिमाणं॰ परिमाणत्व
व्यंजकमाह॰ मानव्यवहारासाधारणं कारणं परिमाणं॰ अदृष्टादावतिव्याप्तिवारणाय असाधार
णेति पदं॰ तच्चतुर्विधं॰ अणुमहद्दीर्घह्रस्वभेदात्॰ तत्र कार्यपरिमाणं संख्यापरिमाणप्रचय
योनि॰ तथाहि॰ द्व्यणुकपरिमाणं ईश्वरापेक्षाबुद्धिजन्यं॰ परमाणुद्वित्वजनितत्वात्॰ संख्यायो
नि संख्याकारणमित्यर्थः त्र्यणुकपरिमाणं स्वाश्रयसमवायिकारणगतबहुत्वसंख्यायोनि॰
चतुरणुकादिपरिमाणं तु स्वाश्रयसमवायिकारण[illegible]गतबहुत्वमहत्परिमाणजं॰ तूलपिंड
परिमाणं तु स्वाश्रयसमवायीकारणावयव[illegible]शिथिल[illegible]संयोगजं॰ परमाणुपरि
माणं परममहत्परिमाणं वा कारणादिगतं नित्य[illegible]॰ पृथक्[illegible]योगि पृथक्त्वं॰ जातिव्यंज ८८

कमाह॰ पृथक्त्वव्यवहारकारणं पृथक्त्वं॰ एकपृथ[illegible]द्विपृथक्त्वं॰ तत्र[illegible]नित्याश्रयं नित्यं॰ अनि
त्याश्रयमनित्यं॰ द्विपृथक्त्वाद्यनित्यमेव॰ संयो[illegible]त्ववा[illegible]योग॰ जातिव्यंजकमाह॰ संयु
क्तव्यवहारहेतुः संयोगः अथवा अनित्यः संबंधः संयो[illegible]स च द्व्याश्र[illegible]व्याप्यवृत्तिश्च॰ स चान्य
तरकर्मजः उभयकर्मजः संयोगजश्चेति॰ क्रियावता श्येनेन निःक्रियस्य स्थाणोः संयोग अन्यतर
कर्मजः सक्रिययोर्मल्लयोर्मेषयोर्वा संयोग उभयकर्मजः कारणाकारणसंयोगात्कार्याकार्यसंयोगः
संयोगजः यथा हस्ततरुसंयोगात्कायतरुसंयोग इति॰ विभागत्वसामान्यवान् विभागः जातिव्यं
जकमाह॰ विभक्तव्यवहारहेतुर्विभागः संयोगपूर्वको द्व्याश्रयः स च त्रिविधः अन्यतरकर्मजः
उभयकर्मजः विभागजश्चेति॰ श्येनशैलक्रियया शैलश्येनयोर्विभागः अन्यतरकर्मजः मल्लयो
र्मेषयोर्विभाग उभयकर्मजः हस्ततरुविभागात्कायतरुविभागः विभागजः परत्वताजातियोगी

८९ परत्वं॰ जातेर्व्यंजकमाह॰ परव्यवहारासाधारणं कारणं परत्वं॰ अपरत्वताजातियोग्यपरत्वं॰ अ
परत्वव्यंजमाह॰ अपरव्यवहारासाधारणकारणमपरत्वं॰ ते तु द्विविधे॰ कालकृते दिक्कृते चे
ति॰ तत्र दिक्कृतयोः परत्वापरत्वयोरुत्पत्तिः कथ्यते॰ एकस्यां दिश्यवस्थितयोः पिंडयोरिदमस्मा
त्संनिकृष्टमिति बुध्यानुगृहीतेन दिक्पिंडसंयोगेनापरत्वं सन्निकृष्टे जन्यते॰ विप्रकृष्टबुध्यातु
विप्रकृष्टत्वं जन्यते॰ सन्निकर्षस्तु पिंडस्य द्रष्टुः संयुक्तसंयोगाल्पीयस्त्वं॰ तद्भूयस्त्वं च विप्रकर्षः
कालकृतयोस्तयोरुत्पत्तिः कथ्यते॰ अनियतदिगवस्थितयोर्युवस्थविरयोरयमस्मादल्प
तरकालेन संबद्ध इति बुध्या गृहीतेन कालपिंडसं[illegible]परत्वं[illegible]यते॰ अयमस्मात्प्रचुरत
रकालेन संबद्ध इति धिया स्थविरे परत्वं॰ गुरुत्व[illegible]तिं गुरुत्वं॰ तद्व्यंजकमाह॰ आद्यप
तनासमवायीकारणं गुरुत्वमिति जाति[illegible]॰ तथा चोक्तमुदयना ८९

चार्यैः संयोगवेगप्रयत्नाभावे सति गुरुत्वात्[illegible]द्रवत्व[illegible]द्रवत्वं तद्व्यंजकमाह॰
आद्यस्यंदनासमवायीकारणं॰ तच्च भूतेजोजल[illegible]भूमेः[illegible]हादेः अग्निसंयोगेन द्र
वत्वं नैमित्तिकं॰ द्रवत्वं॰ तेजोंतर्भूतस्य सुवर्णादेः[illegible]द्रवत्वं नैमित्तिकं द्रवत्वं॰ जले नैसर्गिकं
द्रवत्वं॰ स्नेहः चिक्कणता गुणः इदं स्नेहस्य रूपं॰ लक्षणं तु स्नेहत्वसामान्यवान् स्नेहः जलमात्रवृत्ति॰
कारणगुणपूर्वकः गुरुत्वादिवद्यावद्द्रव्यभावी॰ शब्दः श्रोत्रग्राह्यो गुणः॰ गुणपदं शब्दत्वजातौ अति
व्याप्तिवारणाय॰ ननु आद्यमध्यमशब्देष्वव्याप्तिः तेषां श्रोत्रग्राह्यत्वाभावात्॰ अंत्यशब्दस्यैव श्रो
त्रग्राह्यत्वादिति चेत्॰ गुणत्वसाक्षाद्व्याप्यश्रोत्रमात्रग्राह्यगुणनिष्ठजातिमत्त्वस्य विवक्षितत्वात्॰
सा च जातिः शब्दत्वं सा वर्तते शब्दमात्रे नाव्याप्तिरिति॰ स चाकाशस्य विशेषगुणः ननु कथमस्य श्रो
त्रेण ग्रहणं॰ यतो भेर्यादिदेशे शब्दो जायते श्रोत्रं च पुरुषदेशेऽस्तीति चेत्॰ सत्यं॰ भेरीदेशे जातः

६०

शब्दो वीचितरंगन्यायेन कदंबगोलकन्यायेन वा स्वसन्निहितं शब्दांतरमारभते। स च शब्दः शब्दांत
रमिति क्रमेण श्रोत्रदेशे जातोंत्यः शब्दः श्रोत्रेण गृह्यते। न त्वाद्यो नापि मध्यमः। एवमाद्यः शब्दः संयो
गजो दर्शितः। विभागजाद्यशब्दमाह। एवं वंशे पाट्यमाने दलद्वयविभागेन जातः शब्दः शब्दांतरमार
भते। एवं क्रमेण श्रोत्रदेशेंत्यं शब्दं जनयति। सोंत्यः शब्दः श्रोत्रेण गृह्यते। नाद्यो नापि मध्यमः। भेरी
शब्दो मया श्रुत इति धीः। अंत्ये एव प्रथमसंयोजस्य शब्दस्य[illegible]शं स[illegible]वायीकारणं। भेर्याकाशसं
योगोऽसमवायीकारणं। भेरीदंडसंयोगो निमित्तकारणं। वि[illegible]शब्दस्याकाशं समवायी
कारणं। वंशदलाकाशविभागोऽसमवायिकारणं। [illegible]विभागो निमित्तकारणं। अंत्यम
ध्यमशब्दानामाकाशं समवायि[illegible]दस्तप्रया[illegible]मवायिकारणं। अनुकूलवा
तादि निमित्तकारणं। तथा चोक्तमुदयनाचार्यैः [illegible]गाद्विभागाच्छब्दाच्च शब्दनिष्पत्तिरि ६०

ति। बुद्धिकर्मवत् शब्दस्य त्रिक्षणावस्थायित्वं [illegible]मनाः कार्यशब्दनाश्याः। अत्र केचि
त्। अंत्यस्तूपांत्येनोपांत्यस्त्वंत्येन सुंदोपसुंदन्या[illegible] तन्न। उपांत्येन त्रिक्षणावस्था
यिनोंत्यस्य द्वितीयक्षणानुगामिनात्ततीयक्षणे चासता[illegible]शजननासंभवात्। तस्मादुपां
त्यनाशादेवांत्यनाश इति। शब्दस्य नित्यत्वं मीमांसका वदंति [illegible]निरासार्थमाह। शब्दोऽनित्यः
सामान्यवत्वे सत्यस्मदादिबाह्येंद्रियग्राह्यत्वाद्घटवत्। अनित्यत्वं हि विनाशावछिन्नस्वरूपत्वं। न
तु विनाशावछिन्नसत्तायोगः। प्रागभावे सत्ताद्यहीनेऽनित्यत्वाभावप्रसंगः। हेतौ पदकृत्यानि मूलए
व द्रष्टव्यानि। योगिनिरासार्थमस्मदादीत्युक्तं। मूले तत्र योगिसद्भावे प्रमाणमाह। परमाणवः
कस्यचित्प्रत्यक्षाः प्रमेयत्वात् घटवत्। यस्य प्रत्यक्षाः स एव योगी। बुद्धिलक्षणमाह। बुद्धित्वसा
मान्यवती बुद्धिः। अर्थप्रकाशो बुद्धिः इदं बुद्धित्वजातेर्व्यंजकं। सा द्विविधा नित्यानित्यभेदात्। नित्ये

६१ श्वरस्य । अनित्या अस्मदादीनां । सुखत्वजातिमत्सुखं । निरुपाध्यनुकूलवेद्यं सुखं । प्रतिरूपमिति
यावत् । दुःखत्वसामान्यवद्दुःखं । निरुपाधिप्रतिकूलवेद्यं दुःखं । पीडेतियावत् । इच्छात्वसामा
न्यवतीच्छा । अर्थित्वलक्षणा इच्छा । रागो इच्छा । नित्या ईश्वरगता । अनित्याऽस्मदादीनां । द्वेषत्व
सामान्यसम्मावान् द्वेषः प्रज्वलनात्मको द्वेषः क्रोध इतियावत् । प्रयत्नत्वसामान्यवान् प्रयत्नः
प्रयत्नव्यवहारासाधारणं कारणं प्रयत्नः उत्साह इतियावत् । बुध्यादयः षट् मानसप्रत्यक्षाः धर्म
त्वसामान्यवान् धर्मः सुखासाधारणं कारणं धर्मः अधर्मत्वसामान्यवान् अधर्मः दुःखासाधार
णं कारणमधर्मः तौ चाप्रत्यक्षौ अनुमीयेते । तथाहि । देवदत्तस्य शरीरादिकं देवदत्तविशेषगु
णजन्यं । कार्यत्वे सति देवदत्तभोगहेतुत्वात् । देवदत्तप्रयत्नजन्यस्त्रगावत् । यश्च शरीरादि
जनकः स आत्मविशेषगुणः स एव धर्मोऽधर्मश्च । प्रयत्नादीनां शरीराद्यजनकत्वादिति । सं ६२

स्कारत्वसामान्यवान् संस्कारः संस्कारव्यवहारहेतुः संस्कारः स च त्रिविधः वेगो भावना स्थितिस्थापकश्च ।
तत्र वेगः पृथिव्यादिचतुष्टयवृत्तिर्मनोवृत्तिश्च । क्रियाहेतुर्वेगः भावनाख्यसंस्कार आत्मवृत्तिः अनुभ
वजन्यः स्मृतिहेतुः स च उद्बुद्ध एव स्मृतिं जनयति । उद्बोधश्च सहकारिलाभः सहकारिणश्च संस्कार
स्य सदृशदर्शनादयः तदुक्तं कुसुमांजलौ । सदृशादृष्टचिंताद्याः स्मृतीबीजस्य बोधकाः इति । स्थितिस्था
पकश्च स्पर्शवद्विशेषवृत्तिः अन्यथाभूतस्य धनुरादेः स्वाश्रयस्य पुनस्तादवस्थ्यापादकः एते बुध्या
दयो धर्मान्ताः भावना आत्मविशेषगुणाः इदानीं कर्मोच्यते । चलनात्मकं कर्म गुणवद्द्रव्यमात्रवृत्तिः
अविभुद्रव्यपरिमाणेन मूर्तत्वापरनाम्ना सहैकार्थसमवेतं । तच्चोत्क्षेपणापक्षेपणाकुंचनप्रसा
रणगमनभेदात्पंचविधं । भ्रमणरेचनस्यंदनऊर्ध्वगमनमुन्नमनादयस्तु गमनग्रहणेनैव गृह्यं
ते । अनुवृत्तिप्रत्ययहेतुः सामान्यं । द्रव्यादित्रयवृत्ति । नित्यमेकमनेकानुगतं । तद्द्विविधं परमपरं च ।

९२ तत्रपरंसत्ताबहुविषयत्वात्॰साचानुवृत्तेरेवहेतुत्वात्सामान्यं॰अपरंद्रव्यत्वादीति॰अल्पविषय
त्वात्॰तच्चव्यावृत्तेरपिहेतुत्वात्सामान्यंसद्विशेषः॰अत्रकश्चिद्बौद्धआह॰व्यक्तिव्यतिरिक्तंसामान्यं
नास्तीति॰तन्न॰किमालंबनाभिन्नेषुविलक्षणेषुपिंडेष्वेकाकाराबुद्धिर्विनानुगतमेकं॰किंचिदेकंतदे
वसामान्यमिति॰नन्वतद्व्यावृत्तिकृतैवैकाकाराबुद्धिरस्तु॰तथाहि॰सर्वेष्वपिगोपिंडेष्वगोभ्योव्यावृत्ति
रस्तितेनागोव्यावृत्तिविषयएवएकाकारप्रत्ययोनानेकेषुगोपिंडेषु॰नतुभावरूपगोत्वादिसामान्य
विषयएकाकारप्रत्ययइतिचेन्न॰विधिमुखेनैवैकाकारग्रहणात्तत्सामान्यस्यभावस्वरूपत्वात्॰अ
न्यथान्योन्याश्रयात्॰अगोव्यावृत्तिज्ञानेगोव्यवहारःसर्वेषुपिंडेषु॰अगोव्यावृत्तिज्ञानंचगोव्यवहा
रज्ञानाधीनं॰कथं॰गोव्यवहारेज्ञानेअगोज्ञानंअगो[illegible]नेअगोव्यावृ[illegible]ज्ञाने॰तथाचअगोव्यावृत्ति
ज्ञानेगोव्यवहारःगोव्यवहारेअगोव्यावृत्तिज्ञान[illegible]इतरेतराश्रयत्वं॰[illegible]इतिसामान्यपदार्थःविशे ९२

षपदार्थमाह॰विशेषस्तुसामान्यरहितएकव्य[illegible]एकव्यक्तिवृत्तिरि[illegible]इत्युच्यमानेसामा
न्येतिव्याप्तिः॰अतोव्यक्तिमात्रेति॰एतावत्युच्यमानेएकद्रव्य[illegible]अतःसामान्यरहितेति॰सा
मान्यरहितेइत्युच्यमानेसामान्येऽव्याप्तिः॰अतोएकव्य[illegible]मात्रवृत्तीति॰विशेषस्तुव्यावृत्तिबुद्धिमात्र
हेतुः॰नित्यद्रव्यवृत्तिश्चयेषुनित्यद्रव्येषुव्यावर्तकधर्मोनास्तितादृशेषुसमानगुणसमानकर्मणः
परमाणवःमनःइत्यादीनिद्रव्याणि॰आकाशादिषुयद्यपि[illegible]मिथोव्यावृत्तिर्नास्तितदातेष्वपिव्या
वृत्यर्थविशेषाअंगीकरणीयाइति॰समवायलक्षणमाह॰नित्यसंबंधःसमवायः॰अथवाअयु
तसिद्धयोःसंबंधःसमवायःसचउक्तएव॰तत्रबौद्धःशंकते॰अवयवावयविनावयुतसिद्धौतेन
तयोःसंबंधःसमवायःनचैतद्युक्तं॰अवयवातिरिक्तस्यावयविनोऽभावात्॰नचैवंघटोयमि
९५ तिव्यवहारोनस्यादितिवाच्यं॰परमाणुभिरेवतथातथासन्निकृष्टैस्तथातथाव्यवहारोपपत्ते

९२ रिति॰तन्न॰घटेस्थूलत्वबुद्धिरेकत्वबुद्धिःप्रत्यक्षाबुद्धिश्चजायते॰नचपरमाणुषुस्थूलत्वबुद्धिःअ
नेकेषुएकत्वबुद्धिःअप्रत्यक्षेषुप्रत्यक्षबुद्धिःसंभवति॰अतोऽवयवीअतिरिक्तःअवयवात्॰नच
स्थूलत्वादिबुद्धीनांभ्रांतित्वं॰प्रमात्वेबाधकाभावात्॰तदेवंभावरूपाःषट्पदार्थावर्णिताःइदानींनि
षेधमुखप्रत्ययगम्योअभावाख्यःसप्तमपदार्थःप्रतिपाद्यते॰सचद्विविधःसंसर्गाभावोन्योन्याभा
वश्च॰संसर्गाभावस्त्रिविधःप्रागभावप्रध्वंसाभावोन्योन्याभावश्चेति॰उत्पत्तेःप्राक्कारणेकार्यस्या
भावःप्रागभावःकारणेकार्यस्याभावइत्युच्यमानेध्वंसेऽतिव्याप्तिःअतोउत्पत्तेःप्रागिति॰यथातं
न्तुषुपटाभावःसचअनादिःउत्पत्त्यभावोविनाशीच॰कार्यस्यैव द्विनाशोरूपत्वात्॰उत्पन्नस्यका
रणेअभावःप्रध्वंसाभावःकारणमभावइत्युक्तेप्रागभावेऽतिव[illegible]ःअतउत्पन्नस्येतिविशेषणं॰
विनाशइतियावत्॰यथाभग्नेघटेकपालमालायांघटाभावःसचमुद्गरप्रहारादिजन्यःसचोत्प ९२

त्तिमानप्यविनाशीनष्टस्यपुनरनुत्पत्तेःत्रैकालिकोऽभावोत्यंताभावःअभावोत्यंताभावइत्युक्तेप्रा
गभावप्रध्वंसाभावयोरतिव्याप्तिःततस्त्रैकालिकेतिपदं॰यथावा[illegible]रूपाभावःतादात्म्यप्रतियोगि
काभावोऽन्योन्याभावःइतरेष्वभावेषुअतिव्याप्तिवारणायतादात्म्यप्रतियोगिकेति॰तादात्म्यंकिंचिदि
दसद्भिन्नुरभेदः॰तदेवमर्थाःव्याख्याताःननुज्ञानादतिरिक्ताःपदार्थानसंतीतिबौद्धमतं॰ब्रह्मणोवाअ
तिरिक्ताःपदार्थानसंतीतिवेदांतीनांमतं॰तन्मतद्वयमयुक्तं॰अर्थानामपिज्ञानभिन्नत्वेनब्रह्मभिन्नत्वेन
प्रतीयमानानांअशक्यापलापत्वात्॰बुद्धित्वसामान्यवतीबुद्धिःअर्थप्रकाशिकाबुद्धिःसाचबुद्धि
रुपलब्धिर्ज्ञानंप्रत्ययइत्यादिशब्दैरभिधीयते॰सासंक्षेपतोद्विविधा॰स्मृतिरनुभवश्च॰अनुभवो
पिद्विविधःयथार्थोऽयथार्थश्चेति॰यथार्थस्तद्वतितत्प्रकारकःसचचतुर्विधःअदुष्टचक्षुरादिज
न्यःयदाघटादिविषयज्ञानानितद्रूपोऽनुभवःद्वितीयस्तुधूमलिंगकमग्निज्ञानं॰गोसादृश्यदर्श

९४ नात्गवयशब्दवाच्यताज्ञानं॰ अयंतृतीयःज्योतिष्टोमेनस्वर्गकामोयजेतेतिवाक्यात्ज्योतिष्टोमस्यस्व
र्गसाधनताज्ञानं॰ अयंचतुर्थः॰ अयथार्थस्तुतदभाववतितत्प्रकारकानुभवःसचत्रिविधःसचत्रिवि
धोसंशयस्तर्कोविपर्ययश्च॰ संशयतर्कौवक्ष्येते॰ विपर्ययस्तुअतस्मिंस्तद्ग्रहःभ्रमइतियावत्॰ य
थापुरोवर्त्तिनिशुक्तिकाशकलेरजतारोपःइदंरजतमिति॰ स्मरणमपिद्विविधं॰ यथार्थमयथार्थंच॰
जागरेयथार्थंस्मरणं॰ स्वप्नेतुसर्वमेवज्ञानंस्मरणंवाअयथार्थं॰ दोषवशेनतदितिस्थानेइदमित्युदया
त्॰ सर्वंज्ञानंनिराकारमेव॰ सावयवस्यैवसाकारत्वात्॰ अनुभवज्ञानंसाकारं॰ अर्थस्तुनिराकारःज्ञा
नेनार्थेस्वस्याकारोजन्यतेतेनार्थस्यसाकारताजन्यतइतिचेन्न॰ साकारवादनिराकरणात्॰ आकारे
णार्थोनुमीयतइतिकेश्चिदुक्तं॰ तन्न॰ प्रत्यक्षसिद्धत्वाघटादेःसर्वज्ञानंअर्थनिरूप्यं॰ अर्थप्रतिच
द्धस्यमनसानिरूपणात्॰ घटज्ञानवानहमितिप्रतीतिर्नतुज्ञानवानहमितिप्रतीतिर्जायते॰ अंतरिं ९५

द्रियंमनःसुखादिज्ञानकारणंसाधनं॰ तच्चोक्तमिंद्रियप्रस्तावे॰ प्रवृत्तिर्धर्माधर्मौ॰ प्रवृत्तेर्जगद्व्यवहारस्य
साधकत्वात्॰ दोषत्वजातिमान्दोषःसचत्रिविधःरागद्वेषमोहाख्यःरागोइच्छा॰ द्वेषोमन्युःक्रोधइतियाव
त्॰ मोहोमिथ्याज्ञानं॰ विपर्ययइतियावत्॰ पुनरुत्पत्तिःप्रेत्यभावःतच्चात्मनःपूर्वदेहनिवृत्तिःअपूर्वदे
हसंघातलाभःफलंपुनर्भोगःसुखदुःखानुभवःपीडादुःखंतच्चोक्तमेव॰ अपवर्गस्तुतत्वज्ञानोत्पाद्यस
मस्तदुःखाभावःसमस्तदुःखानिशरीरंषडिंद्रियाणिषड्विषयाःषड्बुद्धयःसुखंदुःखंचेति॰ गौणमुख्य
भेदात्सुखंदुःखानुषंगात्दुःखमेव॰ अनुषंगोऽविनाभावःसचायमुपचारोमधुनिविषसंयुक्तेमधुनोपिवि
षपदनिर्देशवत्॰ सचायमपवर्गःकथं॰ उच्यते॰ शास्त्राद्विदितपदार्थतत्वस्यपुंसःविषयदोषदर्शने
नविरक्तस्यमुमुक्षोःध्यायिनोःध्यानपरिपाकवशात्साक्षात्कृतात्मनःक्लेशहीनस्यनिष्कामकर्मानु
ष्ठानात्॰ अनागतःधर्माधर्मावनार्जयतःपूर्वोपात्तंचधर्माधर्मप्रचयंयोगाभ्यासवशाद्विदित्वास

९५ माहृत्य भुंजानस्य पूर्वकर्मनिवृत्तौ वर्त्तमानशरीरादिविगमे अपूर्वशरीराभावात् तदा एकविंशतिदुः
खसंबंधो न भवति कारणाभावात् सोयं दुःखहानिर्मोक्षः सोपवर्गः इति रामलिंगकृतौ न्यायसंग्रहे
प्रमेयपदार्थः इदानीं संशयमाह० एकस्मिन्धर्मिणि विरोधे भासमाने नानाकोटिकज्ञानं संशयः यथा स्था
णुर्वा पुरुषो वेति० नानाकोटिकं ज्ञानं संशय इत्युच्यमाने घटे द्रव्यत्वपृथिवीत्वे एतादृशज्ञानस्य संशय
त्वं स्यात्० ततो विरोधे वक्ति विरोधे भासमाने इति द्रव्यत्वघटत्वयोर्वि[illegible]भावान्नातिव्याप्तिः एवं चेत्तर्हि
घटे घटत्वं पटे पटत्वं इति ज्ञाने ऽतिव्याप्तिः ततो वक्ति एकस्मि[illegible]धर्मिणीति तस्य भिन्नधर्मिणि नानाकोटि
कज्ञानत्वान्नातिव्याप्तिः संशयस्त्रिविधः साधारणधर्मदर्श[illegible]पत्तिजः असाधारणधर्मदर्श
नजश्चेति० तत्र साधारणधर्मदर्शनजः संशयः यथा स्थाणु[illegible]पुरुषो वेति० स च ऊर्ध्वत्वसाधारणध
र्मदर्शनजः शब्दे नित्यत्वानित्यत्वे विप्रतिप[illegible]नित्यो अनित्यो वेति विप्रतिपत्तिजः असाधार ९५

णधर्मजस्तु० गंधवत्वं नित्येभ्यः आकाशादिभ्यो [illegible] नित्येभ्यः जलादिभ्यो व्यावृत्तं पृथिवीमात्रवृत्ति
त्वेन गंधवत्वस्य ज्ञानात् पृथिवी नित्या अनित्या वेति संशयः गं[illegible]धर्मज्ञानान्न भवतीति कृत्वा
असाधारणधर्मजः एवं प्रकारेण त्रिविधः संशय इत्यर्थः इति राम[illegible]कृतौ न्यायसंग्रहे संशयपदार्थः
प्रयोजनलक्षणमाह० येन पुरुषः प्रवर्त्तते तत्प्रयोजनं तच्च सुखावाप्तिः दुःखहानिः तदर्था हि प्रवृत्तिः पुरु
षस्य० दृष्टांतलक्षणमाह० वादिप्रतिवादिनोः संप्रतिपत्तिविषयो दृष्टांत[illegible]श्च द्विविधः साधर्म्यदृष्टांतः
वैधर्म्यदृष्टांतश्च० यथा धूमवत्वस्य हेतोर्महानस इति साधर्म्यदृष्टांतः तस्यैव हेतोर्महाह्रद इति० वैध
र्म्यदृष्टांतः सिद्धांतलक्षणमाह० प्रामाणिकत्वे सति नाभ्युपगतोऽर्थः सिद्धांतः स च चतुर्विधः सर्वतंत्र
सिद्धांत प्रतितंत्रसिद्धांताधिकरणसिद्धांताभ्युपगमसिद्धांतभेदाच्चतुर्विधः तत्र सर्वतंत्रसिद्धांतो य
था० धर्मिमात्रसद्भावः द्वितीयो यथा० नैयायकस्य मते मन इंद्रियं तच्च समानतन्त्रे वैशेषिकनये सिद्धं०

ए६ तृतीयो यथा॰ क्षित्यादिकर्तृत्वसिद्धौ कर्तुः सर्वज्ञत्वं॰ चतुर्थो यथा॰ जैमिनीयस्य नित्यानित्यविचारो याव
च्छब्दो गुण इति॰ अवयवलक्षणमाह॰ अनुमानवाक्यैकदेशा अवयवाः ते च प्रतिज्ञादयः तथा
च न्यायसूत्रं॰ प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवा इति॰ तत्र साध्यधर्मविशिष्टधर्मि
प्रतिपादकं वचनं प्रतिज्ञा॰ यथा पर्वतोऽग्निमानिति॰ पंचम्यंतं तृतीयांतं लिंगप्रतिपादकं वच
नं हेतुः यथा धूमवत्वादिति॰ सव्याप्तिकं दृष्टांतवचनमुदाहरणं॰ यथा महानस इति॰ यथा महा
२ ह्रद इति॰ पक्षे लिंगोपसंहार उपनयः तथा चायं कोऽर्थः वह्निव्याप्यधूमवानयं॰ पक्षे साध्योपसंहारो
निगमनं॰ यथा तस्मात्तथेति कोऽर्थः वह्निव्याप्यधूमवत्वाद् वह्निमा[illegible] एते प्रतिज्ञादयः पंचानुमा
नवाक्यस्यावयवा इवावयवाः न तु समवायीकारणं॰ न्यायस्य[illegible]पैकत्वात्॰ तर्कलक्षणमा
ह॰ तर्कोऽनिष्टप्रसंगः स च सिद्धव्याप्तिकयोर्धर्मयोर्मध्ये व्याप[illegible]ीयते रेण व्यापकप्रसंजनं॰ पर्व ए६

ते धूमोऽस्तु वह्निर्मास्त्वित्यप्रयोजकतायां केनचिदुक्ते॰ तत्र तर्कैः [illegible] वह्न्यभावे धूमो न स्यादिति॰
अत्र व्याप्यो वह्न्यभावस्तदंगीकारेण व्यापको धूमाभाव[illegible]प्रसंज[illegible]॰ सोऽयं तर्कः प्रमाणानामनु
ग्राहकः तथाहि॰ अयं पर्वतः साग्निरनग्निरिति संदेहानंतरं [illegible]॰ यद्ययमनग्निरयमिति तदा
ते प्रतिपद्ययमनग्निरभविष्यत्तदाऽनग्निमत्वात् अधूमोऽप्य[illegible]ति अधूमत्वप्रसंजनं स एव प्र
संगस्तर्क इत्युच्यते॰ अयं चानुमानविषयपरिशोधकः अनग्निमत्वस्य प्रतिक्षेपादतोऽनुमानस्य भव
त्यनुग्राहक इति॰ अत्र कश्चिदाह॰ तर्कः संशयेऽन्तर्भवतीति॰ तन्न॰ एककोटिविषयत्वात्तर्कस्य॰ सं
शयस्य द्विकोटिकत्वादिति तत्वं॰ निर्णयलक्षणमाह॰ निर्णयोऽवधारणं ज्ञानं॰ इदमित्थमिति॰ तच्च प्र
माणफलं॰ वादलक्षणमाह॰ तत्वबुभुत्सोः कथा वादः स चाष्टौ निग्रहस्थानमधिकरणं॰ ते च न्यूनाधिका
पसिद्धांतहेत्वाभासपंचकं चेत्यष्टौ निग्रहाः जल्पलक्षणमाह॰ उभयसाधनवती विजिगीषुकथा जल्पः

८१ सर्वथासंभवमस्तीतिग्रहणामधिकरणं॰ परपक्षेदूषिते स्वपक्षस्थापनावसानश्च जल्पः वितंडालक्ष
णमाह॰ स्वपक्षस्थापनाहीना वितंडा॰ परपक्षदूषणमात्रावसाना॰ नास्यवैतंडिकस्य स्थाप्यः पक्षोऽस्ति॰
कथानामनानावक्तृक पूर्वोत्तरपक्षप्रतिपादकवाक्यसंदर्भः उक्तानां पक्षधर्मत्वादिरूपाणां मध्येएके
नापिरूपेणहीनाः हेतवः तेचकतिपयरूपयोगात् हेतुवदवभासमानाहेत्वाभासाः पूर्वंहेत्वाभा
सस्वरूपमुक्तं इदानींलक्षणमाह॰ अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयाहेत्वा
भासाः तेनैवपुरस्फूर्त्तिकेन दुष्टज्ञप्तौ ज्ञापितायां कथापर्यवसाने जाते तदुपजीविनोन्यस्यानुपयोगा
त् तथाचविरुद्धोयत्रविपर्ययव्याप्तख्याः तेचासिद्धविरुद्धानैकांतिक प्रकरणसमकालात्ययापदि
ष्टभेदात्पंचैव॰ अत्रोदयनेन व्याप्तस्य पक्षधर्मतायाः प्रतीतिः सिद्धिः तदभावोऽसिद्धिः इति असि
द्धलक्षणमुक्तं॰ तच्चयद्यपिविरुद्धादिष्वपिसंभवतीति सांकर्यं प्रतीयते तैः॰ तथापियथान सांकर्यं ८१

तथोच्यते॰ योहिहेत्वाभासयत्रसाधने प्रथममुपस्थितो भवति सएव दुष्टज्ञप्तौ समर्थः दुष्टज्ञप्तिं करोति॰ न
चरमोपस्थितोऽन्योहेत्वाभासः दुष्टज्ञप्तिकारकः सविरुद्धोहेत्वाभासः यत्रव्यभिचारादयस्तथाभूतास्ते
नैकांतिकादयः तेपुनर्व्याप्ति पक्षधर्मता विशिष्टभूत हेतुस्वरूपज्ञस्याभावेच पूर्वोक्ताः असिद्धा दुष्टज्ञप्तिकार
का इतियावत्॰ तथाभूतः सोऽसिद्धः त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति॰ तत्रयस्य
हेतोराश्रयोनावगम्यते स आश्रयासिद्धः गगनारविंदं सुरभिः अरविंदत्वात्॰ सरोजारविंदवत्॰ अत्रग
गनारविंदमाश्रयः सचवास्त्येव॰ ननु गगनारविंदं प्रसिद्धंचेत्तस्याभावोनसंभवति॰ अप्रसिद्धंचेत्तर्हि त
स्याभावः कथं॰ अप्रसिद्धप्रतियोगिकाभावस्याभावात्॰ सत्त्यामभावोनिरूप्यते इति सिद्धांतात्॰ तथा
चगगनारविंदमाश्रयः सचनास्तीति कथमाश्रयासिद्धः उच्यते॰ आश्रयविशेषणाप्रसिध्या आ
श्रयासिद्धः यथा सुवर्णमयोद्रिर्वह्निमान् धूम

९८

वत्वात्· अत्रधूमवत्वंहेतुःसआश्रयासिद्धःकथंआश्रयःपर्वतःतस्यविशेषणंसुवर्णमयत्वंतच्चाप्र
सिद्धंपाषाणमयेपर्वतेसुवर्णमयत्वविशेषणाप्रसिध्या आश्रयासिद्धत्वं· अथवा अरविंदत्वादयः
आश्रयासिद्धाःकथं· अरविंदत्वस्याश्रय अरविंदंतस्यविशेषणंगगनीयत्वंतस्यारविंदेऽप्रसिद्ध
त्वात्· आश्रयविशेषणाप्रसिध्या आश्रयासिद्धः अयमप्याश्रयासिद्धःघटोऽनित्यःकार्यत्वात्प
टवत्· ननुकार्यत्वादितिहेतोराश्रयस्यविद्यमानत्वात्कथमाश्रयासिद्धःसिद्धसाधनस्तुस्यात्·सि
द्धस्यैवघटानित्यत्वस्यसाधनात्·मैवं·नहिस्वरूपेणकश्चिद[illegible]योभवति अनुमानस्य·किंतुसंदि
ग्धःनानुपलब्धेऽर्थेन्यायोनप्रवर्त्ततेनिर्णीतोऽर्थेन्यायोनप्रवर्त्तते· अपितुसंदिग्धेऽर्थे·नचघटादे
रनित्यत्वसंदेहोस्ति· अनित्यत्वस्यनिश्चितत्वात्तेनयद्यपिस्वरूपेणघटोविद्यतेतथाप्यनित्य
त्वेसंदेहाभावात्नासावाश्रयासिद्धःइत्याश्रयासिद्धत्वाद्धेतुःयोहेतुराश्रयेनावगम्यतेसस्वरू

९९ पासिद्धः यथा सामान्यं पक्षः अनित्यं भवितुमर्हतीति कृतकत्वात्· कृतकत्वं हेतुः पक्षीभूते आश्रयीभूते
सामान्ये नावगम्यते· कुतः सामान्यस्य नित्यत्वात्· इति कृत्वायं स्वरूपासिद्धः अपरोपि स्वरूपासिद्धः
शब्दो नित्यः चाक्षुषत्वात् घटवत्· अत्र चाक्षुषत्वं हेतुः स च शब्दे नास्त्येव शब्दस्य श्रोत्रग्राह्यत्वात्· भा
गासिद्धोपि स्वरूपासिद्धभेद एव· यथा पृथिव्यादयश्चत्वारः परमाणवः अनित्याः गंधवत्वात्· घट
वत्· गंधवत्वं हेतुः पक्षीकृतेषु सर्वेषु परमाणुषु नास्ति गंधवत्वस्य पृथिवीमात्रवृत्तित्वात्· जलतेज
वायुपरमाणुषु गंधवत्वस्यावृत्तिसिद्धत्वेन स्वरूपासिद्धत्वात्· तथा विशेषणासिद्धविशेष्यासिद्धास
मर्थविशेषणासिद्धासमर्थविशेष्यासिद्धादयः स्वरूपासिभेदाः तत्र प्रथमो यथा· शब्दोऽनित्यः द्रव्यत्वे स
त्यस्पर्शवत्वात्· आकाशवत्· अत्र द्रव्यत्वविशिष्टमस्पर्शवत्वं हेतुः तन्मध्ये शब्देऽस्पर्शवत्वमात्रं
वर्त्तते न तु द्रव्यत्वं· शब्दस्य गुणत्वात्· अतो विशेषणासिद्धः· अत्र द्रव्यत्वस्य विशेषणस्यावृत्तत्वे ९९

न तद्विशिष्टस्पर्शवत्वं नास्ति शब्दे· विशेषणाभावे विशिष्टस्याप्यभावात्· विशिष्टाभावस्त्रेधा· वि
शेषणाभावाद्विशिष्टाभावः कुत्रचिद्विशेष्याभावात् विशिष्टाभावः कुत्रचित्संबंधाभावात् विशिष्टा
भावः तत्र प्रथमो यथा· यत्र पुरुषमात्रे विद्यमाने दंडाभावे च सति यत्र दंडी पुरुषो नास्तीति प्रतीतिर्जा
यते तत्र विशेषणदंडाभावप्रयुक्तः पुरुषाभावः स विशेषणाभावप्रयुक्तो विशिष्टाभावः द्वितीयस्तु·
यत्र दंडसद्भावे पुरुषाभावे च दंडी पुरुषो नास्तीति प्रतीतिः· विशेष्याभावप्रयुक्तो विशिष्टाभावः कुतः
विशेषणस्य दंडस्य सत्वात्· तृतीयस्तु यत्र दंडो नास्ति पुरुषोपि नास्ति तत्रोभयाभावे संबंधाभावात्·
संबंधाभावप्रयुक्तो विशिष्टाभावः प्रकृते च शब्दे द्रव्यत्वाभावेन द्रव्यत्वविशिष्टास्पर्शवत्वाभावः द्रव्य
त्वविशेषणाभावप्रयुक्तः· विशेष्यासिद्धरूपः स्वरूपासिद्धो यथा· शब्दोऽनित्य अस्पर्शवत्वे सति द्रव्यत्वा
त्· अत्रापि विशिष्टो हेतुः न च विशेष्य द्रव्यत्वस्याभावे तद्विशिष्टं अस्पर्शवत्वं शब्दे नास्तीति कृत्वा वि

१०० शेष्यासिद्धरूपस्वरूपासिद्धः असमर्थविशेषणासिद्धो यथा. शब्दोऽनित्यः गुणत्वे सत्यकारणत्वात्.
अत्र विशेषणस्य गुणत्वस्यानित्यत्वरूपसाध्यसाधने न किंचित्सामर्थ्यमस्ति. विशेष्याकारणत्वरू
पस्यैव नित्यत्वं साधने सामर्थ्यात्. अत असमर्थविशेषणता स्वरूपासिद्धिश्च विशेषणाभावे विशि
ष्टस्याप्यभावात्. ननु विशेषणं गुणत्वं तच्च शब्देस्त्येव तत्कथं विशेषणं व्यवच्छेदेन प्रयोजनवत्.
भावः उच्यते. अस्त्येव गुणत्वं शब्दे. किंतु न तद्विशेषणं. तदेव हेतोर्विशेषणं यदन्यं गुणत्वं तु निः
प्रयोजनं असमर्थमित्युक्तमेव. असमर्थविशेष्यासिद्धो यथा शब्दोऽनित्यः अकारणत्वे सति
गुणत्वात्. अत्र तु अकारणत्वरूपविशेषणमात्रस्यैव नित्यत्वसाधने समर्थत्वाद्विशेष्यमसम
र्थं. स्वरूपासिद्धस्तु विशेष्याभावे विशिष्टस्याभावात्. विशिष्टस्य हेतुत्वेनोपादानात्. गुणत्वादिसत्त्व
विचारः पूर्ववत्. व्याप्यत्वासिद्धस्तु यत्र व्याप्तिर्नावगम्यते स व्याप्यत्वासिद्धः स च द्विविधः एकः १००

साध्येनासहचरितः अपरस्तु सोपाधिकसाध्यसंबंधः तत्र प्रथमो यथा. यत्सत्तत्क्षणिकं यथा घनः
सत्त्वं व्याप्यक्षणिकत्ववान्. विवादास्पदीभूतः शब्दादिरिति. अत्र शब्दादयः पक्षः तस्य क्षणिकत्वं
साध्यं सत्त्वं हेतुः न चास्य हेतोः क्षणिकत्वेन सह व्याप्तौ प्रमाणमस्ति वीणुदाहरणाभावाद्घटोदाह
रणादिकान्. मीमांसकासौगतास्तु त्योपनीतिमुदाहृतं. १[illegible]गतमते अवयवद्वयमेवमुदाहरणं उ
पनयश्च. सत्त्वं हेतुः व्याप्तिग्राहकप्रमाणाभावात् व्याप्यत्वासिद्धः अपरस्तु उपाधिसद्भावात् व्या
प्यत्वासिद्धः स यथा. स गर्भस्थो मैत्रातनयः पक्षः श्यामो भवितुमर्हति. मैत्रीतनयत्वात्. यत्र मैत्रीतनय
त्वं तत्र श्यामत्वं यथा दृष्टमैत्रातनयेषु अत्र मैत्रीतनयत्वेन श्यामत्वं साध्यते. न च मैत्रीतनयत्वं श्यामत्वे
प्रयोजकं किंतु शाकाद्याहारः प्रयोजकः प्रयोजकश्चोपाधिरित्युच्यते. अतो मैत्रीतनयत्वेस्य श्या
मत्वेन संबंधे शाकाद्याहारपरिणामत्वुपाधिः अतोऽत्रोपाधिसंबंधाद्व्याप्तिर्नास्तीति व्याप्यत्वासिद्धो

१०२ यंमैत्रीतनयत्वादितिहेतुः अपरोप्युपाधिसद्भावेवाव्याप्यत्वासिद्धः यथापर्वतोधूमवानग्निमत्त्वादयंव्य
भिचारी अयोगोलकेवह्निर्वर्त्ततेधूमोनास्तीतिकृत्वाव्यभिचारीव्यभिचारेचावश्यमुपाधिरिति अत्रा
र्द्रेंधनसंयोगउपाधिः कथंसाध्यंधूमः तस्यव्यापकः यत्रधूमस्तत्रार्द्रेंधनसंयोगइतिसाध्यव्याप
कत्वं· यत्रवह्निस्तत्रार्द्रेंधनसंयोगोनास्ति अयोगोलकेवह्निर्वर्त्ततेतत्रार्द्रेंधनसंयोगोनास्तीतिसाधनाव्या
पकत्वंउभयविशेषणनिश्चयेननिश्चितोपाधिरित्युच्यते· एतस्यसमव्याप्त्यभावात्· समव्याप्तिर्नामय
स्यसाध्यपुरःसराव्याप्तिः उपाधौउपाधिसमपुरःसराव्याप्तिःसाध्येसमव्याप्तइत्युच्यते· प्रकृतेवयत्रधू
मस्तत्रार्द्रेंधनसंयोगोवर्त्ततेयथामहानसे· यत्रार्द्रेंधनसंयोगस्तत्रधूमोनास्तिजलेआर्द्रेंधनसं
योगोवर्त्ततेतत्रधूमाभावादिकृत्वायंविषमव्याप्तउपाधिः एतत्सद्भावाद्वह्निमत्त्वादितिहेतुः उपाधिस
द्भावाद्व्याप्यत्वासिद्धः अन्योप्युपाधिसद्भावाद्व्याप्यत्वासिद्धः यागीयाहिंसा अधर्मसाधनंहिंसात्वात्· क्र १०२

तुबाह्यहिंसावत्· अत्रनिषिद्धत्वमुपाधिः कथं अधर्मसाधनत्वेहिंसात्वंनप्रयोजकंकिंतुनिषिद्धत्वमे
व· प्रयोजकत्वोपाधिरित्युच्यमाने· साध्यव्यापकत्वेसतिसाधनाव्यापकउपाधिरित्युपाधिलक्षणं
तच्चात्रास्तिनिषिद्धत्वे· निषिद्धत्वंहिंसाधर्मस्याधर्मसाधनत्वस्यव्यापकं· यत्रयत्राधर्मसाधनंतत्रत
त्रावश्यंनिषिद्धत्वमितिनास्तिः यागीयपशुहिंसायांसत्यपिहिंसात्वेनिषिद्धत्वाभावात् साधनव्या
पकः अयमुपाधिः साध्यव्यापकः उपाधिरित्युच्यमानेपर्वतोवह्निमान्धूमवत्त्वादेतस्मिन्सदनुमानेप्रमे
यत्वमुपाधिः स्यात्· तस्यापिसाध्यभूतवह्निव्यापकत्वात्· अतोसाधनाव्यापकेति अप्रमेयत्वस्यसा
धनभूतधूमव्यापकत्वात् यत्रधूमस्तत्रावश्यंप्रमेयमितिव्याप्तेःसाधनाव्यापकत्वाभावान्नातिव्याप्तिःसा
धनव्यापकउपाधिरित्युच्यमानेपर्वतोवह्निमान्धूमवत्त्वादित्युच्यमानेपर्वतोवह्निमान्धूमवत्त्वादेतस्मि
न्ननुमानेघटस्योपाधित्वंस्यात्· तस्यापिसाधनंधूमः तस्याव्यापकत्वात्· यत्रयत्रधूमस्तत्रतत्रघटः

१०२ नास्तिपक्षेधूमसत्वेघटासत्वात्. तदर्थंसाध्यव्यापकइतिघटस्यवह्निव्यापकत्वाभावान्नातिव्याप्तिरिति.
नन्विदंलक्षणंपक्षधर्मावच्छिन्नसाध्यव्यापकउपाधावतिव्याप्तंकथं. वायुःप्रत्यक्षःप्रत्यक्षस्पर्शाश्र
यत्वात्. अत्रोद्भूतरूपवत्वमुपाधिः तस्यशुद्धसाध्यवत्वप्रत्यक्षत्वंवर्त्ततेउद्भूतरूपवत्वंनास्ति
एतस्यशुद्धसाध्यव्यापकत्वाभावात्उपाधित्वंनस्यात्. नचशुद्धसाध्यव्यापकत्वेसतीतिवि
शेषणाभावेकथमव्याप्तिरितिवाच्यं. तद्विशेषणस्यावश्यकत्वात्. अन्यथापर्वतोग्निमा
न्धूमवत्वादेतस्मिन्ननुमानेव्यंजनवत्वस्योपाधित्वंस्यात्. कथंमहानसत्वावच्छिन्नोयत्रवह्निस्त
त्रव्यंजनवत्वंयथामहानसेयत्रधूमस्तत्रव्यंजनवत्वंनास्तिपर्वतेधूमोवर्त्ततेतत्रव्यंजनवत्वंनास्ति.
अथमपिउपाधिःस्यात्तदर्थंशुद्धसाध्यव्यापकत्वेसतीतिविशेषणमावश्यकंव्यंजनवत्वस्यशु
द्धसाध्यव्यापकत्वाभावात्कथं. यत्रवह्निस्तत्रव्यंजनवत्वंनास्तिपर्वतेयत्रव्यंजनवत्वाभावान्नाति १०२

व्याप्तिः तथाचशुद्धसाध्यव्यापकत्वेसतीतिविशेषणमावश्यकं एवंसतिपक्षधर्मावच्छिन्नसाध्यव्याप
कोपाधावव्याप्तेः तस्यशुद्धसाध्यव्यापकत्वाभावात्. अथपक्षधर्मावच्छिन्नसाध्यव्यापकत्वेसतिसा
धनाव्यापकउपाधिरित्युपाधिलक्षणमितिचेन्न. साधनावच्छिन्नसाध्यव्यापकोपाधावव्याप्तेः त
स्यपक्षधर्मावच्छिन्नसाध्यव्यापकत्वाभावात् कथं. प्रागभावोविनाशीजन्यत्वात् इत्यत्रभावत्वमुपाधिः
यत्रविनाशित्वंतत्रभावत्वंवक्तव्यं. तच्चनास्तिविनाशित्वंवर्त्ततेप्रागभावेतत्रभावत्वंनास्तितदर्थंसाध
नावच्छिन्नसाध्यव्यापकोवक्तव्यः तथाचजन्यत्वावच्छिन्नंयत्रविनाशित्वंतत्रभावत्वंयथाघटे. यत्रज
न्यत्वंतत्रभावत्वंनास्तियथाध्वंसे. अयंसाधनावच्छिन्नसाध्यव्यापकउपाधिर्भवतितत्रपक्षधर्माव
च्छिन्नसाध्यव्यापकत्वेसतिसाधनाव्यापकउपाधिरित्युपाधिलक्षणंतत्रनास्तीत्यव्याप्तिरिति. अ
थसाधनावच्छिन्नसाध्यव्यापकत्वेसतिसाधनाव्यापकउपाधिरित्युपाधिलक्षणमितिचेत्तर्हि

१०३ पक्षधर्मावछिन्नसाध्यव्यापकस्तद्दिर्द्रव्यत्वोपाधावव्याप्तिः तस्यसाधनावछिन्नसाध्यव्यापकत्वा
भावात्· उभयविधलक्षणाव्याप्तिः शुद्धसाध्यव्यापकेउपाधौ· कथं· पर्वतः धूमवान्वह्निमत्वादित्य
त्रार्द्रेंधनसंयोगस्योपाधित्वं कथं यत्र धूमस्तत्रार्द्रेंधनसंयोगः यत्र वह्निस्तत्रार्द्रेंधनसंयोगो नास्ति·
अयोगोलके व्यभिचारात्· अयमुपाधिर्भवति एतस्य पक्षधर्मावछिन्नसाधनावछिन्नसाध्यव्या
पकत्वाभावात् उपाधित्वं न स्यात्· वर्त्तते चोपाधित्वं तस्माच्छुद्धसाध्यव्यापकोपाधावव्याप्तिः तस्मा
दिदं लक्षणं न संभवतीति चेत्· अत्र ब्रूमः साध्यप्रसिद्ध्यवछेदकधर्मावछिन्नसाध्यव्यापकत्वे सति
साधनाव्यापक उपाधिरित्युपाधिलक्षणं एवं च सर्वत्र नाव्याप्तिः वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वा
त् इत्यत्रोद्भूतरूपवत्वस्योपाधित्वं स्यादेव· तस्य साध्यप्रसिद्ध्यवछेदकबहिर्द्रव्यत्वावछिन्नसाध्या
व्यापकत्वात्· कथं· यत्र बहिर्द्रव्यत्वावछिन्नं प्रत्यक्षत्वं तत्रोद्भूतरूपवत्वं· यथा घटे· यत्र प्रत्यक्षस्प १०३

र्शाश्रयत्वं तत्रोद्भूतरूपवत्वं· वायो प्रत्यक्षस्पर्शाश्रयत्वेपि उद्भूतरूपवत्वात्· साधनाव्यापकत्वेनोपाधि
त्वं· एवं च साधनावछिन्नसाध्यव्यापकेपि नाव्याप्तिः तस्यापि साध्यप्रसिद्ध्यवछेदकं साधनमेव
तदवछिन्नसाध्यव्यापकत्वान्नातिव्याप्तिः प्रागभावो विनाशी जन्यत्वात्· अत्र भावत्वमुपाधिः सा
ध्यप्रसिद्ध्यवछेदकं साधनमेव तदवछिन्नसाध्यस्य व्यापकत्वात् भावत्वोपाधेः कथं· यत्र जन्यत्वा
वछिन्नं विनाशित्वं· तत्र भावत्वं· यथा घटे· यत्र जन्यत्वं तत्र भावत्वं नास्ति ध्वंसे जन्यत्वे विद्यमानेपि
भावत्वाभावात् साधनाव्यापकत्वेनोपाधित्वं· पर्वतो धूमवान्वह्निमत्वादित्यत्र साध्यप्रसिद्ध्यवछेदकं
महानसत्वं तदवछिन्नो यत्र धूमः महानसे वर्त्तते तत्रार्द्रेंधनसंयोगो वर्त्तते यत्र वह्निस्तत्रार्द्रेंधनसं
योगो नास्ति अयमयोगोलके वह्निर्वर्त्तते आर्द्रेंधनसंयोगाभावात् साधनाव्यापकत्वेनोपाधित्वं· त
था च साध्यप्रसिद्ध्यवछेदकधर्मावछिन्नसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिरित्युपाधि

१०४ लक्षणंसर्वोपाधौवर्त्ततइतिकृत्वानाव्याप्तिरिति· अत्रेदंविचार्यते· साध्यप्रसिध्यवछेदकधर्मेयाव
त्वंवाविवक्षितंयत्किंचित्तंवा· नाद्यः वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्वस्यो
पाधित्वंनस्यात्· तस्यसाध्यप्रसिध्यवछेदकीभूतयावद्धर्मावछिन्नसाध्यव्यापकत्वाभावात्·
कथं· यत्रप्रमेयत्वावछिन्नंप्रमेयत्वंतत्रसाध्यंप्रत्यक्षत्वंतस्यप्रसिद्ध्यवछेदकीभूतयावद्धर्मम
ध्येप्रमेयत्वंप्रतितत्तदवछिन्नसाध्यव्यापकत्वाभावात्· कथं· यत्रप्रमेयत्वावछिन्नंप्रमेयत्वंतत्रोद्भू
तरूपवत्वंनास्तिप्रमेयत्वावछिन्नंप्रत्यक्षत्वंवर्त्ततेआत्मनितत्रोद्भूतरूपवत्वाभावात्नद्वितीयः य
द्यप्युद्भूतरूपवत्वाद्वायुपाधौसाध्यप्रसिध्यवछेदकीभूतयत्किंचिद्धर्मः बहिर्द्रव्यत्वंतदवछिन्नसाध्यव्या
पकत्वेपिसद्धेतौधूमादौव्यंजनत्वादेरुपाधित्वंस्यात्· तस्यापिसाध्यप्रसिद्ध्यवछेदकीभूतयत्किंचि
द्धर्मःमहानसत्वंतदवछिन्नसाध्यव्यापकत्वात्· कथं· यत्रमहानसत्वावछिन्नोवह्निः तत्रव्यंजनवत्वं १०४

यथामहानसेयत्रधूमस्तत्रव्यंजनवत्वंनास्तिपर्वतेधूमेविद्यमानेव्यंजनवत्वाभावात्साधना
व्यापकत्वेनोपाधित्वंस्यादितिचेत्· अत्रब्रूमः यत्किंचिद्धर्मएवविवक्षितः नचव्यंजनत्वादेरुपा
धितापत्तिः सद्धेतौधूमेइतिवाच्यं· सचसाधनाव्यापकोविवक्षितः तथाचसाध्यप्रसिद्ध्यवछेदकंयत्किं
चित्साधनाव्यापकधर्मावछिन्नसाध्यव्यापकत्वस्यविवक्षितत्वात्· एवंचनव्यंजनवत्वस्योपाधित्वं
तस्यसाध्यप्रसिध्यवछेदकीभूतसाध्यव्यापकसाधनाव्यापकधर्मावछिन्नत्वाभावात्· महानसादेः
साधनाव्यापकत्वाभावात्धूमोवर्त्ततेपर्वतेतत्रमहानसत्वाभावान्नातिव्याप्तिरिति· ननुवायुःप्रत्य
क्षः प्रमेयत्वादित्यत्रोद्भूतरूपवत्वस्योपाधित्वंनस्यात्· तस्यसाध्यप्रसिध्यवछेदकंयत्किंचिद्धर्मे
बहिर्द्रव्यत्वंतदवछिन्नसाध्यव्यापकत्वेपिबहिर्द्रव्यत्वस्यसाधनंप्रमेयत्वव्यापकत्वाभावादुपाधिर्नस्या
दितिचेन्न· तत्रउद्भूतरूपत्वस्योपाधित्वंनास्त्येवतत्रप्रत्यक्षसामग्र्याएवोपाधितात्· कथं· साध्यप्रसिद्ध्य

१०४ वछेदकीभूतोधर्मः प्रमेयत्वव्यापकत्वात्· अभेदेव्याप्यव्यापकभासत्वात्· तथाचसाध्यप्रसिध्यव
छेदकंप्रमेयत्वंसाधनाव्यापकंयत्तदवछिन्नंसाध्यंप्रत्यक्षत्वं आत्मादौवर्त्ततेतत्रप्रत्यक्षसामग्र्यपि
वर्त्ततेयत्रप्रमेयत्वंतत्रप्रत्यक्षसामग्रीनास्ति· आकाशेपरमाण्वादौचप्रमेयत्वेविद्यमानेपि अस्मदा
दिप्रत्यक्षसामग्र्यप्रिवर्त्ततेभावात्· साधनाव्यापकत्वेनायमुपाधिः इदानीमुपाधेर्दूषकताविचार्य
ते· अस्यव्यभिचारोन्नायकत्वेनदूषकत्वंकथं· वह्निः धूमव्यभिचारी आर्द्रेंधनसंयोगव्यभिचाराद्यो
यस्यव्यापकव्यभिचारीसतद्व्याप्यव्यभिचारीतथागुणत्वंपृथिवीव्यापकेद्रव्यत्वव्यभिचारीभवतित
द्व्यभिचारीचभवति· इत्यादिसदुपाधौज्ञेयं· अथवाबाधोत्थापकतयादोषत्वं· तथाहि· पक्षःसा
ध्याभाववान्साध्यव्यापकोपाध्यभाववत्वात्· योयद्व्यापकाभाववान्सनव्याप्याभाववान् यथाह्रदः
धूमव्यापकवह्न्यभाववान्भवतिसधूमाभाववानपिभवति· सचोपाधिर्द्विविधः निश्चितः शंकितश्चेति। १०५

तत्रनिश्चितोपाधिर्नामयत्रसाध्याव्यापकत्वनिश्चयः सनिश्चितोपाधिः यथानिषिद्धत्वं· यत्रसाध
नताव्यापकतासंदेहोवासाध्यव्यापकतासंदेहोवा ससंदिग्धोपाधिः यथाशाकपाकजत्वादिः वि
स्तरस्तुचिंतामणौद्रष्टव्यः बालबोधार्थंन्यायसंग्रहस्यक्रियमाणत्वादितितत्वं· तदेवंत्रिविधोपि
सिद्धोदर्शितः संप्रतिविरुद्धंकथ्यते· साध्यविपर्ययव्याप्तोहेतुर्विरुद्धः तदुदाहरणमाह· शब्दोऽनित्यः
कृतकत्वात्· अत्रसाध्यंनित्यत्वंतद्विपर्ययेणानित्यत्वेनव्याप्तंहिकृतकत्वं यत्कृतकंतदनित्यमेवअनित्यमि
तिअतः साध्यविपरीतव्याप्तत्वात्कृतकत्वंहेतुर्विरुद्धः क्रमप्राप्तमनैकांतिकलक्षणमाह· साध्यसंश
यहेतुरनैकांतिकः कोऽर्थः साध्यसंशयजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वेसतिहेतुत्वमभि
मतः साध्यसंशयजनककोटिद्वयोपस्थापकंकुत्रचित्साधारण्यंकुत्रचित् अनुपसंहारित्वंएतदन्यतम
त्वेनहेतोर्यत्पक्षधर्मताज्ञानंतद्विषयत्वेसतिहेतुत्वमभिमतः सव्यभिचारः सव्यभिचारोनैकांतिकइति

१०६ वासचसाधारणासाधारणानुपसंहारिभेदात्त्रिविधः पक्षसपक्षविपक्षवृत्तिः साधारणः शब्दो नित्यः
प्रमेयत्वात्· अत्र प्रमेयत्वं हेतुः स च पक्षे शब्दे सपक्षे नित्ये व्योमादौ विपक्षे चानित्ये घटादौ च वर्त्त
ते· कुतः सर्वस्य प्रमेयत्वात्· असाधारणस्तु स एव· यः सपक्षविपक्षाभ्यां व्यावृत्तः पक्ष एव वर्त्तते· यथा
भूर्नित्या गंधवत्वात्· अत्र गंधवत्वं हेतुः सपक्षान्नित्याद्व्योमादेर्व्यावृत्तं अनित्याज्जलादेर्व्यावृत्तं भूमात्र
वृत्ति कुतः गंधवत्वस्य पृथीव्यसाधारणधर्मत्वात्· गंधवत्वस्यैव व्यभिचारो लक्ष्यते· नियमासंभवा
भावात् हेतौ नियमः कः सपक्षवृत्तित्वे सति विपक्षाद्व्यावृत्तिरेव नियमः तस्यैव गमकत्वात्· त
स्यैव साध्यविपरीतव्याप्तस्य तन्नियमाभावो व्यभिचारः स च द्वेधा संभवति· सपक्षविपक्षयो
र्व्यावृत्तौ ताभ्यां व्यावृत्तौ च यस्य प्रतिपक्षभूतहे त्वंतरमस्ति स प्रकरणसमः कोऽर्थः साध्य
विरोध्युपस्थापनसमर्थसमर्थसमानबलोपस्थायप्रतिरुद्धकार्यलिंगत्वं बलं च व्याप्तिपक्ष १०६

र्मते तेन तुल्यतया ययोर्हेत्वोर्ज्ञाते तौ सत्प्रतिपक्षावित्यर्थः प्रकरणसमसत्प्रतिपक्षशब्दयोः पर्यायत्वात्·
तथाहि· शब्दोऽनित्यः अनित्यधर्मानुपलब्धेः आकाशवत् शब्दो नित्यः नित्यधर्मानुपलब्धेः
घटवत्· अत्र विपरीतार्थसाधकं समानबलमनुमानांतरं प्रतिपक्ष इत्युच्यते· यत्तु न तुल्य
बलं तत् प्रतिपक्षः तथाहि विपरीतसाध्यकानुमानं त्रिविधं भवति· उपजीव्यमुपजीवकमनुभयं
चेति· तत्राद्यं सावयवं बलवत्· यथाणुकं सावयवावयववारब्धं कार्यद्रव्यत्वात् घटवत् अनेनानुमानेन
परमाणुद्व्यणुकयोः सिद्धिः तच्चोपजीव्यं द्वितीयानुमानस्य· तथाहि· परमाणवोऽनित्याः स्पर्शवत्वा
त् एतस्य हेतोः परमाणुसाधकमनुमानं· नित्यत्वं साधकं यद्यपि न सत्प्रतिपक्षः किंतु नित्यत्वसाध
कमनुमानं अनित्यत्वे साधकानुमानस्य बाधकमेव· कुतः उपजीव्यत्वात्· उपजीव्यत्वं च धर्मी
भूतपरमाण्वारूढकत्वात्· नहि प्रमाणेनागृहीते धर्मिणि परमाण्वादौ· अनित्यत्वानुमानं इदं

१०७ नसंभवति॥ आश्रयासिद्धेः॥ अतो ऽनेनैवानुमानेन परमाणुग्राहकस्यानुमानस्य प्रामाण्यमभ्य
नुज्ञानं भवति॥ अन्यथास्योदयासंभवात्॥ तस्मादुपजीव्यं बाधकमेव॥ न सत्प्रतिपक्षः॥ उपजी
वकं तु दुर्बलत्वाद्बाध्यमेव॥ यथेदमेवानित्यत्वादनुमानं॥ तृतीयस्तु सत्प्रतिपक्षः तुल्यबलत्वात्॥
यस्य प्रत्यक्षादिप्रमाणेन पक्षे साध्याभावः परिछिन्नः स कालात्ययापदिष्टः स एव बाधितविषय
इत्युच्यते॥ यथा अग्निरनुष्णः कृतकत्वाज्जलवदिति॥ अत्र कृतकत्वं हेतुः तस्य साध्यमनु
ष्णत्वं तस्याभावः प्रत्यक्षेणैव परिछिन्नः त्वगिंद्रियेणाग्नेरुष्णत्वपरिछेदात्॥ तथा अपरो ऽपि
कालात्ययापदिष्टः प्रदृश्यते॥ यथा क्षणिकत्वे साध्ये प्रागुक्तं सत्वं हेतुः तथा हि॥ सर्वं क्षणिकं स
त्वादत्रापि यत्साध्यं क्षणिकत्वं तदभावो ऽक्षणिकत्वं तच्च प्रत्यभिज्ञानाख्येन प्रत्यक्षे
ण परिछिन्नं स एवायं घटो मया पूर्वमुपलब्ध इति प्रत्यभिज्ञया पूर्वापरस्यानुभवज १०७
नितसंस्कारसहकृतेंद्रियप्रभवया पूर्वापरकालयोर्घटस्य स्थायित्वपरिछेदात्॥ त एते असिद्धा
दयः पंच हेत्वाभासाः॥ यथायथं पक्षधर्मत्वादिरूपहीनत्वादहेतवः स्वसाध्यं न साधयंतीति॥ यदि
व्यतिरेकी हेतोर्लक्षणस्य त्रयो दोषाः अतिव्याप्त्यव्याप्त्यसंभवाः ते ऽप्येतेष्वंतर्भवंतीति न तु पंच
भ्यो ऽधिकाः॥ तथा हि अतिव्याप्तिर्व्याप्यत्वासिद्धिः विपक्षेऽभावात्॥ व्यावृत्त्यभावात्सोपाधिकत्वाच्च॥
यथा गोर्लक्षणस्य पशुत्वस्य गोत्वे हि सास्नादिमत्वं प्रयोजकं॥ न पशुत्वं॥ तथाव्याप्तेर्भागासिद्धत्वं यथा गो
र्लक्षणस्य शाबलेयत्वस्य॥ एवमसंभवो ऽपि स्वरूपासिद्ध एव कथं॥ यथा गोर्लक्षणमेकशफत्वं॥ शफा
विशफ शब्देन खुरः उच्यते॥ न विनं तद्भावात्॥ एकः संभवः इदानीं छलनिरूपणमाह॥ अभिप्रायांत
रेण प्रयुक्तस्य शब्दस्यार्थांतरं परिकल्प्य दूषणाभिधानं छलं॥ यथा नवकंबलो ऽयं देवदत्त
इति वाक्ये नूतनाभिप्रायेण प्रयुक्तस्य नवशब्दस्यार्थांतरमारोप्य कश्चिद्दूषयति॥ नास्य नव कंब

१०८ ण्णाः संति दुरिहत्वात्· न ह्यस्य कंबलद्वयमपि संभाव्यते कुतो न वेति स च छलवादितया नीयते· अथ जा
तिलक्षणं· असदुत्तरं जातिः स चोत्कर्षसमादिभेदेन बहुधापि विस्तरभयान्नेह कृत्स्नतोच्यते· अव्या
प्तेन दृष्टांतगतधर्मेण पक्षे अव्यापकधर्मस्यापादनं उत्कर्षसमा जातिः यथा शब्दोऽनित्यः कृतकत्वात् घ
टवदिति प्रयुक्ते कश्चिदेवमाह· यदि कृतकत्वेन हेतुना घटवच्छब्दोऽनित्यः स्यात्तर्हि तेनैव हेतुना घट
वदेव शब्दः श्रावणो न स्यात्· भवति च स श्रावण इति· निग्रहस्थानलक्षणमाह· पराजयहेतुर्निग्रहस्थानं·
तदन्यूनाधिकापसिद्धांतार्थांतरप्रतिभामतानुरोधाद्बहुविधमयि विस्तरतस्मान्नेह कृत्स्नतोच्य
ते· इह तु विवक्षितार्थे किंचिन्न्यूनं तन्न्यूनं विवक्षितार्थे किंचिदधिकं तदधिकं· सिद्धांतादपध्वस्तोऽप
सिद्धांतः प्रकृतासंबद्धार्थकथनमर्थांतरः उत्तरापरिस्फूर्तिरप्रतिभा· परकीयमतस्यार्थस्य प्रति
कूलस्य स्वयमेवाभ्युपगमो मतानुज्ञाः इष्टार्थभंगो विरोधः इह त्वत्यंतमुपयुक्तानुपयुक्तारूपभेदाः कथि १०८

ताः नानुरूपभेदसिद्धांतप्रतिपादनमिति· उपयुक्तानां वा लक्षणं च दोषाय नेति· एतावतैव बालव्युत्प
त्तिसिद्धेः श्रीमन्माधवसाधुकवाक्यरचितं चातुर्यभावस्फुटं भावाभावपदार्थबोधकपदैः संतर्कवृंदैर्युतं· बा
लाज्ञानतमोमिदं स्वविषये निर्मत्सराणां सतामानंदैकरसं च संग्रहमिमं पश्यंतु सत्तार्किकाः रुक्मांगदा
त्मजेनैव राम लिंगेन धीमता· भवान्यां करप्रीत्यै कृतोयं न्यायसंग्रहः इति श्रीरुक्मांगदात्मजराम
लिंगकृतो न्यायसंग्रहे निग्रहस्थानपरिच्छेदः समाप्तः ॥श्री रस्तु॥ ॥

१३

आय मंजुषा